22. Read *Ṛishimitra* or better *Bhojakarshimitra*.

23. Read *yatakam=cham*.

24. The name of the donor seems to have stood here.

25. The meaning is not clear.

B—The Khayaḍavālas

No. 11—Tārāchaṇḍī Rock Inscription of Pratāpadhavala, [Vikrama] year 1225(1169 A.D.)

Tārāchaṇḍī near Sasaram, Shahabad District, Bihar.
Colebrooke, *Misc. Essays.*, II, pp. 295f.; Fitz. Edward Hall, *Journ. Am. Or. Soc.*, VI, pp. 547 f.; D. C. Sircar, *Ep. Ind.*, XXXIV, pp. 23 ff.

Language : Sanskrit
Script : Early Nāgarī
Metre : Vv. 1-2 वसन्ततिलक

Summary : *Mahānāyaka* PRATĀPADHAVALA, the lord of JĀPILĀ (modern Japlā or Japlā-Dināra, about 25 miles from Dehri-on-Sone) declared to his sons, grandsons and other relatives that, for the village of KALAHAṆḌĪ and BAḌAYILĀ, the Brāhmaṇas of SVARṆAHALA OR SUVARṆAHALA obtained a spurious copper-plate grant by fraud and bribery from an officer of king VIJAYACHANDRA of GĀDHINAGARA (i.e. Kānyakubja) and that they should ignore the spurious charter and collect taxes, etc., from those villages as usual. The date of the record is [Vikrama] SAṀVAT 1225, JYESHṬHA BA-DI 3, WEDNESDAY (16TH APRIL, 1169 A. D.). The inscription ends with the signature of *Rājaputra* Śatrughna. It is difficult to say whether Pratāpadhavala was an independent ruler or a vassal of Vijayachandra. He seems to have ruled over the Palamau District together with the southern part of Shahabad and the adjoining area of Gaya.

TEXT[1]

1. सिद्धम्[2]
स्वस्त्युद्गत-प्रथित-कीर्त्तिधरः समन्ता-
द्देवः प्रतापधवलो वदति स्ववंश(शम्) ।
ग्रामेष्वमीषु कलहंडि-समीपगेषु
विप्रैः सुवर्ण्णहलजैरिह छद्मना यत् ॥ 1
2. उत्कोच्य गाधिनगराधिप-दास-देऊ–

हस्तात् कुताम्व्र(म्र)मिमकं प्रगृहीतमास्ते ।
नात्र प्रतीति-विषयः परितो विधेयः
शू(सू)च्यग्र-भेद्यमपि भूमितलं
3. न तेषाम् ॥ 2
संवत् १२२५ ज्येष्ठ-वदि ३ वु(बु)धे । जापिलाधिपति-महानायक-प्रतापधवल–चरणाः । आत्मवंशोद्भवानां पुत्र-पौत्रादीनां स्वरूपं कथयन्ति ।
4. यदेतत् सुवर्ण्णहलीय-लोकैः कान्यकुव्जा(ब्जा)धिप-श्री-विजयचंद्र-भूप-दास-देऊ-पर्ा(पा)श्वात् उत्कोचं दत्वा(त्त्वा) कलहंडी-व(ब)डयिला-ग्रामयोः कुताम्व्र(म्र)मानीतं छद्मना । तत्र प्रतीतिर्न कार्या (।*)
5. सर्वथा लम्पटा अमी द्विजाः । शू(सू)च्यग्रभेद्यापि भूमिर्द(र्न्न) र्त(ते)-षामस्ति । इति ज्ञात्वा भाग-भै(भो)गादिकं ग्रहीष्यथ विलप्स्यथ चेति ।
6. महाराजपुत्र–श्री-स(श)त्रुघ्नस्य ः॥[3]

1. From impressions. For the spurious grant mentioned here, see *Ep. Ind.*, XXXV, pp. 153 ff.
2. Expressed by symbol.
3. A *visarga*-like sign here is part of the mark of punctuation.

C — Miscellaneous

No. 12 — Bodhgayā Inscription of Mahānāman, [Gupta] year 268 (587 A.D.)

Bodhgayā, Gaya District, Bihar.
Fleet, *Corp. Ins. Ind.*, III, pp. 276 f.

Language : Sanskrit
Script : Late Brāhmī
Metre : V. 1 स्रग्धरा; Vv. 2-3 शार्दूलविक्रीडित; V. 4 आर्या; V. 5 श्लोक (अनुष्टुभ्); V. 6 शार्दूलविक्रीडित; V. 7 स्रग्धरा; V. 8 आर्या; V. 9 स्रग्धरा.

Summary : The disciples of MAHĀKĀŚYAPA (BUDDHIST) roamed at one time over the country at the feet of the mountain of LAṄKĀ; and in succession from them there were, in hundreds, disciples and their disciples. Amongst them was the *Śramaṇa* BHAVA. His disciple was RĀHULA. After him there came the ascetic UPASENA (I). His disciple MAHĀNĀMAN, who was born in the island of LAṄKĀ and was an inhabitant of ĀMRADVĪPA, built a mansion for the Teacher of Mankind (the BUDDHA) with a pavilion open on all sides at the exalted BODHIMAṆḌA.—The inscription was incised in the [GUPTA] YEAR 268 (587 A.D.), on the 9th of the bright fortnight of the month of CHAITRA.

TEXT[1]

1. [सिद्धम्][2]
व्याप्तो येनाप्रमेयः सकल-शशि-रुचा सर्व्वतः सत्व[3]—धातुः
क्षुण्णाः पाषण्ड-योधास्सुगति-पथ-रुधस्तर्क्क-शस्त्राभियुक्ताः (।*)
सम्पूर्ण्णो
2. धर्म्म-कोषः प्रकृति-रिपु-हृतः साधितो लोकभूत्यै ।[4]
शास्तुः शाक्यैक-व (ब)[5]न्धोर्ज्जयति चिरतरं तद्यशस्सार-तन्त्रम् ॥ 1
नैरोधों शुभ-भावना-
3. मनुसृतः संसार-संक्लेशजि-
न्मैत्रेयस्य करे विमुक्ति-वशिता यस्याद्भुता व्याकृता ।
निर्व्वाणावसरे च येन चरणौ दृष्टौ मुनेः
4. पावनौ ।[6]

पायाद्वः स मुनीन्द्र-शासन-धरः स्तुत्यो महाकाश्यपः ॥ 2
संयुक्तागमिनो विशुद्ध-रजसः सत्वा[7]नुकम्पोद्यताः
शिष्या
5. यस्य सकृद्विचेरुरमलां लङ्काचलोपत्यकाम् (।*)
तेभ्यः शील-गुणान्वितश्च शतशः शिष्य-प्रशिष्याः क्रमा-
ज्जातास्तुङ्ग-नरेन्द्र-
6. वंश-तिलकाः प्रोत्सृज्य राज्य-श्रियम् ॥ 3
ध्यानोदयाहित-हितः शुभाशुभ-विवेककृद्विहत-मोहः (।*)
सद्धर्म्मातुल-विभवो भवो व(ब)भूव
7. श्रमणस्ततः ॥ 4
राहुलाख्यश्च[8] तच्छिष्य उपसेनो यतिर्यतः (।*)
महानामा क्रमादेवमुपसेनस्ततो(ऽ*)परः ॥ 5
वात्सल्यं शरणा-
8. गतस्य सततं दीनस्य वैशेषिकं
व्यापत्सायक-सन्तति-क्षत-धृतेरार्त्तस्य चापत्यकं(कम्) ।
क्रूरस्याहित-कारिणः प्रविततं व(ब)न्धोर्यथा-
9. भावतः(त)
एवं सच्चरितोद्भवेन यशसा यस्याचितं भूतलं(लम्) ॥ 6
आम्रद्वीपाधिवासी पृथु-कुल-जलधिस्तस्य शिष्यो महीयान्
10. लङ्का-द्वीप-प्रसूतः पर-हित-निरतः सन्महानाम-नामा ।
तेनोच्चैर्व्वो(र्ब्बो)धिमण्डे शशि-कर-धवलः सर्व्वतो मण्डपेन ।[9]
11. कान्तः प्रासाद एष स्मर-व(ब)ल-जयिनः कारितो लोक-शास्तुः ॥ 7
व्यपगत-विषय-स्नेहो हत-तिमिर-दशः प्रदीपवदसङ्गः (।*)
12. कुशलेनानेन जनो वो(बो)धि-सुखमनुत्तरं भजताम् ॥ 8
यावद्ध्वान्तापहारी प्रवितत-किरणः सर्व्वतो भाति भास्वा-
न्यावत्पूर्णो(ऽ*)म्वु(म्बु)-
13. राशिः फणि-फण-कुटिलैरुर्म्मि-चक्रैस्समन्तात् (।*)
यावच्चेन्द्राधिवासो विविध-मणि-शिला-चारु-शृङ्गः सुमेरुः
शोभाऽढ्यम्(ढ्यं)
तावदेतद्भवनमुरु मुनेः शाश्वतत्वम्प्रयातु ॥ 9
14. सम्वत्[10] २००(+*) ६० (+*) ८ चैत्र शु-दि[11] ९ ॥

1. From the facsimile in *Corp. Ins. Ind.*, III.
2. Expressed by symbol.
3. Read *sattva*.

4. The mark of punctuation is unnecessary.
5. *Ba* and *va* are not distinguished in this inscription.
6. The mark of punctuation is unnecessary..
7. Read *sattv-ā°*.
8. Fleet's transcript has *°lākhyāś=cha*.
9. The mark of punctuation is unnecessary.
10. Read *Saṁvat*. Fleet reads the year as 269.
11. *Śu* is abbreviation of *śukla-paksha* and *di* of *divasa*.. Fleet reads 7 in place of 9.

No. 13— Bodhgayā Buddha Image Inscription of Vīryendra

Bodhgayā, Gaya District, Bihar.
T. Bloch, *Arch. Surv. Ind.*, A. R., 1908-09, pp. 157-58.

Language : Sanskrit
Script : Gauḍīya of c. 10th century A.D.
Metre : V. 1 श्लोक (अनुष्टुभ्)

Summary : The image was a pious gift of the *Sthavira* VĪRYENDRA who knew the *Vinaya* (*Vinaya-piṭaka*) and was an inmate of the SOMAPURA (Paharpur, Rajshahi District, Bangladesh) monastery, an inhabitant of SAMATAṬA and a follower of the Mahāyāna system.

TEXT[1]

(*near the right shoulder of the image*)

1. सिद्धम्[2]
अनेन शुभमार्ग्गेण प्रविष्टो लोकनायकः (।*)
2. अतश्च वो(बो)धिमार्ग्गो(ऽ*)यं
3. मोक्षमार्ग्ग-प्रकाशकः ।(॥)

(*on the base*)

1. श्री-सामतटिकः[3] प्रवर-म-
2. हायान-यायिनः श्रीमत्सोमपुर[4]-महा-
3. विहारीय-विनयवित्स्थविर-वीर्य्येन्द्रस्य (।*)
4. यदत्र पुण्यन्तद्भवत्वाचार्य्योपा-
5. [ध्याय]-मातापितृपूर्व्वङ्गमं कृत्वा सकल-
6. [सत्त्व-राशे]रनुत्तर-ज्ञानावाप्तय इति (॥*)

1. From Bloch's transcript. There are other inscriptions on the image; but they are repetitions of the usual formula *Ye dharmā*, etc. Bhandarkar does not take cognisance of this record in his List.
2. Symbol pronounced also as *Oṁ siddhiḥ* or *Siddhir=astu*.
3. Read °*taṭika-pravara*° or °*taṭikasya*.
4. Somapura has been identified with the excavated monastic site at Paharpur. *Sthavira* Vīryendra belonged to Samataṭa (South-East Bengal with its capital at Devaparvata on the Mainămatī hill near Comilla), but lived at the monastery of Somapura which was in Puṇḍravardhana or Varendra.

No. 14— Nālandā Stone Inscription of Vipulaśrīmitra

Nālandā, Patna District, Bihar
N. G. Majumdar, *Ep. Ind.*, XXI, pp. 98 f.

Language : Sanskrit
Script : Gauḍīya of c. 12th century A.D.
Metres : Vv. 1-2 शार्दूलविक्रीडित; V.3 मन्दाक्रान्ता; V.4 शिखरिणी; V.5 मालिनी; V.6 वसन्ततिलक; V.7 इन्द्रवज्रा; V.8 शार्दूलविक्रीडित; V. 9 उपजाति; V. 10. शार्दूलविक्रीडित; V.11 वसन्ततिलक; V. 12 शार्दूलविक्रीडित; V. 13. अनुष्टुभ् (श्लोक).

Summary : The inscription beginning with adoration to the BUDDHA, the DHARMA-CHAKRA and TĀRĀ, is a *praśasti* recording the benefactions of the monk VIPULAŚRĪMITRA, disciple of AŚOKAŚRĪMITRA, disciple of MAITRĪŚRĪMITRA, disciple of KARUṆĀŚRĪMITRA of SOMAPURA (Paharpur near Rajshahi in Bangladesh), who died when his abode was burnt by the VAṄGĀLA army. In connection with the benefactions, it mentions a casket for the *Prajñāpāramitā* manuscript, a temple of KHASARPAṆA, a monastery of the PITĀMAHA (Buddha) at CHOYAṆḌAKA, an image of the Jina (Buddha) DĪPAṄKARA at HARSHAPURA, and the temple of Tārā at Somapura. The record seems to have been composed by Kanakaśrī and engraved by Vaśishṭha.

TEXT[1]

1. सिद्धम्[2] नमो वु(बु)द्धाय[3] ॥
अस्तु स्वस्त्ययनाय वः स भगवान् श्रीधर्म्मचक्रः किय-
द्यन्नाम श्रुतवान्भवोऽस्थिर-वपुर्निर्जीवमुत्ताम्यति ।
तत्र श्रीघन-शासनामृत-रसैः संसिच्य
2. वौ(बौ)द्धे पदे
तं धेयादपुनर्भवं भगवती तारा जगत्तारिणी ॥ 1
श्रीमत्सोमपुरे[4] व(ब)भूव करुणाश्रीमित्र-नामा यतिः
कारुण्याद्गुणसंपदो हित-सुखाधानादपि प्राणि-
3. नां(नाम्) ।
यो वङ्गाल-व(ब)लैरुपेत्य दहन-क्षेपाज्ज्वलत्यालये
संलग्नश्चरणारविन्द-युगले वु(बु)द्धस्य यातो दिवं(वम्) ॥ 2

तस्याच्छिद्र-व्रत-परिचितस्योचित-स्मेर-कीर्त्तेः
शिष्योऽधृष्यः
4. सुकृत-घटितो वु(बु)द्धिमान् वु(बु)द्धिमत्सु ।
मैत्रीश्रीरित्युपरि विदितो मित्रवत्(वन्)मित्र-नामा
[स]त्व(त्त्व)स्यार्थे स्वमुदयमुपादित्सुरुत्साहवान् यः ।। 3
प्रशिष्यो (ऽ*) प्यन्विष्याश्रय-
5. मलभमानैरिव गुणै-
रधीतः संश्लिष्टो यतिरमल-शीलः समभवत् ।
अशोकश्रीमित्रो गुणसमुदये यस्य हृदये
सहस्रैरष्टाभिः प्रतिवसति संबु(बु)द्ध-जन-
6. नी ।। 4
तदनु च विपुलश्रीमित्र इत्याविरासी-
द्विपुल-विमल-कीर्त्तिः सज्जनानन्द-कन्दः ।
अमृतमयकलाभिः क्षालिताशेषदोषः
सततमुपचित-श्रीः शुक्ल-प-
7. क्षे शशीव ।। 5
श्रीमत्खसर्प्पण-महायतने प्रयत्नात्[5]
मञ्जूषया विहितया जननी जिनानां(नाम्) ।
येन भ्रमत्यविरतं प्रतिमाश्चतस्रः
सत्रेषु पर्व्वणि समर्प्पयति स्म
यश्च ।। 6
8. चोयण्डके यस्य पितामहस्य
विहारिकायां नवकर्म्म चित्रं(त्रम्) ।
हर्षाभिधाने च पुरे जिनस्य
दीपङ्करस्य प्रतिमां व्यधत्त ।। 7
अष्टौ यश्च महाभयानि जग-
9. तां निर्मूलमुन्मूलितुं
तारिण्या भवनं व्यधत्त सुकृती शाल-ह्रदालंकृतिं(तिम्) ।
श्रीमत्सोमपुरे चतुर्षु लयनेष्वन्तर्ब(र्ब)हिः-खण्डयो-
र्यश्चाधत्त नवीन-कर्म्म जगतां
10. नेत्रैक-विश्राम-भूः ।। 8
अदत्त हेमाभरणं विचित्रं
वु(बु)द्धाय वो(बो)धौ जनतां विधातुं(तुम्) ।

इत्यादि-पुण्य-क्रियया स कालं
वशीव दीर्घं नयति स्म तत्र ॥ 9
कृत्वा ते-
11. न विहारिका कृतवतालङ्कार-भूता भुवो
मित्रेभ्योऽद्भुत-वैजयन्त-जयिनी दत्तेयमुन्मीलति ।
यस्यां विस्मृतवान्निवास-रसिकः शास्ता त्रिलोकी-पतिः
12. शुद्धावास-निवासमर्थि-जनता-दुःसञ्चर-प्रान्तरं(रम्) ॥ 10
हर्त्तुं हरेः पदमिवाजनि तत्र तत्र
कीर्त्तिर्यया वसुमती कृतभूषणा भूः ।
तावच्चिरं जयति ने-
13. त्र-सुधा-स्रवन्ती
यावत्समृध्यति न मंजुरव-प्रतिज्ञा ॥ 11
तत्तत्कीर्त्ति-विधौ सुधानिधिरिवाम्भोधौ समुन्मीलितं
पुण्यं यद्भुवनान्तराल-तुलना-पात्रं पवित्रं म-
म ।
14. अस्तु प्रस्तुत-वस्तुवत्करतले पश्यन्ति विश्वं जिना
यत्रासीम-पदे स्थितास्त्रिजगतां तत्प्राप्तये तच्चिरं(रम्) ॥ 12
तर्क्क-शिल्प-प्रसङ्गे यौ धावतो जगतां हृदि ।
कनक-
श्रीर्वशिष्ठो[6] वा प्रशस्ति-व्यक्ति-कारकौ ॥ 13

1. From the facsimile in *Ep. Ind.*, XXI.
2. Symbol also pronounced as *siddhir=astu*, etc.
3. *Ba* and *va* are not distinguished in the record.
4. Somapura has been identified by K. N. Dikshit with Pāhārpur in the Rājshāhi District because the name of the place occurs in inscriptions as *Śrī-Somapure Śrī-Dharmmapāladeva-mahāvihāre*, etc., on certain terracotta sealings discovered at Pāhārpur. See *Arch. Surv. Ind.*, A. R., 1927-28, p. 105.
5. Read *prayatnān=ma°*'.
6. The name is often written as *Vasishtha*.

CHAPTER IV

THE PĀLAS OF BENGAL AND BIHAR AND THEIR VASSALS AND CONTEMPORARIES

(Excluding the Gurjara-Pratīhāras)

A—The Pālas

No. 15—Khālimpur Copper-plate Inscription of Dharmapāla (c. 775–812 A.D.), Regnal year 32

Khālimpur, near Gaur, Malda District, West Bengal.
Batavyal, *JASB*, LXIII, i, pp. 39 ff.; Kielhorn, *Ep. Ind.*, IV, pp. 243 ff.; A. K. Maitreya, *Gauḍalekhamālā*, pp. 1 ff.

Language : Sanskrit

Script : Siddhamātṛikā

Metres : V. 1 वसन्ततिलक; V.2 मालिनी; V. 3 श्लोक (अनुष्टुभ्); Vv. 4-5 शार्दूलविक्रीडित; Vv. 6-7 स्रग्धरा; V.8 मन्दाक्रान्ता; V.9 श्लोक (अनुष्टुभ्); V.10 शार्दूलविक्रीडित; V. 11-12 स्रग्धरा; V. 13 शार्दूलविक्रीडित; Vv. 14-16 श्लोक (अनुष्टुभ्); V. 17 पुष्पिताग्रा; V. 18 शिखरिणी; V. 19 श्लोक (अनुष्टुभ्).

Summary : DAYITAVISHṆU was the progenitor of a line of kings. His son was VAPYAṬA. His son GOPĀLA was made to take the hand of Fortune by the people in order to put an end to *Mātsyanyāya* (the practice of fishes, i.e. anarchy). His son, born of the queen DEDDADEVĪ, the daughter of the BHADRA king, was DHARMAPĀLA who installed the king of KĀNYAKUBJA (Chakrāyudha), the installation being approved by the BHOJA, MATSYA, MADRA, KURU, YADU, YAVANA, AVANTI, GANDHĀRA, and KĪRA kings and the coronation bath being conducted by the PAÑCHĀLA elders.—From the victorious camp at PĀṬALIPUTRA, *Paramasaugata Parameśvara Paramabhaṭṭāraka Mahārājādhirāja* DHARMAPĀLA granted, at the request of *Mahāsāmantādhipati* NĀRĀYAṆAVARMAN communicated to him through the *Dūtaka Yuvarāja* TRIBHUVANAPĀLA, the village of

GOPIPPALĪ in the ĀMRASHAṆḌIKĀ-MAṆḌALA belonging to the STHĀLĪKKAṬA-VISHAYA and the villages of KRAUÑCHAŚVABHRA, MĀḌHĀŚĀLMALĪ and PĀLITAKA in the MAHANTĀPRAKĀŚA-VISHAYA belonging to the VYĀGHRATAṬĪ-MAṆḌALA within the PUṆḌRAVARDHANA-BHUKTI, to the god NANNA-NĀRĀYAṆA's temple built by NĀRĀYAṆAVARMAN at ŚUBHASTHALĪ.—The grant was made together with *haṭṭikā* (market place) and *talapāṭaka* (adjacent land for maintenance), all localities and fines realisable from culprits for committing the ten offences. It was not to be interfered with and the donees were not to be molested. The order in repect of the grant was communicated to the residents of these villages as well as to the *Rājans, Rājānakas, Rājaputras, Rājāmātyas, Senāpatis Vishayapatis, Bhogapatis, Shashṭhādhikṛitas, Daṇḍaśaktis, Chaurodhharaṇikas, Dauḥasādhasādhanikas, Dūtas, Kholas, Gamāgamikas, Abhitvaramāṇa*, superintendents of elephants, horses, cows, she-buffaloes, goats and sheep, superintendents of boats, superintendents of the forces, *Tarikas, Śaulkikas, Gaulmikas, Taḍāyuktakas, Viniyuktakas* and other dependants of the king such as *Chāṭas* and *Bhaṭas, Jyeshṭhakāyasthas, Mahāmahattaras, Mahattaras, Dāśagrāmikas* and other district officers including the *Karaṇas* and also the cultivators.—The charter was engraved by TĀTAṬA, son of Subhaṭa and grandson of Bhogaṭa.—The DATE of the record is the 12th of Mārga (Mārgaśīrsha) in the king's 32ND REGNAL YEAR.

TEXT[1]

First Side

1. सिद्धम्[2] स्वस्ति (॥*)
सर्व्वज्ञतां श्रियमिव स्थिरमास्थितस्य
वज्रास-

2. नस्य व(ब)हु[3]-मार-कुलोपलम्भाः ।
देव्या महाकरुणया परिपा-

3. लितानि
रक्षन्तु वो दशव(ब)लानि दिशो जयन्ति ॥ 1
श्रिय इव सुभगा-

4. याः सम्भवो वारिराशि-

शशधर इव भासो विश्वमाह्लादयन्त्याः ।
प्रकृतिरवनिपानां सन्ततेरुत्तमाया
अ-
5. जनि दयितविष्णुः सर्व्व-विद्यावदातः ॥ 2
आसीदा सागरादुर्व्वीं गुर्व्वीभिः कीर्त्तिभिः कृती ।
मण्डयन्
6. खण्डितारातिः श्लाघ्यः श्री-वप्यटस्ततः ॥ 3
मात्स्य-न्यायमपोहितुं प्रकृतिभिर्लक्ष्म्याः करङग्राहितः
श्री-गोपा-
7. ल इति क्षितीश-शिरसां चूडामणिस्तत्सुतः ।
यस्यानुक्रियते सनातन-यशो-राशिर्दिशामाशये
श्वेतिम्ना य-
8. दि पौर्ण्णमास-रजनी ज्योत्स्नातिभार-श्रिया ॥ 4
शीतांशोरिव रोहिणी हुतभुजः स्वाहेव तेजोनिधेः
शर्वाणी-
9. व शिवस्य गुह्यकपतेर्भद्रेव भद्रात्मजा ।
पौलोमीव पुरन्दरस्य दयिता श्री-देद्देवीत्यभू-
द्देवी तस्य विनो-
10. द-भूर्मुर-रिपोर्लक्ष्मीरिव क्ष्मापतेः ॥ 5
ताभ्यां श्री-धर्म्मपालः समजनि सुजन-स्तूयमानावदानः
स्वामी भूमी-
11. पतीनामखिलवसुमती-मण्डलं शासदेकः (।*)
चत्वारस्तीर-मज्जत्करि-गण-चरण-न्यस्त-मुद्राः समुद्रा
यात्रां य-
12. स्य क्षमन्ते न भुवन-परिखा विश्वगाशा[4]-जिगीषोः ॥ 6
यस्मिन्नुद्दाम-लीला-चलित-व(ब)ल-भरे दिग्जयाय प्रवृत्ते
यान्त्या-
13. [म्वि]श्वम्भरायां[5] चलित-गिरि-तिरश्चीनतां तद्वशेन ।
भाराभुग्नावमज्जन्मणि-विधुर-शिरश्चक्र-साहायकार्थं
शेषे-
14. णोदस्त-दोष्णा त्वरिततरमधो(ऽ*)धस्तमेवानुयातं(तम्) ॥ 7
यत्प्रस्थाने प्रचलित-व(ब)लास्फालनादुल्ललद्धि-
र्धूली-पूरैः पिहि-

15. त-सकल-व्योमभिर्भूतधात्र्याः ।
सम्प्राप्तायाः परमतनुतां चक्रवालं फणानां
मग्नोन्मीलन्मणि-फणिपतेर्ला-
16. घवादुल्ललास ॥ 8
विरुद्ध-विषय-क्षोभादस्य कोपाग्निरौर्व्ववत् ।
अनिर्वृति[6] प्रजज्वाल चतुरम्भोधि-वारितः ॥ 9
17. ये(ऽ*)भूवन् पृथु-राम-राघव-नल-प्राया धरित्रीभुज-
स्तानेकत्र दिदृक्षुणेव निचितान् सर्वान् समम्वेधसा[7] ।
ध्व-
18. स्ताशेष-नरेन्द्र-मान-महिमा श्री-धर्म्मपालः कलौ
लोल-श्रीकरिणी-निव(ब)न्धन-महास्तम्भः समुत्तम्भितः ॥ 10
यासां
19. नासीर-धूली-धवल-दश-दिशां द्रागपश्यन्नियत्तां
धत्ते मान्धातृ-सैन्य-व्यतिकर-चकितो ध्यानतन्द्रीम्महेन्द्रः ।
20. तासामप्याहवेच्छा-पुलकित-वपुषाम्वाहिनीनाम्विधातुं[8]
साहाय्यं यस्य वा(बा)ह्वोर्निखिल-रिपुकुल-ध्वंसिनोर्ना-
21. वकाशः ॥ 11
भोजैर्मत्स्यैः स-मद्रैः कुरु-यदु-यवनावन्ति-गन्धार-कीरै-
र्भूपैर्व्यालोल-मौलि-प्रणति-परिणतैः
22. साधु सङ्गीर्यमाणः ।
हृष्यत्पञ्चाल-वृद्धोद्धृत-कनकमय-स्वाभिषेकोदकुम्भो
दत्तः श्री-कन्यकुब्ज(ब्ज)स्स-ललित-च-
23. लित-भ्रूलता-लक्ष्म येन ॥ 12
गोपैः सीम्नि वनेचरैर्वनभुवि ग्रामोपकण्ठे जनैः
क्रीडद्भि(:*) प्रतिचत्वरं शिशुगणैः
24. प्रत्यापण[म्म]ानपैः[9] ।
लीला-वेश्मनि पञ्जरोदर-शुकैरुद्गीतमात्मस्तवं
यस्याकर्ण्णयतस्त्रपा-विवलितानम्रं स-
25. दैवाननं(नम्) ॥ 13
स खलु भागीरथी-पथ-प्रवर्त्तमान-नानाविध-नौवाटक-सम्पादित-सेतुव-
(ब)न्ध-निहित-शैल-शि-
26. खर-श्रेणि-विभ्रमात्[10] निरतिशय-घन-घनाघन-घटा-श्यामायमानवासर-
लक्ष्मी-समारव्ध(ब्ध)-सन्तत-जलद-स-
27. मय-सन्देहात्[11] उदीचीनानेक-नरपति-प्राभृतीकृताप्रमेय-हयवाहिनी-

खरखुरोत्खात-धूली-धूसरित-दि-

28. गन्तरालात् परमेश्वर-सेवा-समायात-समस्त-जम्बूद्वीप-भूपालानन्त-पादात-भर-नवदवनेः पाटलिपु-

29. त्र- समावासित-श्रीमज्जयस्कन्धावारात् परमसौगतो महाराजाधिराज-श्री-गोपालदेव-पादानुध्यातः प-

30. रमेश्वरः परमभट्टारको महाराजाधिराजः श्रीमान् धर्म्मपालदेवः कुशली ॥ श्री-पुण्ड्रवर्द्धन-भु–

31. क्त्यन्तःपाति - व्याघ्रतटी - मण्डल-सम्व(म्ब)द्ध-महन्ताप्रकाश - विशये[12] क्रौञ्चश्वभ्र-नाम-ग्रामोऽस्य च सीमा पश्चि-

32. मेन गङ्गिनिका। उत्तरेण कादम्व(म्ब)री-देवकुलिका खर्ज्जूर-वृक्षश्च। पूर्व्वोत्तरेण राजपुत्र-देवट-कृतालिः । वी-

33. जपूरकङ्गत्वा प्रविष्टा। पूर्व्वेण विटकालिः खातकयानिका[ं] गत्वा प्रविष्टा । जम्वू(म्बू)यानिकामाक्रम्य जम्वू(म्बू)यानक[ं]

Second Side

34. गता। ततो नि(:*)सृत्य पुण्याराम–विलार्द्ध-श्रोतिका[13] । ततो (ऽ*)पि नि(:*)सृत्य न-

35. लचर्म्मटोत्तरान्तं गता नलचर्म्मटात्[14] दक्षिणेन नामुण्डिकापि [हे]–

36. [सदूम्मि?]कायां। खण्डमुण्डमुखं खण्डमुखा(द्*) वेदसविल्विका वेद(स*)विल्विकातो रोहितवाटिः पिण्डारविटि-जोटिका सीमा ।

37. उ[त्त]र-जोटस्य दक्षिणान्तं ग्रामविल्वस्य च दक्षिणान्तं[15] । देविका-सीमा विटि । धर्म्मायो-जोटिका । एवम्माडाशाम्मली-ना-

38. म-ग्रामः (।*)अस्य चोत्तरेण गङ्गिनिका सीमा ततः पूर्व्वेणार्द्ध-श्रो(स्रो)-तिकया आम्रयानकोलर्द्धयानिकङ्गतः[15] त-

39. तो(ऽ*)पि दक्षिणेन कालिकाश्वभ्रः। अतो(ऽ*)पि नि(:*)सृत्य श्रीफल[भिषु]कं यावत्पश्चिमेन ततो(ऽ*)पि विल्वङ्गोर्द्ध-श्रो(स्रो)ति-

40. कया गङ्गिनिकां प्रविष्टा(ष्टः) । पालिनके सीमा दक्षिणेन काणाद्वीपिका। पूर्व्वेण कोण्ठिया-स्रोतः(।*) उत्तरेण

41. गङ्गिनिका। पश्चिमेन जेनन्दायिका। एतद्ग्राम-संपारीण-परकर्म्मकृ-[17] द्वीपः । स्थालीक्कट-विषय-

42. सम्व(म्ब)द्धाम्रषण्डिका-मण्डलान्तःपाति-गोपिप्पलीग्रामस्य सीमाः ।

पूर्व्वेण[18] उद्रग्राम-मण्डल-पश्चिम-सीमा । दक्षि-

43. णेन जोलकः (।*) पश्चिमेन वेसानिकाख्या खाटिका । उत्तरेणोद्रग्राम-
मण्डल-सीमा-व्यवस्थितो गोमार्गः । एषु च-

44. तुरुषु[19] ग्रामेषु समुपगतान् सर्व्वानेव राज-राजनक-राजपुत्र-राजामात्य-
सेनापति-विषयपति-भोगपति-षष्ठाधि-

45. कृत-दण्डशक्ति-दाण्डपाशिक-चौरोद्धरणिक-दौस्साधसाधनिक-दूत - खोल-
गमागमिकाभित्वरमाण-हस्त्यश्वगोमहिष्यजा-

46. विकाध्यक्ष - [नौ]काध्यक्ष-व (ब) लाध्यक्ष - तरिक - शौल्किक - गौल्मिक-
तदायुक्तक-विनियुक्तकादि-राजपादोपजीविनो (ऽ*) न्यांश्चाकीर्त्ति-

47. तान्[20] चाट-भट-जातीयान् यथाकालाध्यासिनो ज्येष्ठकायस्थ-महामहत्तर-
महत्तर-दाशग्रामिकादि-विषय-व्यवहारिणः

48. स-करणान् प्रतिवासिनः क्षेत्रकरांश्च व्रा (ब्रा) ह्मण-मानना-पूर्व्वकं
यथार्हम्मानयति वो (बो) धयति समाज्ञापयति च । मतमस्तु

49. भवतां (ताम्) (।*) महासामन्ताधिपति-श्री-नारायणवर्म्मणा दूतक-
युवराज-श्री-त्रिभुवनपाल-मुखेन वयमेवम्विज्ञापिताः[21] । यथाऽस्मा-

50. भिर्म्मातापित्रोरात्मनश्च पुण्याभिवृद्धये शुभस्थल्यान् देवकुलङ्कारित-
त्तत्र[22] प्रतिष्ठापित-भगवन्नन्न-नारायण-भट्टारकाय तत्प्र-

51. तिपालक-लाटद्विज-देवार्च्चकादि-पादमूल-समेताय पूजोपस्थानादि-कर्म्मणे
चतुरो ग्रामान्[23] अत्रत्य-हट्टिका-तलपाटक-

52. समेतान्ददातु देव इति । ततोऽस्माभिस्तदीय-विज्ञप्त्या एते
उपरिलिखितकाश्चत्वारो ग्रामास्तलपाटक-हट्टिका-समेताः स्व-

53. सीमा-पर्यन्ताः सोद्देशाः सदशापचाराः[24] अकिञ्चित्प्रग्राह्याः परिहृत-
सर्व्वपीडाः भूमिच्छिद्र-न्यायेन चन्द्रार्क-क्षिति-समकालं

54. तथैव प्रतिष्ठापिताः[26]। यतो भवद्भिस्सर्व्वैरेव भूमेर्द्दान-फल-गौरवादपहरणे
च महानरक-पातादि-भयाद्दानमिदमनुमो-

55. द्य परिपालनीयं (यम्) । प्रतिवासिभिः क्षेत्रकरैश्चाज्ञा-श्रवण-विधेयैर्भूत्वा
समुचित-कर-पिण्डकादि-सर्व्व-प्रत्यायोपनयः कार्य

56. इति ॥

व (ब) हुभिर्व्वसुधा दत्ता राजभिस्सगरादिभिः (।*)
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं (लम्) ।(।*) 14
षष्टिम्वर्ष[27]सहस्राणि स्वर्गे मो-

57. दति भूमिदः (।*)

आक्षेप्ता चानुमन्ता च तान्येव नरके वसेत् ॥ 15
स्वदत्ताम्परदत्ताम्वा[28] यो हरेत वसुन्धराम् (।*)
स विष्ठायाङ्कृमिर्भूत्वा पितृ-
58. भिस्सह पच्यते ॥ 16
इति कमलदलाम्वु (म्बु) -विन्दु-लोलां श्रियमनुचिन्त्य मनुष्य-जीवितञ्च (।*)
सकलमिदमुदाहृतञ्च वु (बु) [द्]ध्वा न हि पुरु-
59. षैः पर-कीर्त्तयो विलोप्या[:] ॥ 17
तडित्तुल्या लक्ष्मी[29] तनुरपि च दीपानल-समा ।[30]
भवो दुःखैकान्तः परकृतिमकीर्त्ति (:*) क्षपयताम् (।*)
यशा-[31]
60. न्स्याचन्द्रार्क्कं (ं*) नियतमवतामत्त्र च नृपाः
करिष्यन्ते वु (बु) द्ध्वा यदभिरुचितं किम्प्रवचनैः ॥ 18
अभिवर्द्धमान-विजयराज्ये
61. सम्वत्[32] ३२ मार्ग-दिनानि[33] १२ ॥[34]
62. श्री-भोगटस्य पौत्रेण श्रीमत्सुभट-सूनुना ।
श्रीमता तातटेनेदं[35] उत्कीर्ण्णं गुणशालिना ॥ 19

1. From the facsimile published in *JASB*.
2. Expressed by symbol.
3. *Va* and *ba* have not been distinguished in the record.
4. Read *vishvag-āśā.*
5. Read *yāntyāṁ vi°.*
6. Kielhorn suggests the correction *anivṛitti.*
7. Read *samaṁ Vedhasā.*
8. Read *vapushāṁ vāhinīnāṁ vidhātuṁ.*
9. Kielhorn suggests the correction *°navaiḥ.*
10. Better read *vibhramān=nira°*
11. Better read *sandehād=udī°.*
12. Read *vishaye.*
13. Read *srotikā.*
14. Better read *°chammaṭād=dakshiṇena.*
15. Not *dakshiṇ-āntaḥ grāma-vilvasya cha dakshiṇ-āntaḥ*
16. Read *°srotikay=Āmrayāna ......kaṅ=gatā.*
17. Kielhorn suggests the correction *°kṛiddvīpaḥ.*
18. Better read *purvveṇ=Odra°.*
19. Read *°turshu.*
20. Better read *°tāṁś=chāṭa°.*
21. Read *°m=evaṁ vijñā°.*
22. Read *°ṅ=kāritan=tatra.*
23. Kielhorn unnecessarily suggests *grāmān=ativatya.*

24. Better °*pachārā*. Kielhorn reads °*pachārāḥ*; Maitreya follows Kielhorn, but thinks that Kielhorn may be wrong. *Sa-daś-āpachārā* is the reading, e.g., in the Bangarh plate of Mahīpāla.

26. Kielhorn thinks it to be an error for *pratipāditāḥ*.

27. Read *shashṭiṁ varshaṁ*.

28. Read *dattāṁ vā*.

29. Read *lakshmīs=tanu*°.

30. The sign of punctuation is superfluous.

31. Read *yaśāṁsy=ā*°.

32. Read *Saṁvat*.

33. Better read *dine*.

34. After this, some letters may have been engraved: but they are quite illegible now.

35. Read °*n=edam=utkīrṇṇaṁ*.

No. 16—Nālandā Copper-plate Inscription of Devapāla (c. 812-50 A.D.), Regnal year 35

Nālandā, Patna District, Bihar
H. Sastri, *Ep. Ind.*, XVII, pp. 318 ff.
Language : Sanskrit
Script : Siddhamātṛikā
Metres: Vv. 1, 7-8, 13-14, 30-33 शार्दूलविक्रीडित; Vv.2,26 प्रहर्षिणी; V.3 वंशस्थ; V.4 उपजाति; V.5 इन्द्रवज्रा; V. 6 औपच्छन्दसिक; Vv. 9, 11, 22-23 आर्या; V. 10, हरिणी; Vv. 12, 15 रथोद्धता; Vv.16-19, 29 श्लोक (अनुष्टुभ्); Vv. 20, 24-25, 27-28 वसन्ततिलक; V.21. पुष्पिताग्रा; V. 34. स्रग्धरा.

Summary : For genealogy, see the Khālimpur plate of Dharmapāla.—The army of DHARMAPĀLA while uprooting all the wicked kings and subduing this world, bathed at KEDĀRA in the north and GAṄGĀSĀGARA-SAṄGAMA in the east and performed religious rites at GOKARṆA and other holy places in the south and west. Dharmapāla's son, born of the queen RAṆṆĀDEVĪ, daughter of RĀSHṬRAKŪṬA PRABALA, was DEVAPĀLA. He triumphantly marched over the VINDHYAS and from there to the KAMBOJA country and ruled the whole region from the HIMALAYAS to RĀMA'S BRIDGE and from the abode of Varuṇa to that of Lakshmī (i.e. from the Eastern to the Western sea, i.e. from the Bay of Bengal to the Arabian Sea).— There was VĪRAVAIRIMATHANA who was a king of YAVABHŪMI and the ornament of the ŚAILENDRA dynasty. His son SAMARĀGRAVĪRA married TĀRĀ, daughter of VARMASETU of the lunar race. Their son BĀLAPUTRADEVA, the king of SUVARṆADVĪPA (Sumatra), built a Buddhist monastery at NĀLANDĀ.—At Bālaputradeva's request DEVAPĀLA granted NANDIVANĀKA and MAṆIVĀṬAKA in the AJAPURA-NAYA belonging to the RĀJAGṚIHA-VISHAYA within the ŚRĪNAGARA-BHUKTI, NAṬIKĀ in the PILIPIṆKĀ-NAYA, HASTIGRĀMA in the ACHALĀ-NAYA and PĀLĀMAKA in the KUMUDASŪTRA-VĪTHĪ within the GAYĀ-VISHAYA, together with their lands as undivided plots, with their grass and pasture lands, with their

grounds, spaces, mango and *Madhūka* trees, with their waters and dry lands, *uparikara*, *daśāparādha* and *chauroddharaṇa* and with all taxes due to the king's family or court for meeting the expenditure in connection with the blessed Lord Buddha, for offerings, oblations, shelter, garments, alms, beds, requisites for the sick like medicine, etc., of the assembly of the venerable *Bhikshus*, for writing the *Dharmaratnas* and for the upkeep and repair of the monastery built by the king of Suvarṇadvīpa at Nālandā. The entry of the *Chāṭas* and *Bhaṭas* was prohibited in the gift villages which were to be enjoyed free from all troubles. The residents of these villages were asked to pay the due revenue such as *bhāga-bhoga-kara* (taxes in the shape of the share of crops and the periodical offerings from subjects), *hiraṇya* (tax in cash), etc.—The *Rājan*, *Rāṇaka*, *Rājaputra*, *Rājāmātya*, *Mahākārtākṛitika*, *Mahādaṇḍanāyaka*, *Mahāpratīhāra*, *Mahāsāmanta*, *Mahādauḥsādhasādhanika*, *Mahākumārāmātya*, *Pramātṛi*, *Śarabhaṅga*, *Rājasthānīya*, *Uparika*, *Vishayapati*, *Dāśāparādhika*, *Chauroddharaṇika*, *Dāṇḍapāśika*, *Śaulkika*, *Gaulmika*, *Kshetrapāla*, *Koṭapāla*, *Khaṇḍaraksha*, *Tadāyuktaka*, *Viniyuktaka*, *Hastyaśvoshṭra-naubala-vyāpṛitaka*, *Kiśora-vaḍavā-gomahishy-adhikṛita*, *Dūtapraishaṇika*, *Gamāgamika*, *Abhitvaramāṇaka*, *Tarika*, *Tarapatika*, the Gauḍas, Mālavas, Khaśas, Kulikas, Karṇāṭas, Hūṇas, *Chāṭas*, *Bhaṭas*, the servants and others and the residents of the localities headed by the Brāhmaṇas, the village elders, the householders, the Medas, Andhrakas and Chaṇḍālas were informed of the grant. The Gauḍas and other peoples may have been serving the Pāla king as mercenary soldiers.—BALAVARMAN, the ruler of the Vyāghrataṭī-maṇḍala, acted as the *Dūtaka* of the grant which was issued in the Regnal year 35 on the 21st day of Kārttika.

TEXT[1]

Seal

श्री-देवपाल देवस्य (॥*)

First Side

1. सिद्धम्[2] स्वस्ति

मिद्धार्थस्य परार्थ-सुस्थित-मतेस्सन्मार्गम[भ्य]-

2. स्यत-

स्सिद्धिस्सिद्धिमनुत्तरां भगवतस्तस्य प्रजासु क्रिया-
3. त् (।*)
यस्त्रैधातुक-सत्व[3]-सिद्धि-पदवीरत्युग्र-वीर्योदया-
4. ज्जित्वा निर्वृतिमाससाद सुगतस्सर्वार्थ-भूमीश्वरः (॥*) 1
सौभाग्यन्दध॰
5. दतुलं श्रियस्सपत्न्या
गोपालः पतिरभवद्वसुन्धरायाः (।*)
दृ-
6. ष्टान्ते सति कृतिनां सुराज्ञि यस्मिन्
श्रद्धेयाः पृथु-सगरादयो(ऽ*)प्यभूवन् (॥*) 2
विजित्य येना जलधेर्व्वसुन्धरा-
म्विमोचिता[4]
7. मोघ-परिग्रहा इति ।
सवाष्पमुद्वाष्पविलोचनान्पुन-
र्वनेषु [5]व(ब)न्धून्ददृशुर्म्मतङ्गजाः ॥ 3
चलत्स्वनन्तेषु व(ब)लेषु यस्य
विश्वम्भरा-
8. या निचितं रजोभिः ॥[6]
पादप्रचार-क्षममन्तरिक्ष-
म्वि[7]हङ्गमानां सुचिरम्व(म्ब)भूव ॥ 4
शास्त्रार्थभाजा चलतो(ऽ*)नुशास्य
वर्ण्णान्प्रतिष्ठापय-
9. ता स्वधर्म्मे(।*)
श्री-धर्म्मपालेन सुतेन सो(ऽ*)भू-
त्स्वर्ग-स्थितानामनृणः पितॄणां(णाम्) ॥ 5
अचलैरिव जङ्गमैर्यदीयैर्विचलद्भिर्द्विरदैः कदर्थ्यमाना ।
10. निरुपप्लवमम्व(म्ब)रं प्रपेदे शरणं रेणुनिभेन भूतधात्री ॥ 6
केदारे विधिनोपयुक्त-पयसां गंगा-समेते(ऽ*)म्वु(म्बु)धौ ।[8]
गोकर्णादिषू चाप्यनुष्ठि-
11. तवतान्तीर्थेषु धर्म्याः क्रियाः (।*)
भृत्यानां सुखमेव यस्य सकलानुद्धृत्य दुष्टानिमा(माँ)-
ल्लोकान्साधयतो(ऽ*)नुषङ्ग-जनिता सिद्धिः परत्रा-
12. प्यभूत् ॥ 7
तैस्तैर्द्दिग्विजयावसान-समये संप्रेषितानां परैः

सत्कारैरपनीय खेदमखिलं स्वां स्वां गतानां भुवं(वम्) (।*)
कृत्यं भावयतां
13. यदीयमुचितं प्रीत्या नृपाणामभूत्
सोत्कण्ठं हृदयं दिवश्च्युतवतां जातिस्मराणामिव ॥ 8
श्री-परव(ब)लस्य दुहितुः क्षितिपतिना रा-
14. ष्ट्रकूट-तिलकस्य
रण्णादेव्याः पाणिर्जगृहे गृहमेधिना तेन ॥ 9
धृततनुरियं लक्ष्मीः साक्षात्क्षितिर्नु शरीरिणी ।[9]
किमवनिपतेः कीर्त्तिर्मू-
15. र्त्तथवा गृहदेवता (।*)
इति विदधती शुच्याचा(रा*) वितर्कवतीः प्रजाः
प्रकृति-गुरुभिर्या शुद्धान्तङ्गुणैरकरोदधः ॥ 10
श्लाघ्या प्रतिव्रतासौ[10] मु-
16. क्तारत्नं समुद्र-शुक्तिरिव ।
श्री-देवपालदेवम्प्रसन्न-वक्त्रं सुतमसूत ॥ 11
निर्म्मलो मनसि वाचि संयतः ।[11]
काय-कर्म्मनि[12] च यः स्थितः शुचौ (।*)
17. राज्यमाप निरुपप्लवम्पितु-
र्वो(र्बो)धिसत्व[13] इव सौगतं पदं(दम्) ॥ 12
श्राम्यद्भिर्विजयक्रमेण ।[14] करिभिस्तामेव विन्ध्याटवी-
मुद्दाम-प्लवमान-वाष्प-पय-
18. [सो] दृष्टाः पुनर्व(र्ब)न्धवः(वः) (।*)
कम्वो(म्बो)जेषु च यस्य वाजि-यु(व*)भिर्ध्वस्तान्य-राजौजसो
हेषा-मिश्रित-हारि-हेषितरवाः कान्ताश्चिरं प्रीणिताः ॥ 13
यः पूर्वं व(ब)लि-
19. ना कृतः कृतयुगे येनागमद्भार्गव-
स्त्रेतायां प्रहृतः प्रिय-प्रणयिना कर्ण्णेन यो द्वापरे ।
विच्छिन्नः कलिना शकद्विषि गते कालेन लोकान्त-
20. रं ।[14]
येन त्यागपथस्स हि पुनर्विस्पष्टमुन्मीलितः ॥ 14
आ गङ्गागम-महितात्सपत्न-शून्या-
मा सेतु[15] प्रथित-दशास्य-केतु-कीर्त्तेः (।*)
उर्व्वीमा वरुण-
21. निकेतनाच्च सिन्धो-

रा लक्ष्मीकुलभवनाच्च यो वु(बु)भोज ॥ 15
स खलु भागीरथी-पथ-प्रवर्त्तमान-नानाविध-नौ- वाटक-संपादित-सेतुव(ब)न्ध-निहित-[शै]-

22. ल-शिखर-श्रेणि-विभ्रमात्[16] निरतिशय-घनघनाघनघट्टा-[17] श्यामायमान-वासरलक्ष्मी-समारव्ध(ब्ध)-संतत-जलद-समय-सन्देहात्[18] उदीचीनानेक-

23. नरपति-प्राभृतीकृताप्रमेय-हयवाहिनी-खर - खुरोत्खात-धूली -धूसरितदिगन्तरालात् परमेश्वर-सेवा-समायाताशेष-जंवू(बू)द्वी

24. प-भूपाल-पादात-भर-नमदवनेः श्री-मुद्गगिरि-समावासित-[19] श्रीमज्जय-स्कन्धावारात् परमसौगत-परमेश्वर-परमभटारक-[20]म-

25. हाराजाधिराज-श्री-धर्म्मपालदेव-पादानुध्यातः परमसौगतः परमेश्वरः परमभटारको[20] महाराजाधिराजः श्रीमान्देवपा-

26. लदेवः कुशली[21] । श्रीनगर-भुक्तौ राजगृह-विषयान्तःपाति-[22] अजपुर-नय[23]-प्रतिव(ब)द्ध-स्वस(म्ब)द्धाविच्छिन्न-तलोपेत ।[24] नन्दिवनाक । मणि-

27. वाटक । पिलिपिण्का-नय- प्रतिव(ब)द्ध-नटिका । अचला-नय-प्रतिव(ब)द्ध-ह[स्ति]ग्राम । गया-विषयान्तःपाति-कुमुदसूत्र-वीथी-प्रतिव(ब)द्ध-नालाम-

28. कग्रामेषु ।[25] समुपगतां[26] सर्व्वानेव राज-राणक । राजपुत्र । राजामात्य । महाकार्त्ताकृतिक । महादण्डनायक । महाप्रतीहार । महा-

29. सामन्त । महादौःसाधसाधनिक । महाकुमारा(मा*)त्य (।*) प्रमातृ । शरभङ्ग (।*) राजस्थानी ।[27] योपरिक । विषयपति (।*) दाशापराधिक । चौरोद्धर-

30. णिक । दाण्डिक (।*) दाण्डपाशिक (।*) शौल्किक (।*) [गौ]ल्मिक । क्षेत्रपाल (।*) कोटपाल । खण्डरक्ष(।*) तदायुक्तक । विनियुक्तक । हस्त्यश्वोष्ट्र-नौव(ब)लव्यापृ-

31. तक(।*)किशोर-वडवा-गो-महिष्यधिकृत । दूत - प्रै[ष]णिक । गमागमिक । अभित्वरमाणक । तरिक । तरपतिक । गौड[28]-मालव-खश-कुलिक । कर्णा-

32. ट-[हू]ण । चाट-भ(ट*)-सेवकादीनन्यांश्चाकीर्त्तितान् स्वपाद-पद्मोपजीविनः प्रतिवासिनश्च व्रा(ब्रा)ह्मणोत्तरान् महत्तम- कुटुम्वि[29]-पुरोग-मेदान्ध्र-

33. क । चण्डाल-पर्यन्तान् समाज्ञापयति विदितमस्तु भवतां[30] यथोपरि-लिखित-स्वसम्व(म्ब)द्धाविच्छिन्न-तलोपेत-नन्दिवनाकग्राम । मणिवाट-

34. कग्राम । नटिकाग्राम । हस्तिग्राम । पालामकग्रामाः स्वसीमा-
तृणयूति-गोचर-पर्यन्ताः स-तलाः सोद्देशाः साम्रमधूकाः स-जल-स्थ-
35. लाः सोपरिकराः स-दशापराधाः स-चौरोद्धरणाः परिहृत–सर्व्व-पीडाः[31]
अ-चाट-भट-प्रवेशा अ-किंचित्प्रग्रा[ह्य][32] राजकुलीय-
36. समस्त-प्रत्याय-समेता भूमिच्छिद्रन्यायेनाचन्द्रार्क्क-क्षिति-समकालं पूर्वदत्त-
भुक्त-भुज्यमान-देव-व्र (ब्र) ह्म-देय-वर्ज्जिताः मया
37. मातापित्रोरात्मन[श्च] पुण्य-यशोभिवृद्धये ॥[33] सुव[र्ण्ण]द्वीपाधिप-
महाराज-श्री-वा (बा) लपुत्रदेवेन दूतक-मुखेन वयम्वि[34]ज्ञापिताः यथा मया
38. श्रीनालन्दायाम्विहारः[35] कारितस्तत्र भगवतो वु (बु) द्ध-भट्टारकस्य
प्रज्ञापारमितादि-सकल-धर्म्म-नेत्रीस्थानस्यायार्थे तांत्र-[36]
39. क-वोधिसत्व-[37] गणस्याष्टमहापुरुषपुद्गलस्य चातुर्द्दिशार्य-भिक्षु-सङ्घस्य
व (ब) लि-चरु-सत्र (त्त्र) -चीवर-पिण्डपात-शयनासनग्लान-प्रत्यय-भै-
40. षजाद्यर्थं धर्मरत्नस्य लेखनाद्यर्थं विहारस्य च खण्ड-स्फुटित- समाधानार्थं
शासनीकृत्य प्रतिपादित (ा*) : (।*) यतो भवद्भि सर्व्वैरेव
41. भूमेर्द्दान-पाल (न*) -गौरवादपहरणे च महानरक–पातादि-भयाद्दानमिद-
मभ्यनुमोद्य पालनीयं प्रतिवासिभिरप्याज्ञा-श्र-
42. वण-विधेयैर्भूत्वा यथाकालं समुचित-भाग-भोग-कर-हिरण्यादि-
प्रत्यायोपनयः कार्य इति ॥ सम्वत्[38] ३५ क (ा*) र्त्तिक-दिने २१ (॥*)

Second Side

43. तथा च धर्मानुशन्सन[39]-श्लोकाः (।*)
व (ब) हुभिर्वसुधा दत्ता राजभिः
44. सगरादिभिः (।*)
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं (लम्) ॥ 16
45. स्व-दत्तां पर-दत्ताम्वा[40] [यो] ह[रे]त वसुन्धरां (राम्) ।
स विष्ठायां कृमिर्भूत्त्वा पितृभिः
46. सह पच्यते ॥ 17
षष्टिम्वर्ष[41]-सह[स्रा]णि स्वर्गे मोदति भूमिदः ।
आक्षेप्ता चानुमन्ता च तान्येव
47. नरके वसेत् ॥ 18
अन्य-दत्ता[ं] द्विजातिभ्यो यत्नाद्रक्ष युधिष्ठिर ।
मंहीं[42] मं (म) हीभृतां[43] श्रेष्ठ दा-
48. नाच्छ्रेयो (ऽ*) नुपालनं (नम्) ॥ 19
अस्मत्कुल-क्रममुदारमुदा[ह]रद्भि-
रन्यैश्च दानमिदमभ्यनुमोदनीयं (यम्) ।

लक्ष्म्यास्तडित्सलिल-वुद्ब(बुद्ब)द-च-
49. ञ्चलाया
दानं फलं पर-यशः–परिपालनं च ॥ 20
इति कमल-दलाम्वु(म्बु)-विन्दु-लोलां
श्रियमनुचिन्त्य मनुष्यजीवितं च (।*)
सकलमि-
50. दमुदाहृतं च वुध्वा(बुद्ध्वा)
नहि पुरुषैः परकीर्तयो विलोप्याः ॥ 21
दक्षिण-भुज इव राज्ञः पर-व(ब)ल-दलने सहाय-निरपेक्षः(।*)
51. दूत्यं श्री-व(ब)लवर्म्मा विदधे धर्म्माधिकारेऽस्मिन् ॥ 22
अस्मिन् धर्मारम्भे दूत्यं श्री-देवपालदेवस्य ।
विदधे श्री-व(ब)लवर्म्मा व्याघ्रतटी–मण्डलाधिपतिः ॥ 23
52. आसीदशेष-नरपाल-विलोल-मौलि-
माला-मणि-द्युति-विवो(बो)धित-पादपद्मः ।
शैलेन्द्र-वंश-तिलको यवभूमिपालः
श्री-वीरवैरिमथना-
53. नुगताभिधानः ॥ 24
हर्म्यस्थलेषु कुमुदेषु मृणालिनीषु
शङ्खेन्दु-कुन्द-तुहिनेषु पदन्दधाना ।
निःशेष-दिङ्मुख-निरन्तर-लव्ध(ब्ध)गीतिः
54. मूर्त्तेव यस्य भुवनानि जगाम कीर्त्तिः ॥ 25
भ्रूभङ्गे भवति नृपा(प)स्य यस्य कोपा-
न्निर्भिन्नाः सह हृदयैर्द्विषां श्रियो(ऽ*)पि ।
वक्राणामि–
55. ह परोपघात-दक्षा
जायन्ते जगति भृष(श)ङ्गति-प्रकाराः ॥ 26
तस्याभवन्नय-पराक्रम-शील-शाली
राजेन्द्र-मौलि-शत-दुर्ल्ललिताङ्घ्रि-
56. युग्मः ।
सूनुर्युधिष्ठिर-पराशर-भीमसेन-
कर्ण्णार्ज्जुनार्ज्जित-यशाः समराग्रवीरः[44] ।(।*) 27
उद्भूतमम्व(म्ब)रतला[द्यु]धि सञ्चरन्त्या
यत्सेनयावनि-रजः-प-
57. टलं पटीयं(दोत्थम्) ।

कर्ण्णानिलेन करिणां शनकम्वि(कं वि)तीर्ण्ण-
गण्डस्थली मदजलै श्रमयाम्व(म्ब)भूव ।(।*) 28
श्र-कृष्ण-पक्षमेवेदमभूद्भुवन-मण्डलं(लम्) ।
58. कुलन्दैत्याधिपस्येव यद्यशोभिरनारतम् ॥ 29
पौलोमीव सुराधिपस्य विदिता सङ्कल्पयोनेरिव
पृ(प्री)तिः शैलसुतेव मन्मथरि-
59. पोर्ल्लक्ष्मीर्मुरारेरिव ।
राज्ञः सोमकुलान्वयस्य महतः श्री-वर्म्मसेतोः[45] सुता
तस्याभूदवनीभुजोऽग्रमहिषी तारेव ताराह्वया ॥ 30
माया-
60. यामिव कामदेव-विजयी शुद्धोदनस्यात्मजः
स्कन्दो नन्दित-देववृन्द-हृदयः शम्भोरुमायामिव ।
तस्यान्तस्य नरेन्द्रवृन्द-विनमत्पादारवि-
61. न्दासनः
सर्व्वोर्व्वीपति-गर्व्व-खर्व्वणचणः श्रीवा(बा)लपुत्रोऽभवत् ॥ 31
नालन्दागुण-वृन्द-लुव्ध(ब्ध)-मनसा भक्त्या च शौद्धोदने-
र्वुध्वा(र्बुद्ध्वा) शैलसरित्तरङ्ग-तरलां
62. लक्ष्मीमिमां क्षोभनां(णाम्) ।
यस्तेनोन्नत-सौधधाम-धवलः सङ्घार्थमित्त्रश्रिया
नानासद्गुण-भिक्षुसङ्घ-वसतिस्तस्याम्वि(स्यां वि)हारः कृतः ॥ 32
भक्त्या
63. तत्र समस्तशत्रुवनिता-वैधव्य-दीक्षागुरुं
कृत्वा शासनमाहितादरतया सम्प्रार्थ्य दूतैरसौ ।
ग्रामान् पञ्च विपञ्चितोपरि-यथोद्देशा-
64. निमानात्मनः
पित्रो[र्लो]क-हितोदयाय च ददौ श्री-देवपालं नृपं(पम्) ॥ 33
यावत्सिन्धोः प्रव(ब)न्धः पृथुल-हर-जटा-क्षोभिताङ्गा च गङ्गा
गुर्व्वी
65. धत्ते फणीन्द्रः प्रतिदिनमचलो हेलया यावदुर्व्वीं(र्व्वीम्) ।
यावच्चास्तोदयाद्री रवि-तुरग-खुरोद्घृष्टचूडामणी स्त-
स्तावत्सत्कीर्त्तिरेषा प्रभव–
66. तु जगताम्स(तां स)त्क्रिया रोपयन्ती ॥ 34

1. From the facsimile in *Ep. Ind.*
2. Expressed by symbol.
3. Read *sattva.*

4. Read *vasundharāṁ vimochitā.*

5. *Ba* has, as usual in the age and area in question, been written by the sign for *va* here as well as in other places in the inscription.

6. Only one *daṇḍa* was required.

7. Read °*rikshaṁ viha*°.

8. The *daṇḍa* is redundant.

9. The *daṇḍa* is unnecessary.

10. Read *pati.*°

11. The *daṇḍa* is redundant.

12. Read *karmmaṇi.*

13. Read °*sattva.*

14. The *daṇḍa* is unnecessary.

15. Read *setoḥ.*

16. *Sandhi* has been avoided. It is optional in prose composition.

17. Read *ghaṭā.*

18. *Sandhi*, which is not compulsory in prose composition, has been ignored.

19. Sastri's transcript has *samāvāsi* for *samāvāsita.*

20. Read *bhaṭṭāra*°.

21. In the following section, *daṇḍa* has been used as a hyphen or a comma.

22. Read °*pāty=Ajapura.*

23. *Naya* was 'sub-division of a district', used rarely in inscriptions.

24. The *daṇḍa* is redundant.

25. The *daṇḍa* is superfluous.

26. Read *samupāgatān.* Sastri's transcript has °*gatām.*

27. The *daṇḍa* is unnecessary.

28. Sastri reads *Odra* (*ḍra*).

29. Read *kutumbi*°.

30. Read *bhavatām* /.

31. Sastri's transcript wrongly puts *pīḍāḥ* in brackets.

32. Read *pragrāhyā.*

33. The concluding part of the sentence is to be found in line 40.

34. Read *vayaṁ vijñā*°.

35. Read *Nālandāyāṁ vihāraḥ.*

36. Read *Tāntrika.*

37. Read *Bodhisattva.*

38. Read *Saṁvat.* The second of the two figures is often wrongly read as 9 so that the year is regarded as 39.

39. Read °*śaṁsana.*

40. Read *dattāṁ vā.*

41. Read *Shashṭiṁ varsha*°.

42. Read *mahīṁ.*

43. Sometimes we have *mahimatāṁ.*

44. Sastri wrongly suggests the alternative reading *Samarāgradhīraḥ.*

45. Sastri wrongly suggests the alternative reading *Dharmasetoḥ.*

No. 17— Bhāgalpur Copper-plate Inscription of Nārāyaṇapāla (c. 855-910 A. D.), Regnal year 17

Bhāgalpur, Bhagalpur District, Bihar
R. L. Mitra, *JASB*, XLVII, i, pp. 404 ff.; Hultzsch, *Ind. Ant.*, XV, pp. 30 ff.; A. K. Maitreya, *Gauḍalekhamālā*, pp. 56 ff.
Language : Sanskrit
Script : Siddhamātṛikā

Metres : V1. स्रग्धरा; Vv. 2, 4, 6, 10 शार्दूलविक्रीडित; Vv. 5, 9, 14 वसन्ततिलक; Vv. 7, 12, 15 आर्या; Vv. 8, 11, 13, 17-20, 24 अनुष्टुभ् (श्लोक); Vv. 16, 27 मन्दाक्रान्ता; V. 21 शालिनी; V. 22 पुष्पिताग्रा.

Summary : The charter begins with an adoration to the DAŚABALA (Buddha) and king GOPĀLA, the founder of the Pāla dynasty. Gopāla's son and successor DHARMAPĀLA appropriated the Royal Fortune of MAHODAYA (Kānyakubja) after having subdued king INDRARĀJA (Indrāyudha) and other rulers and allotted her to his subordinate CHAKRĀYUDHA. Dharmapāla's younger brother was VĀKPĀLA whose son JAYAPĀLA subdued the king of PRĀGJYOTISHA (Assam) apparently during the reign of Devapāla, son of Dharmapāla. Jayapāla's son VIGRAHAPĀLA I then became king. His queen, the HAIHAYA (Kalachuri) princess LAJJĀ gave birth to king NĀRĀYAṆAPĀLA.—King Nārāyaṇapāla, son of Vigrahapāla, addressed his subordinates beginning with the *Rājans*, *Rājānakas*, *Rājaputras*, etc., in respect of his grant of the village of MAKUTIKĀ in the KAKSHAVISHAYA of TĪRA-BHUKTI made in favour of the god ŚIVA-BHAṬṬĀRAKA, installed in the *sahasr-āyatana* temple founded by the king at Kalaśapota as well as the congregation of the teachers of the PĀŚUPATA sect for the observance of *bali*, *charu*, etc., at the temple and for the maintenance of the Pāśupata monks by providing for all the necessities such as beds, seats, medicines, etc. The gift village was made a rent-free property.—The charter was issued on the 9th day of Vaiśākha in the king's 17TH REGNAL YEAR.—*Bhaṭṭa* GURAVA (cf. No. 18 below) was the executor of the charter which was engraved by Śubhadāsa's son MAṄGHADĀSA who was born in the Samataṭa country.

TEXT[1]

First Side

1. सिद्धम्[2] स्वस्ति ॥
मैत्रीङ्कारुण्य-रत्न-प्रमुदित-हृदयः
2. प्रेयसीं सन्दधानः
सम्यक्सम्वो (म्बो) धि[3]-विद्या-सरिदम-
3. ल-जल-क्षालिताज्ञान-पङ्कः ।
जित्वा यः काम-
4. कारि-प्रभवमभिभवं शाश्वतीम्प्राप शान्ति
स श्रीमान्[4] लोकनाथो जय-
5. ति दशव (ब) लोऽन्यश्च गोपालदेवः ॥ 1
लक्ष्मी-जन्म-निकेतनं समकरो वोढुं क्षमः क्ष्माभरं
पक्षच्छेद-भयादु-
6. पस्थितवतामेकाश्रयो भूभृतां (ताम्) ।
मर्य्यादा-परिपालनैक-निरतः शौर्य्यालयोऽस्मादभू-
द्दुग्धाम्भोधि-विलास-
7. हासि (स) -महिमा श्री-धर्म्मपालो नृपः ॥ 2
जित्वेन्द्रराज-प्रभृतीनराती-
नुपार्ज्जिता येन महोदय-श्रीः ।
दत्ता पुनः
8. सा व (ब) लिनार्थयित्रे
चक्रायुधायानति[5]-वामनाय ॥ 3
रामस्येव गृहीत-सत्य-तपसस्तस्यानुरूपो गुणैः
सौमित्रेरुदपा-
9. दि तुल्यमहिमा वाक्पाल-नामानुजः ।
यः श्रीमान्नय-विक्रमैक-वसतिर्भ्रातुः स्थितः शासने
शून्याः शत्रु-पताकिनी-
10. भिरकरोदेकातपत्रा दिशः ॥ 4
तस्मादुपेन्द्र-चरितैर्जगतीम्पुनानः
पुत्रो व (ब) भूव विजयी जयपाल-नामा ।
धर्म्म-द्वि-
11. षां शमयिता युधि देवपाले
यः पूर्व्वजे भुवनराज्य-सुखान्यनैषीत् ॥ 5
यस्मिन्भ्रातुर्न्निदेशाद्व (द्ब) लवति परितः प्रस्थिते

12. जेतुमाशाः
सीदन्नाम्नैव दूरान्निजपुरमजहादुत्कलानामधीशः ।
आसाञ्चक्रे चिराय प्रणयि-परिवृतो वि(बि)भ्रदु-
13. च्चेन मूर्ध्ना
राजा प्राग्ज्योतिषाणामुपशमित-समित्संकथां यस्य चाज्ञां(ज्ञाम्) ॥ 6
श्रीमान्विग्रहपालस्तत्सून(नु)रजातशत्रुरि-
14. व जातः ।
शत्रु-वनिता-प्रसाधन-विलोपि-विमलासि-जलधारः ॥ 7
रिपवो येन गुर्व्वीणां विपदामास्पदीकृताः ।
पुरुषायु-
15. ष-दीर्घाणां सुहृदः सम्पदामपि ॥ 8
लज्जेति तस्य जलधेरिव जह्नु-कन्या
पत्नी व(ब)भूव कृत-हैहय-वंश-भूषा ।
यस्याः शुची-
16. नि चरितानि पितुश्च वंशे
पत्युश्च पावन-विधिः परमो व(ब)भूव ॥ 9
दिक्पालैः क्षिति-पालनाय दधतं देहे विभक्ताः
17. श्रियः
श्री-नारायणपालदेवमसृजत्तस्यां स पुण्योत्तरं(रम्) ।
यः क्षोणी-पतिभिः शिरोमणिरुचा श्लिष्टाङ्घ्रि-पीठोपलं
न्यायोपा-
18. त्तमलञ्चकार चरितैः स्वैरेव धर्म्मासनं(नम्) ॥ 10
चेतः पुराण-लेख्यानि चतुर्व्वर्ग-निधीनि च ।
आरिप्सन्ते यतस्त्यानि चरितानि महीभृतः ॥ 11
19. स्वीकृत-सुजन-मनोभिः सत्यापित-सातिवाहनः सूक्तैः ।
त्यागेन यो व्यधत्त श्रद्धेयामङ्गराज-कथां(थाम्) ॥ 12
भयादरातिभिर्यस्य रण-
20. मूर्द्धनि विस्फुरन् ।
असिरिन्दीवर-श्यामो ददृशे पीत-लोहितः ॥ 13
यः प्रज्ञया च धनुषा च जगद्विनीय
नित्यं न्यवीविशद-
21. नाकुलमात्म-धर्म्मे ।
यस्यार्थिनो सविधमेत्य भृशं कृतार्था
नैर्गार्थितां प्रति पुनर्व्विदधुर्म्मनीषां(षाम्) ॥ 14

श्रीपतिरकृष्ण-कर्म्मा विद्या-

22. धर-नायको महाभोगी ।

अनल-सदृशो(ऽ*)पि धाम्ना यश्चित्रन्नल-समश्चरितैः ॥ 15

व्याप्ते यस्य त्रिजगति शरच्चन्द्र-गौरैर्यशो-

23. भि-

र्म्मन्ये शोभान्न खलु विभरामास रुद्राट्टहासः ।

सिद्धस्त्रीणामपि शिरसिजेष्वर्प्पिताः केतकीनां

पत्रापीडाः सुचिरम-

24. भवन्भृङ्ग-शव्दा(ब्दा)नुमेयाः ॥ 16

तपो ममास्तु राज्यन्ते द्वाभ्यामुक्तमिदं द्वयोः ।

यस्मिन्विग्रहपालेन सगरेण भगीरथे ॥ 17

स खलु भा-

25. गीरथी-पथ-प्रवर्त्तमान-नानाविध-नौवाट-सम्पादित-सेतुव(ब)न्ध-निहित-
शैलशिखरश्रेणी-विभ्रमात्[6] निरतिशय-घन-घनाघन-घट्टा(टा)-

26. श्यामायमान-वासर-लक्ष्मी-समारव्ध(ब्ध)-सन्तत-जलदसमय-सन्देहात्[7]
उदीचीनानेक-नरपति-प्राभृतीकृताप्रमेय-हयवाहिनी-खर-

27. खुरोत्खात-धूली-धूसरित-दिगन्तरालात् परमेश्वर-सेवा-समायाताशेष-
जम्वू(म्बू)द्वीप-भूपालानन्त-पादात-भर-नमदवनेः[8] । श्री-मु-

28. द्गगिरि-समावासित-श्रीमज्जयस्कन्धावारात्परमसौगतो महाराजाधिराज-
श्री-विग्रहपालदेव-पादानुध्यातः परमेश्वरः पर-

29. मभट्टारको महाराजाधिराजः श्रीमन्नारायणपालदेवः कुशली ।
तीरभुक्तौ । कक्ष वैषयिक-स्व-सम्व(म्ब)द्धाविच्छिन्न-तलो-

Second Side

30. पेत-मकुतिकाग्रामे । समुपगताशेष-राजपुरुषान् । राज-

31. राजनक । राजपुत्र । राजामात्य । महासान्धिविग्रहिक । महाक्षपट-
लिक । म-

32. हासामन्त । महासेनापति । महाप्रतीहार । महाकार्त्ताकृतिक । महा.

33. दौःसाधसाधनिक । महादण्डनायक । महाकुमारामात्य । राज-
स्थानीयोपरिक । दाशापराधिक । चौरोद्धरणिक ।

34. दाण्डिक । दाण्डपाशिक । शौल्किक । गौल्मिक । क्षेत्रप । प्रान्तपाल ।
कोट्टपाल । खण्डरक्ष । तदायुक्तक । विनियुक्तक । हस्त्य-

35. श्वोष्ट्र-नौव(ब)ल-व्यापृतक । किशोर । वडवा । गोमहिष्य-

जाविकाध्यक्ष । दूत-प्रैषणिक । गमागमिक । अभित्व[र]माण । विषयपति-

36. ग्रामपति । तरिक । गौड । मालव । खश । हूण । कुलिक । कर्ण्णाट । ला[ट] । चाट । भट । सेवकादीन् । अन्यांश्चाकीर्त्तितान् ।

37. राजपादोपजीविनः प्रतिवासिनो व्रा (ब्रा) ह्मणोत्तरान् । महत्तमोत्तम-पुरोग-मेदान्ध-[10]चण्डाल-पर्यन्तान् । यथार्हं मानयति ।

38. वो (बो) धयति । समादिशति च । मतमस्तु भवतां (ताम्) । कलश-पोते । महाराजाधिराज-श्री-नारायणपालदेवेन स्वयंकारित-सहस्रा-

39. यनस्य । तत्र प्रतिष्ठापितस्य । भगवतः शिव-भट्टारकस्य । पाशुपत-[11] आचार्य-परिषदश्च । यथार्हं पूजा-व (ब) लि-चरु-सत्र- (त्र) -नवक-

40. र्म्माद्यर्थं । शयनासन-ग्लान-प्रत्यय-भैषज्य-परिष्कारार्द्यथं ।[12] अन्येषामपि स्वाभिमतानां । स्व-परिकल्पित- विभागेन ।[13] अनवद्य-भो-

41. गार्थश्च । यथोपरिलिखित-मकुतिका-ग्रामः । स्व-सीमा-तृण-यूति-[14] गोचर-पर्यन्तः । स-तलः । सोद्देशः । साम्र-मधूकः । स-जल-

42. स्थलः । स-गर्त्तोषरः । सोपरिकरः । स-दशापचारः । स-चौरोद्धरणः । परिहृत-सर्व्व-पीडः ।[15]अ-चाट-भट-प्रवेशः ।[16] अकिञ्चि-

43. त्प्रगाह्यः । समस्त-भाग-भोग-कर-हिरण्यादि-प्रत्याय-समेतः ।[17] भूमिच्छिद्र-न्यायेना चन्द्रार्क्क-क्षिति-समकालं यावत्[18] माता-पि-

44. त्रोरात्मनश्च पुण्य-यशोऽभिवृद्धये । भगवन्तं शिव-भट्टारकमुद्दिश्य शासनीकृत्य प्रदत्तः । ततो भवद्भिः सर्व्वैरेवानु-

45. मन्तव्यं भाविभिरपि भूपतिभिर्भूमेर्द्दान-फल-गौरवादपहरणे च महानरक-पात-भयाद्दानमिदमनुमोद्य पालनीयं प्र-

46. तिवासिभिः क्षेत्रकरैश्चाज्ञा-श्रवण-विधेयीभूय यथाकालं समुचित-भाग-भोग-कर-हिरण्यादि-सर्व्व-प्रत्यायोपनयः का-

47. र्य्यं इति । सम्वत्[19] १७ वैशाख-दिने ९ (।।*) तथा च धर्म्मानुशङ्सिनः[20] श्लोकाः ।

व (ब) हुभिर्वसुधा दत्ता राजभिः सगरादिभिः ।

48. यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ।। 18

षष्टिं वर्ष-सहस्राणि स्वर्गे मोदति भूमिदः ।

आक्षेप्ता चानुमन्ता च तान्येव न-

49. रके वसेत् ।। 19

स्व-दत्ताम्पर-दत्ताम्वा[21] यो हरेत वसुन्धरां (राम्) ।

स विष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते ।। 20

सर्व्वानितान्भाविनः
50. पार्थिवेन्द्रान्
भूयोभूयः प्रार्थयत्येष रामः ।
सामान्योऽयन्धर्म्मसेतुर्नृपाणां
काले काले पालनीयः क्रमेण ॥ 21
इति -क
51. मलदलाम्वु (म्बु) -विन्दु-लोलां
श्रियमनुचिन्त्य मनुष्य-जीवितञ्च ।
सकलमिदमुदाहृतञ्च वु (बु) द्ध्वा
नहि पुरुषैः पर-कीर्त्तयो विलो-
52. प्याः ॥ 22
वेदान्तैरप्यसुगमतमं वेदिता व्र (ब्र) ह्मता (।*) र्थं
यः सर्व्वासु श्रुतिषु परमः सार्द्धमङ्गैरधीती ।
यो यज्ञानां समुदित-महाद-
53. क्षिणानां प्रणेता
भट्टः श्रीमानिह गुरवो दूतकः पुण्यकीर्त्तः ॥ 23
श्रीमता मङ्खुदासेन शू[22]भदासस्य शू[23]नुना ।
इदं सा-[24]
54. शनमुत्कीर्ण्णं सत्समतट-जन्मना ॥ 24

1. From the facsimile in *JASB*, XLVII.
2. Expressed by symbol.
3. *Ba* is indicated by the sign for *va* throughout the record.
4. Read श्रीमाँल्लोक°.
5. According to Hultzsch, *ānati*, when applied to Vishṇu, may convey the sense of *avatāra*.
6. Better read °*mān=nirati*°.
7. Better read *sandehād=udī*°.
8. The sign of punctuation here and at many places below is not necessary. In some cases, it is used as a hyphen or comma.
9. Read °*gamik-ābhi*°.
10. Read *Med-Āndhra*.
11. Read *Pāśupat-āchārya*.
12. Read °*rādy-artham=anye*•.
13. Better read *vibhāgen=ānavadya*.
14. Sometimes found as *pūti*.
15. Better read *pīḍo-'chāṭa*.

16. Better read *praveśo='kiñchi*°.
17. Better read *sameto bhūmi*°.
18. Better read *yāvan=mātā*.
19. Read *Saṁvat*.
20. Read *śaṁsinaḥ*.
21. Read *dattāṁ vā*.
22. Read *Śubha*°.
23. Read *sūnunā*.
24. Read *śāsana*°.

No. 18—Bādāl Stone Pillar Inscription of the time of Nārāyaṇapāla (c. 855-910 A.D.)

Bādāl, Dinājpur District, Bangladesh.
Kielhorn, *Ep. Ind.*, II, pp. 161 ff.; cf. *As. Res.*, I, pp. 133 ff., and *JASB*, XLIII, Part i, pp. 356 ff; A. K. Maitreya, *Gauḍalekhamālā*, pp. 70 ff.
Language : Sanskrit
Script : Gauḍīya
Metres : Vv. 1, 3, 8, 12, 16, 18, 25-26 अनुष्टुभ् (श्लोक); Vv. 4, 7, 13; 22-23 वसन्ततिलक; Vv. 5, 9, 15, 20, 27 शार्दूलविक्रीडित; Vv. 6, 11 स्रग्धरा; Vv. 10, 19, 24, 28 आर्या; V. 14 मालिनी; V. 21 उपजाति.

Summary : In the ŚĀṆḌILYA-GOTRA were born the following Brāhmaṇas—Vīradeva; his descendant Pāñchāla; his descendant Garga who was a minister of DHARMA (Dharmapāla); his son Śakra; his son DARBHAPĀṆI born of Ichchhā. Darbhapāṇi's wise counsel was responsible for making DEVAPĀLA the lord of 'the earth' bounded by the father of REVĀ (Vindhya), 'the father of GAURĪ' (Himālaya) and the oceans in the west and east. Therefore king Devapāla often waited at the gate of Darbhapāṇi's abode. Darbhapāṇi's son was SOMEŚVARA whose son was the learned KEDĀRAMIŚRA. By following Kedāra's counsel, the king of GAUḌA (Devapāla) succeeded in subduing the HŪṆAS and in humbling the pride of the DRAVIḌA (Pallava) and GURJARA (Pratīhāra) kings. A sacrifice performed by Kedāra was attended by king ŚŪRAPĀLA (Devapāla's son).[1] His son from Vavvā was GURAVAMIŚRA who was honoured by king NĀRĀYAṆAPĀLA and raised this GARUḌA PILLAR. The eulogy was engraved by *Sūtradhāra* VISHṆUBHADRA.

TEXT[1]

1. [विष्णु:*] शाण्डिल्यवङ्शे(वंशे) भूद्वीरदेवस्तदन्वये (।*)
पाञ्चालो नाम तद्गोत्रे गर्ग्गस्तस्मादजायत ॥ 1
शक्रः पुरोदिशि पतिर्न्नं दिगन्तरेषु
तत्रापि दैत्यपतिर्भिर्ज्जित एव
2. [सद्य*]: (।*)
धर्म्मः कृतस्तदधिपस्त्वखिलासु दिक्षु

स्वामी मयेति विजहास बृ(बृ)हस्पतिं यः ।। 2
पत्नीच्छा नाम तस्यासीदिच्छेवान्तर्व्विवर्त्तिनी ।
निसर्ग्ग-निर्म्मल-स्निग्धा कान्तिश्चन्द्र-
3. मसो यथा ।। 3
विद्या-चतुष्टय-मुखाम्बु(म्बु)रुहात्त-लक्ष्मा
नैसर्ग्गिकोत्तम-पदाधरित-त्रिलोकः (।*)
सूनुस्तयोः कमलयोनिरिव द्विजेशः
श्री-दर्भपाणिरिति नाम निजन्दधा-
4. नः ।। 4
आ रेवा-जनकान्मतङ्गज-मद-स्तिम्यच्छिला-सङ्घ(संह)ते-
रा गौरी-पितुरीश्वरेन्दु-किरणैः पुष्यत्सितिम्नो गिरेः ।
मार्त्तण्डास्तमयोदयारुण-जलादा वारि-रा-
5. शि-द्वया-
न्नीत्या यस्य भुवं चकार करदां श्री-देवपालो नृपः ।। 5
माद्यन्नाना-गजेन्द्र-स्रवदनवरतोद्दाम-दान-प्रवाहो-
न्मृष्ट-क्षोणी-विसर्प्पि-प्रव(ब)ल-
6. घनरजः—सम्वृ(संवृ)ताशाव[3]काशं(शम्) ।
दिक्चक्रायात-भूभृत्परिकर-विसरद्वाहिनी-दुर्व्विलोक-
स्तस्थौ श्री-देवपालो नृपतिरवसरापेक्षया द्वारि
7. यस्य ।। 6
दत्त्वाप्यनल्पमुडुप-च्छवि-पीठमग्रे
यस्यासनं नरपतिः सुरराज-कल्पः ।
नाना-नरेन्द्र-मुकुटाङ्कित-पादपान्सुः(पांसुः)
सिहां(सिंहा)सनं सच-
8. कितः स्वयमाससाद ।। 7
तस्य श्री-शर्क्करादेव्यामत्रेः सोम इव द्विजः (।*)
अभूत्सोमेश्वरः श्रीमान् परमेश्वर-वल्लभः ।। 8
न भ्रान्तम्वि(न्तं वि)कटं
9. धनञ्जयतुलामारुह्य विक्रामता।(ता)
वित्तान्यर्थिषु वर्षता स्तुति-गिरो नोद्गर्व्वमाकर्ण्णताः ।
नैवोक्ता मधुरम्व(म्ब)हुप्रणयिनः सम्व(संव)लगिताश्च श्रि-
10. या।(या)
येनैवं स्वगुणैर्ज्जगद्विसदृशैश्चक्रे सताम्वि(तां वि)स्मयः ।। 9
शिव इव करं शिवाया हरिरिव लक्ष्म्या गृहाश्रम-प्रेप्सुः (।*)

अनुरूपाया विधि-

11. वत् (वद्) रल्लादेव्याः स जग्राह ॥ 10

आसन्नाजिह्व-राजद्ब (द्व) हल-शिखिशिखा-चुम्वि (म्बि)-दिक्चक्रवालो

दुर्व्वार-स्फारशक्तिः स्व-रस-परिणताशेष-विद्या-

12. प्रतिष्ठः ।

ताभ्यां जन्म प्रपेदे त्रिदशजन-मनो-नन्दनः स्व-क्रियाभिः

श्रीमान् केदारमिश्रो गुह इव विकशज्जातरूप-प्रभावः ॥०॥ 11

13. सकृद्दर्शन-सम्प्रीतान्च (तांश्च) तुर्व्विद्या-पयोनिधीन् (।*)

जहासागस्त्य-सम्पत्तिमुद्गिरन्वा (न्बा) ल एव यः ॥ 12

उत्कीलितोत्कल-कुलं हृत-हूण-गर्व्वं

खर्व्वीकृ-

14. त-द्रविड-गूर्ज्जर-नाथ-दर्प्पं (र्प्पम्) ।

भूपीठमव्धि (ब्धि)-रशनाभरणम्वु (म्बु) भोज

गौडेश्वरश्चिरमुपास्य धियं यदीयां (याम्) ॥ 13

स्वयमपहृत-वित्तानर्थिनो यो-

15. नुमेने

द्विषति सुहृदि चासीन्निर्व्विवेको यदात्मा ।

भव-जलधि-निपाते यस्य भीश्च त्रपा च । (च)

पि (प) रिमृदित-कशये (षायो) यः परे धाम्नि रेमे ॥ 14

यस्ये-

16. ज्यासु वृ (बृ) हस्पति-प्रतिकृतेः श्री-शूरपालो नृपः

साक्षादिन्द्र इव क्षतप्रिय-व (ब) लो गत्वैव भूयः स्वयं (यम्) ।

नानाम्भोनिधि-मेखलस्य जगतः

17. कल्याण-सङ्शी (शंसी) चिरं

श्रद्धाम्भः-प्लुत-मानसो नत-शिरा जग्राह पूतम्पयः ॥ 15

देवग्राम-भवा तस्य पत्नी वव्वाभिधाऽभवत् (।*)

अतुल्या चलया ल-

18. क्ष्म्या सत्या चाप्य[नपत्य]या ॥ 16

सा देवकीव तस्माद्यशोदया स्वीकृतम्पतिं लक्ष्म्याः ।

गोपाल-प्रियकारकमसूत पुरुषोत्तमन्तनयं (यम्) ॥०॥ 17

19. जमदग्नि-कुलोत्पन्नः सम्पन्नक्षत्र-चिन्तकः (।*)

यः श्री-गुरवमिश्राख्यो रामो राम इवापरः ॥ 18

कुशलो गुणान्विवेक्तुं विजिगीषुर्यन्नृप-

20. श्च व (ब) हुमेने ।

श्री-नारायणपालः प्रशस्तिरपरास्तु का तस्य ॥ 19
वाचाम्वै (चां वै) भवमागमेष्वधिगमं नीतेः परान्निष्ठतां। (तां)
वेदार्थानुगमादसी-
21. म-महसो वङ्श (वंश) स्य सम्व (म्ब) न्धितां (ताम्) ।
आसक्तिङ्गुण-कीर्त्तनेषु महतान्निष्णाततां ज्योतिषो
यस्यानल्पमतेरमेय-यशसो धर्म्मावतारोऽवदत् ॥ 20
22. यस्मिन्मिथः श्री-भृति वागधीशे
विहाय वैराणि निसर्ग्गजानि ।
उभे स्थिते सख्यमिवादि (धि) गन्त्र्या-
वेकत्र लक्ष्मीश्च सरस्वती च ॥ 21
शास्त्रानुशील-
23. न-गभीरगुणैर्व्वचोभि-
र्व्विद्वत्सभासु परवादि-मदावलेपः (।*)
उद्वासितः सपदि येन युधि द्विषाञ्च
निस्सीम-विक्रम-धनेन [भ]टाभिमानः ॥ 22
24. [आविर्व्व (र्ब्ब) भू]व सहसैव फलं न यस्य
यस्तादृशम्व्य (शं व्य) धित कर्ण्णसुखन्न किञ्चित् ।
यत्प्राप्य दान-पतिमर्थि-जनो (ऽ*) न्यमेति
तत्केलि-दानमपि यस्य न जातु
25. * * ॥ 23
अति-लो[म]-हर्षणेषु (च*) कलियुग-वाल्मीकि-जन्म-पिशुनेषु ।
धर्म्मेतिहास-पर्व्वसु पुण्यात्मा यः श्रुतीर्व्यवृणोत् ॥ 24
अ-सिन्धु-प्रसृता यस्य स्वं (स्व) र्धुनी-
26. [व सहस्र*]धा ।
वाणी प्रसन्न-गम्भीरा धिनोति च पुनाति च ॥ 25
पितृत्वं स्वयमास्थाय पुत्रत्वमगमत्स्वयं (यम्) (।*)
व (ब्र) ह्मेति पुरुषान् यस्य वङ्शे (वंशे) पञ्च प्रपेदिरे ॥ 26
शोभो
27. –U U– स्वकीय-वपुषो लोकेक्षण-ग्राहिणि
स्वाभिप्राय इवातुलोन्नतिमति स्व-प्रेम-व (ब) न्ध-स्थिरे ।
स्पष्टं शल्य इवार्प्पिते कलि-हृदि स्तम्भो (ऽ*) त्र ते-
28. [न] U–
– – – फणिनां हरेः प्रियसखस्तार्क्ष्यो (ऽ*) यमारोपितः (॥*) 27
भ्रान्त्वा दिगन्तमखिलं गत्वा पाताल-मूलमप्यस्मात् ।

यश इव (ह) तस्योत्तस्थौ हृताहि-गरुडच्छल (I*) दमलं (लम् ॥) 28

29. सूत्रधार-विष्णु [भ]द्रेण[4] प्रशस्ति (:*) क्षणितं (ता) (॥*)

1. Śūrapāla (I) was generally identified with Vigrahapāla (I), father of Nārāyaṇapāla and son of Jayapāla. A recently discovered copper-plate grant of Śūrapāla (I), however, shows that he was the son of Devapāla from the queen Māhāṭā, daughter of Durlabharāja. The queen's name has been wrongly read as Bhavadevī. See *Bul. Mus. Arch. U. P.*, 1970, Nos. pp. 6-7, 67 ff.

2. From the facsimile in *Ep. Ind.* In this record, *ba* has been written with sign for *va*. The writing may have begun with the *Siddham* symbol.

3. *Vi* had been originally engraved, but was later changed to *va*.

4. The *akshara bha* had been omitted and was later engraved below the line.

B—The Chandras

No. 19—Paśchimbhāg Copper-plate Inscription of Śrīchandra (c. 925-75 A.D.), Regnal year 5

Paśchimbhāg, Sylhet District, Bangladesh.
K. K. Gupta Chaudhury, *Nalinīkānta Bhaṭṭaśālī Com. Vol.*, Dacca, 1966, pp. 166 ff.; D. C. Sircar, *Ep. Ind.*, XXXVII, pp. 289 ff.
Language : Sanskrit
Script : Gauḍīya
Metres : V. 1 वसन्ततिलक; Vv. 2,9, 16-17, 19 and 23 अनुष्टुभ्; Vv. 3 and 4 उपजाति (रामा); V. 6 उपजाति (माला); V. 10 उपजाति (हंसी); V.11 उपजाति (बुद्धि); Vv. 5, 7, 8, 12-15 शार्दूलविक्रीडित; V. 18 शालिनी; V. 20 पुष्पिताग्रा; V. 21 आर्या (पथ्या); V. 22 आर्या (आदिविपुला).

Summary: There was one PŪRṆACHANDRA from whom was born SUVARṆACHANDRA. The latter's son was *Paramasaugata Parameśvara Paramabhaṭṭāraka Mahārājādhirāja* TRAILOKYACHANDRA. His army conquered SAMATAṬA, where the chief city was DEVAPARVATA on the KSHĪRODĀ and the LĀLAMBĪ-VANA was famous for its medicinal herbs. Trailokyachandra's forces enjoyed the curds of VAṄGA at KṚISHṆAŚIKHARIN and its hamlets, drank the waters of the SURUṄGĀ and other streams of the VINDHYAN REGION and reached the valley of the KĀVERĪ passing by the slope of the MALAYA range.—The army of his son, ŚRĪCHANDRA, by his wife KĀÑCHIKĀ (elsewhere called Kāñchanā), in an attempt to subdue UTTARĀPATHA, invaded KĀMARŪPA in the LAUHITYA valley where flowed the streams called CHITRAŚILĀ and PUSHPABHADRĀ near the Himagiri. Śrīchandra's military success caused distress to the womenfolk of the YAVANAS, HŪṆAS and UTKALAS.—From the victorious camp at VIKRAMAPURA, *Paramasaugata Parameśvara Paramabhaṭṭāraka Mahārājādhirāja* ŚRĪCHANDRADEVA informed the *Rājñīs*, *Rāṇakas* and *Rājaputras*, the *Mahāsāndhivigrahika*, *Mahāsainyapati*, *Mahāmudrādhikṛita*, *Mahākshapaṭalika*, *Pādamūlika*, *Mahāpratīhāra*, *Mahātantrādhikṛita*, *Mahāsarvādhikṛita*,

Mahābalādhikaraṇika and *Mahāvyūhapati*, the *Maṇḍalapatis*, *Koṭṭapālas*, *Dauḥasādhasādhanikas*, *Chauroddharaṇikas*, *Naubala-hastyaśva-gomahishājāvikādi-vyāpṛitakas*, *Gaulmikas*, *Śaulkikas*, *Dāṇḍikas*, *Daṇḍapāśikas* *Daṇḍanāyakas*, *Vishayapatis* and other servants who were dependent on the king and were mentioned only in the document called *Adhyakshaprchāra* but not in the present charter, such as the *Chāṭas* and *Bhaṭas*, the people of the countryside and peasants headed by the Brāhmaṇas, in respect of the grant of the several plots of land, in the *Vishayas* of CHANDRAPURA, GARALĀ and POGĀRA belonging to the ŚRĪHAṬṬA-MAṆḌALA in the PUṆḌRAVARDHANA-BHUKTI. The gift land was named the ŚRĪ CHANDRAPURA-BRAHMAPURA or °ŚĀSANA and was bounded by the MAṆI-NADĪ, VETRAGHAṬĪ-NADĪ, KOSIYĀRA-NADĪ, etc.

I. The first plot of land covering 120 *Pāṭakas* was granted in favour of a temple of the god Brahman as follows :— a teacher of the Chāndra grammar—10 P. (each *Pāṭaka* being equal to 10 *Droṇas*); for the maintenance of 10 students—10 P.; for feeding 5 guest Brāhmaṇas— 5 P.; for the maker of the temple— 1 P; the *Gaṇaka*—1 P.; the *Kāyastha*—2½ P.; 4 *Mālākāras* 2 *Tailikas*, 2 *Kumbhakāras*, 5 *Kāhalikas*, 2 *Śaṅkha-vādakas*, 2 *Ḍhakkā-vādakas*, 8 *Drāgaḍikas*, 22 *Karmakaras* and *Charmakāras*—each ½ P.; the *Naṭa*—2 P.; 2 *Sūtradhāras* 2 *Sthapatis* and 2 *Karmakāras*—each 2 P.; 8 *Cheṭikās* each ¾ P.; for *navakarman*—47 P.

II. The second plot of land covering 280 *Pāṭakas* was granted to four *Deśāntarīya* temples and four VAṄGĀLA temples, each group housing the gods VAIŚVĀNARA (Agni), YOGEŚVARA, JAIMANI and MAHĀKĀLA as follows:—8 teachers of the four Vedas belonging to the two groups of temples—each 10 P.; for 5 students allotted to each of the 8 temples—5 P.; for the *Mālākāra*, *Nāpita*, *Tailika* and *Rajaka* and the 8 *Karmakaras* and *Charmakāras* in each of the 8 temples—each ½ P.; 2. *Chetikās* in each of the 8 temples—each ¾ P.; for the *navakarman* of each of the 8 temples—10 P.; and, in either of the 2 groups of temples, for the Brāhmaṇa elder—2 P.; the *Vārika*—2½ P.; the *Kāyastha*—2½ P.; the *Gaṇaka*—1 P.; and the *Vaidya*—3 P.

III. The third plot consisting of the rest of the land was allotted in equal shares to SIX THOUSAND BRĀHMAṆAS of whom

less than forty are mentioned in a list beginning with VĀVASA- (VĀSAVA ?) DATTA and ending with GARGA.

The land was granted together with *tala*, *uddeśa*, *āmra*, *panasa*, *guvāka*, *nārikela jala*, *sthala*, *gartta*, *ushara*, *daśāparādha* and *chauroddharaṇa* and with the immunity from *sarva-pīḍā*, from the entry of *Chāṭas* and *Bhaṭas* and from all dues (*akīñchid-grāhya*). The donees were allowed to enjoy *samasta-rājabhāga-kara-hiraṇya-pratyāya* but not the *Ratnatraya-bhūmi*. The CHANDRAPURA-ŚĀSANA was created through the *Mahāmudrādhikṛita* ŚUBHĀṄGA, an immigrant from ŚĀLA-VARENDRĪ, who acted as the *Dūtaka*, and the charter was issued in the name of Lord BUDDHA-BHAṬṬĀRAKA according to the *bhūmi-chchhidra-nyāya* on the 5th day of Vaiśākha of the YEAR 5 of Śrīchandra's reign. —It was the Vaishṇava VINĀYAKA, born at KĀLĪGRĀMA, who is stated to have settled the six thousand Brāhmaṇas in CHANDRAPURA.—The charter was engraved by HARADĀSA and endorsed by the *Sāndhivigrahika* and another officer.

TEXT[1]

Obverse

1. सिद्धम्[2] स्वस्ति
वन्द्यो जिनस्स भगवान्करुणैकपात्र-
न्धर्म्मो(ऽ*)प्यसौ वि-
2. जयते जगदेकदीपः ।
यत्सेवया सकल एव महानुभाव-
स्सन्सार-[3]
3 पारमुपगच्छति भिक्षुसङ्घः ॥ 1
. पूर्णचन्द्र इति श्रीमानासीन्नासीरजं रजः ।
यस्यापुररयो(ऽ*)पूर्व्वमा-
4. तपत्रमपत्रपाः ॥ 2
नाग्नौ विशुद्धो न तुलाधिरूढः
किन्तु प्रकृत्यैव युतो गरिम्णा ।
तथापि कल्याण-सु-
वर्ण्णकल्प-
5. स्सुवर्ण्णचन्द्रस्सुकृती ततो(ऽ*)भूत् ॥ 3
इर्शोऽस्य माता किल दोहदेन

दिदृक्षमाणोदितमिन्दु-
6. विम्वं(म्बम्) ।
सुवर्णचन्द्रेण हि तोषितेति
सुवर्ण्णचन्द्रं यमुदाहरन्ति ॥ 4
तस्माद्वन्दि-विलोचनेन्दु-दृषदान्नि-
7. स्यन्द-चन्द्रोदयः ।[4]
कौलीनात्सभयस्सभाकमलिनी-सुप्रात[5]-सन्ध्यातपः ।
तृष्णक्चातकमण्डली-नवघनस्स[म्यक्]-
8. प्रजायामिकः ।[6]
त्रैलोक्यप्रथितोरुकीर्त्तिरजनि त्रैलोक्यचन्द्रो नृपः ॥ 5
चतुः-पयोराशिसमाप्त-पृ-
9. थ्वी-
जयाभिलाषो विषयेष्वलुब्ध(ब्धः) ।
युद्धेषु निस्तृङश[7]लताजलेन
यो वैरि-वह्निं शमयाञ्चकार ॥ 6
क्षीरोदाम-
10. नु देवपर्व्वत[8] इति श्रीमत्तदेतत्पुरं
यत्रागन्तुजनस्य विस्मयरसः कम्वो(म्बो)जवार्त्ताद्भुतैः ।
लालम्वी(म्बी)वनमत्र नावि-[9]
11. कशतैरन्विष्ट-सिद्धौषधि-
व्याहारा इतिह श्रुतास्समतटन्निर्जित्य यत्सैनिकैः ॥ 7
भुक्त्वा वङ्ग-[10]दधीनि कृष्णशिख-
12. रिग्रामेषु कौतूहलात्(लाद्)
विन्ध्यस्याप्यधिमेखलावनतलं पीत्वा सुहङ्गानदी. ।
जेतुर्यस्य व(ब)लैर्व्यगा–
13. हि मलयः शृङ्गोपलप्रक्षलत्-
कावै(वे)री-जलवेणिजर्ज्जर-रव-व्यामिश्रकोलाहलैः ॥ 8
इन्द्राणीव महे-
14. न्द्रस्य भवानीव भवस्य या ।
तस्य श्री-काञ्चिका नाम व(ब)भूवमहिषी प्रिया ॥ 9
स राजयोगेन शुभे मुहूर्त्ते
15. मौहूर्त्तिकैस्सूचित-राजचिह्नं(ह्नम्) ।
अवाप तस्यां तनयन्नयज्ञः
श्रीचन्द्रमिन्दूपममिन्द्रतेजाः ॥ 10

एकातप-
16. त्राभरणाम्भुवं यो
विधाय वैधेय-जनाविधेयः ।
चकार कारासु निवेशितारि-
र्यशस्सुगन्धीनि दिशाम्मु-
17. खानि ॥ 11
यत्सैन्यैः किल कामरूप-विजये रोहत्कपोती-घना
र्न्निर्व्विष्टाः भ(फ)लपाक[11]-पिङ्गकदलीकुञ्ज-
18. भ्रमद्वानराः ।
रोमन्थालसव(ब)द्धनिद्र-चमरीसंसेवित-प्रान्तरा
लौहित्यस्य वनस्थली-परिसराः कालागु-
19. रु-श्यामलाः ॥ 12
सैषा चित्रशिला मनोरमशिला-पुष्पप्रतानाचिता
तालीसच्छदमर्म्मरैः परिसरैः
20. सा पुष्पभद्रा नदी ।
इत्युत्कण्ठुल[12]मुत्तरापथ-जये यत्सैनिकश्रोत्रियै-
रध्याये पठिताश्चिरं हिमगिरौ
21. दृष्ट्वा(ष्ट्वा) स्थली-देवताः ॥ 13
सन्तोषं रणदेवताङ्गमयता वीर्यावदातैर्न्निजै-
रुन्मृष्टं यम(व)नी-पयोधरतटो(टे)पत्रा-
22. ङ्कुलीमण्डनं(नम्) ।
शोकप्रच्छनजर्ज्जरं विरचितं हूणी-कपोलोदरं
येनोन्मूलितमुत्कली-नयनयोस्तालीसुरा-
23. घूर्ण्णितं(तम्)॥ 14
स्पृष्टः पार्थिवपान्सु(पांसु)-दोहदरसश्लाघा-घनं दिग्गजै-
र्न्नेत्राणामनिमेषतः परिहृतो दूरेण वृ-
24. न्दारकैः (।*)
केशेष्वप्सरसामपूर्वपलितभ्रान्तिन्स(न्तिं स)मारोपयन्
सन्तानो रजसां रणेषु जयिनो यस्य द्युमार्ग्ग-
25. ङ्गतः ॥ 15
स खलु श्री-विक्रमपुरसमावासित-श्रीमज्जयस्कन्धावारात्परमसौगत-
परमेश्वर-परमभट्टारक-
26. महाराजाधिराज-श्री-त्रैलोक्यचन्द्रदेव-पादानुध्यातः परमसौगतः परमेश्वरः
परमभट्टारको महा-

27. राजाधिराजः श्रीमान् श्रीचन्द्रदेवः कुशली । श्री-पौण्ड्रवर्द्धन-
भुक्त्यन्तःपाति–श्रीहट्टमण्डल-सातलवर्ग-

28. सम्वद्ध-अ[14]वेंडिकासमेत-गरलाविषय-पोगारविषय-चन्द्रपुरविषयेषु ।
समुपगताशेष-राज्ञी ।[15] रा-

Reverse

29. णक । राजपुत्र । महासान्धिविग्रहिक । महासैन्यपति । महामुद्राधिकृत ।

30. महाक्षपटलिक । पादमूलिक । महाप्रतीहार । महातन्त्राधिकृत ।
महासर्व्वाधिकृत । महाव(ब)ला-

31. धिकरणिक । महाव्यूहपति । मण्डलपति । कोट्टपाल । दौस्साधसाधनिक ।
चौरोद्धरणिक । नौव(ब)ल-हस्त्यश्वगोमहि-

32. षाजाविकादि-व्यापृतक । गौल्मिक । शौल्किक । दाण्डिक । दाण्डपासि-
(शि)क । दाण्डनायक । विषयपत्यादीनन्यांश्च राजपादो-
पजीविनो(ऽ*)ध्यक्षप्रचारोक्तानिहाकीर्त्तितान् । चाटभटजातीयान् । जन-
पदान् क्षेत्रकरांश्च व्रा(ब्रा)ह्मणोत्तरान् । यथार्हं मानय-

34. ति । वो(बो)धयति । समाज्ञापयति च । मतमस्तु भवतां । विषया-
नेतान् । पूर्व्वेण वृ(बृ)हत्कोट्टालि(:*)सीमा । दक्षिणेन मणि-नदी सीमा
पश्चिमे-

35. न जुज्जू-खातक(ः*) काष्ठपर्ण्णी-खातक(ः*) वेत्रघटी-नदी सीमा ।
उत्तरेण कोसियार-नदी सीमा । इत्येवं चतुस्सीमापर्यन्तान् श्री-श्री–

36. चन्द्रपुराभिधानम्व्र(म्ब्र)ह्मपुरम्परिकल्प्य । एतस्मिन् श्रीचन्द्रपुरे ।
व्र(ब्र)ह्मणे । एतन्मठप्रतिव(ब)द्ध-च(चा)न्द्रव्याख्यानोपाध्यायस्य द–

37. शद्रोणिक-दशपाटकाः । दशच्छात्राणां पालिघुट्टकार्थं[16] दशपाटकाः ।
अपूर्व्व-पञ्च-व्रा(ब्रा)ह्मणानां प्रत्यहम्भक्तन्दातुम्पञ्च पा-

38. टकाः । एतदधिष्ठाय(न)-कारयितुर्व्रा(ब्रा)ह्मणस्य पाटकः । गणकस्य
पाटकः । कायस्थस्य सार्द्ध-पाटकद्वयं । मालाकार चतुष्ट-

39. यस्य । तैलिकद्वयस्य । कुम्भकारद्वयस्य । पञ्चकाहलिकानां ।
शङ्खवादकद्वयस्य । ढक्कावादकद्वयस्य । अष्टद्रागडिका-

40. नां । द्वाविङ्श(विंश)ति-कर्म्मकर-चर्म्मकाराणाञ्च प्रत्येकं(कम्)
अर्द्धपाटकः । नटस्य पाटकद्वयं । सूत्रधारद्वयस्य । स्थपतिद्वयस्य ।
कर्म्मका-

41. र-द्वयस्य च । प्रत्येकं पाटकद्वयं(यम्) । अष्टचेट्टिकानां[17] प्रत्येकं
पादोनपाटकः । नवकर्म्मनिमित्तञ्च सप्तचत्वारिङश(रिंश)त्-पाटकाः ।
ए-
42. वमनेन नियमेन विङश(विंश)त्यधिक-पाटक-शतं । तथा
देशान्तरीय-मठ-चतुष्टये । वङ्गाल-मठ-चतुष्टये च । वैश्वानर-
योगेश्वर-
43. जैमनि-महाकालेभ्यश्च ॥ एषामुभयेषां मठप्रतिव(ब)द्ध[18]-ऋग्-यजुस्-
सामाथर्व्वोपाध्यायानामष्टानां प्रत्येकं दशपाटकाः । प्र-
44. तिमठ-पञ्चछात्राणां पञ्चपाटकाः । मालाकार-नापित-तैलिक-
रजकानां(नाम्) । अष्टकर्म्मकर-चर्म्मकाराणाञ्च । प्रत्येकं(कम्) । अर्द्ध-
45. पाटकः । वेट्टि(चेटि)काद्वयस्य प्रत्येकं पादोन-पाटकः । प्रतिमठ-न्न(न)व-
कर्म्मनिमित्तञ्च दशपाटकाः । प्रतिमठ-चतुष्टये च । म-
46. हत्तर-व्रा(ब्रा)ह्मणस्य । पाटकद्वयं । वारिकस्य सार्द्धपाटकः । कायस्थस्य
सार्द्धपाटकद्वयं । गणकस्य पाटकः । दयै(वै)द्यस्य पाट-
47. कत्रयं(यम्) । एवमनेन नियमेन । अशीत्युत्तर-पाटकशतद्वयं । वावुस-
(वासव)दत्त । हर्ष । शेखर । विश्वरूप । भानुदत्त ।[18] ईशान ।
48. धन्यनाग । नन्दयशः । चङ्ग । गोवर्द्धन । सिङघ(सिंह)दत्त । कमलनन्दि ।
सवितार । माणिक्य । कामुक । भीमपाल ।[18] अन्नट । वत्सधर ।
नन्दधो-
49. ष । श्रीधर । राम । शिवव(ब)न्धु । मङ्गल । वेदो । धवल । विह्न(ष्णु)-
दत्त । शान्तिदाम । गर्ग्गशर्म्म । महीन्द्रसोम । रविकर । भानु । नारायण ।
50. [ज्येष्ठ]गुप्त । शसि(शि)दत्त । हरि । जयदत्त-गर्ग्गादि-षड्व्रा(ड्ब्रा)-
ह्मण-सहस्रेभ्यश्च । नानागोत्रप्रवरेभ्यः । चतुश्चरण-नानाशाखाधायिभ्यः ।
51. समविभागेन शेषभूमिः । इत्येवं । व्र(ब्र)ह्म[18] । अग्नि । योगेश्वर ।
जैमनि-महाकालेभ्यः । षड्व्रा(ड्ब्रा)ह्मणसहस्रेभ्यश्च ॥ उपरिलिखित-
52. सीमावच्छिन्नावेडिका-समेत-विषया एते । स-तलाः । सोद्देशाः । साम्र-
पनसाः । स-गुवा(क*)नालिकेराः । स-जल-स्थलाः स-गर्त्तोषराः । स-
53. दशापराधाः । स-चौरोद्धरणाः । परिहृत-सर्व्व-पीडाः । अ-चाट-
भट-प्रवेशाः । अ-किञ्चित्प्रग्राह्याः । समस्त-राजभोग-कर-हिरण्य-
प्रत्या-
54. य-सहिताः । रत्नत्रयभूमि-र्व्वज्जिताः । इन्द्रेश्वर-नौव(ब)न्ध-प्रतिव(ब)-
द्ध-दशद्रोणिक-द्वापञ्चाशत्पाटक-व(ब)हिः । महामुद्राधिकृत-श्री-शुभा-
55. ङ्ग-द(दू)तक-मुखेन भगवन्तम्वु(म्बु)द्ध-भट्टारकमुद्दिश्य । मातापित्रोरा-
त्मनश्च पुण्य-यशो(ऽ*)भिवृद्धये । श्रावण-रवि-सङ्क्रान्तौ विधिवदुदक-

56. पूर्व्वकं कृत्वा । आ-चन्द्रार्क्कक्षिति-समकालं यावत् । भूमिच्छिद्र-न्यायेन ।
ताम्रशासनीकृत्य । प्रदत्ता अस्माभिः । यतो भवद्भिर्ज्जनपदैः

57. क्षेत्रकरैर्व्वा(र्ब्रा)ह्मणैश्च विधेयीभूय यथादीयमान-प्रत्यायोपनयः
कार्यः । यथाकालभावि-भोगपतिभिरपि भूमेर्द्दानफल-गौ-

58. रवात् । अपहरणे महानरकपातभयाच्च । दानमिदं सम्यगनुमोद्यानुपा-
लनीयमिति । सम्व(संव)त् ५ वैशाख-दिने ५ । तथा च धर्म्मा-

59. नुशंसिनः श्लोकाः ।
व(ब)हुभिर्व्वसुधा दत्ता राजभिस्सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं(लम्) ॥ 16
भूमिं यः प्रतिगृह्णाति यश्च

60. भूमिं प्रयच्छति ।
उभो(भौ) तौ पुण्यकर्म्माणौ नियतं श्व(स्व)र्गगामिनौ ॥ 17
सर्व्वानेतान् भाविनः पार्थिवेन्द्रान्
भूयो भूयः प्रार्थयत्येष रामः ।

61. सामान्यो(ऽ*)यं धर्म्मसेतुर्न्नृपाणां
काले काले पालनीयः क्रमेण ॥ 18
स्वदत्ताम्परदत्ताम्वा(त्तां वा) यो हरेत वसुन्धरां(राम्) ।
स विष्ठायां कृमिर्भूत्वा

62. पितृभिस्सह पच्यते ॥ 19
इति कमलदलाम्वु(म्बु)विन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितञ्च ।
सकलमिदमुदाहृतञ्च वु(बु)द्ध्वा न हि पु-

63. रुषैः परकीर्त्तयो विलोप्याः ।(॥) 20
शाल्वरेन्द्रि-विनिर्गत-शुर्भा(भा)ङ्क-दूतक-मुखेन चन्द्रपुरं(रम्)[19] ।
शासनमिदम्प्रवृत्तं राज्ञः श्रीचन्द्रदे-

64. वस्य ॥ 21
कालीग्राम-भवो वैष्णवः समारोपयांव(ब)भूव कृती ।
श्रीमान् विनायकाख्यो विप्राणां षड्स(ट्स)हस्राणि ॥ 22
एतच्छासनमु-

65. त्कीर्ण्णं हरदासेन सि(शि)ल्पिना ।
धात्रा(पि*) निर्म्मितं यस्य ।[20] सादृश्यं कर्म्मणः क्वचित् ॥ 23
सान्धि-नि अनु[21]

1. From the photograph in *N. K. Bhaṭṭasali Com. Vol.* and a set of impressions.

2. The symbol indicating *Siddhaṁ*, *Siddhir=astu*, or *Oṁ siddhiḥ*.

3. Read °*saṁsāra*.

4. The *daṇḍa* is superfluous.

5. Gupta Chaudhury reads *suprāta*[*ḥ**] which is metrically defective.

6. Read *yāmikas=Tai*°.

7. Read *nistriṁśa*.

8. Gupta Chaudhury reads *Kshīrodāmabu*, makes it *Kshīrodāmbu* and speaks of 'the venerable mountain (i.e. the Mandara mountain) in the waters of the Kshīroda (sea)'. Devaparvata on the Kshīrodā is already known from the Kailān plate of Śrīdhāraṇarāta and the Tripurā plate of Bhavadeva. The Kshīrodā is the modern Khīrnai. The city of Devaparvata, capital of Samataṭa, was situated on the southern end of the Maināmatī hill near Comilla.

9. Gupta Chaudhury reads *vātika*.

10. Gupta Chaudhury reads *chaṅga* and fails to notice the reference to the Kṛishnaśikhari-grāma and Suruṅgā-nadī.

11. Gupta Chaudhury wrongly finds here reference to "monkeys roaming in *bhalapās* (i.e. marking-nuttrees), *Kapiṅga* and plantain groves."

12. Better read °*m=utkaṇṭhita*°. Gupta Chaudhury fails to notice the reference to the Chitraśilā river and interprets 'Uttarāpatha' as "northern region".

13. Gupta Chaudhury reads *prachchhanna* which does not suit the metre. He also misses the reference to the interesting Hūṇa custom of scarifying certain limbs of the widows. See Sircar, *Stud. Soc. Adm. Anc. Med. Ind.*, I, pp. 216 ff.

14. Read *sambaddh-Āve*°.

15. Here and in the following lines the *daṇḍa* has been used like a hyphen and sometimes like a comma.

16. Read *ghuṭik-ārthaṁ*. Gupta Chaudhury reads *pālighaṭṭikārthaṁ* which, he thinks, means 'for the stipends'.

17. Read *cheṭikānāṁ*. Gupta Chaudhury has *veṭṭikānāṁ* which is meaningless.

18. *Sandhi* has been ignored here.

19. Śrīchandrapura has been mentioned as Chandrapura for the sake of metre.

20. Gupta Chaudhury reads *vārttā* (*vi**)*nirmmitaṁ*. Omit *daṇḍa* after *yasya*.

21. There may have been a few *aksharas* after this.

No. 20—Betkā-Pāikpāḍā Vāsudeva Image Inscription of Govindachandra (c. 1020-55 A.D.), Regnl year 23.

Betkā and Pāikpāḍā are villages in the Munshiganj Subdivision, Dacca District, Bangladesh.
D. C. Sircar, *Bhāratavarsha*, Jyaishṭha, B. S. 1348, pp. 768ff; *Ind. Cult.*, VII, pp. 405-16; N. K. Bhattasali, *Ep. Ind.*, XXVII, pp. 26 ff.
Language : Sanskrit
Script : Gauḍīya

Summary : In the 23RD YEAR of the illustrious GOVINDACHANDRADEVA, the image of Vāsudeva was caused to be made by Gaṅgādāsa, the Rālajika (inhabitant of Rālaja) and the son of Pāradāsa.

TEXT[1]

1 (A) श्रीमद्गो- (B) विन्दच- (C) न्द्रस्य सम्वत् २३
2 (A) रालजिक[2]-उ- (B) परत-पा- (C) रदास-सुतः
3 (A) गङ्गदा- (B) स-कारित-वा- (C) सुदेव-
4 (A) भट्टारक[3]

Corrected Text

श्रीमद्गोविन्दचन्द्रस्य संवत् २३ (संवत्सरे त्रयोविंशे) रालजिको-
परत-पारदाससुत-गङ्गादास-कारित-वासुदेव-भट्टारकः ॥[4]

1. From estampages and eye-copies kindly supplied by J. N. Gupta. See now Plate in *Ep. Ind.*
2. Bhattasali reads *Bālajīka* which he takes to mean the Barujīvī or betel-grower community.
3. Faint traces of a *visarga* may possibly be noticed after *ka* in the estampage.
4. Translation : In the year 23 of [the reign of] the illustrious Govindachandra, [this image of] Lord Vāsudeva [is] caused to be made by Gaṅgādāsa, son of the late Pāradāsa [and] an inhabitant of Rālaja.

C—Miscellaneous

No. 21— Gayā Śitalā Temple Inscription of Yakshapāla (c. 1075-85 A.D.)

Gayā, Gayā District, Bihar.

Kielhorn, *Ind. Ant.*, XVI, pp. 64 f.; R. D. Banerji, *Mem. A. S. B.*, V, pp. 76 f.; D. C. Sircar, *Ep. Ind.*, XXXVI, pp. 92ff.

Language : Sanskrit

Script : Gauḍīya

Metres : V. 1 **आर्या**; V. 2 **शार्दूलविक्रीडित**; V. 3 **वसन्ततिलक** V. 4 **शार्दूलविक्रीडित**; Vv. 5-6 **वसन्ततिलक**; V. 7 **शार्दूलविक्रीडित**; V. 8 **वसन्ततिलक**; V. 9 **शार्दूलविक्रीडित**; V. 10 **स्रग्धरा**; Vv. 11-12 **शार्दूलविक्रीडित**; V. 13-14 **श्लोक (अनुष्टुभ्)**.

Summary : At GAYĀ, the holy place on the bank of PHALGU, there was the illustrious ŚŪDRAKA who was honoured by the ruler of Gauḍa, apparently by recognising him as a vassal. His son was VIŚVARŪPA, whose son YAKSHAPĀLA built a temple of Maunāditya, Sahasraliṅga, Kamalārdhāṅgīna-Nārāyaṇa (combined image of Vishṇu and Lakshmī just like the Ardhanārīśvara form of Śiva and Pārvatī), Someśvara (twice), Phalgunātha, Vijayāditya and Kedāra, dug the tank called Uttaramānasa, and established a hall of charity.—Yakshapāla does not mention his Pāla overlord like his father (whose records are dated in the 15th year of Nayapāla and the 5th year of Vigrahapāla III) probably because his inscription was issued after the slaughter of Mahīpāla II, when the Pālas were passing through a crisis.

TEXT[1]

1. **ओं नमः सूर्याय ॥**
विषय-मधूत्कर-पूर्ण्णं प्राणिनिकायालि[ं] विश्व-शतपत्र(त्रम्) ।
अष्टाशा-दल-रम्यं प्रकाशयन्नवतु वो भा-

2. **नुः ॥** 1
तीर्थं फल्गु-वट(।*)दि-तीर्थ-घटना-व्याजेन सोपानिनी

गन्तॄणां परमस्य धौततमसां धाम्नो गया राजते ।
श्रीमत्यैव य-
3. या महीमय-मिलच्चित्रस्य जीवात्मना
शिल्पोत्कर्षममन्यतात्मनि विधिः कृत्वा त्रिलोकीमपि ॥ 2
अस्यां व(ब)भूव रिपु-वृन्दम-
4. निन्द्य-सौ(शौ)र्यः
कुर्व्वन्वन-प्रणयि-पत्र-निकेतनस्थं(स्थम्) ।
श्री-शूद्रकः स्वयमपूजयदिन्द्रकल्पो
गौडेश्वरो नृपति-लक्षण-पूज-
5. या यं(यम्) ॥ 3
तस्मादद्भुत-पौरुषाम्वु(म्बु)धिरभूत् श्री(भूच्छ्री)-विश्वरूपो नृपः
कीर्त्ति-श्री-मतयः स्वयंवरतया भेजुर्यमेकं पतिं(तिम्) ।
अ–
6. द्यापि स्फुरदुग्र-विक्रम-कथामाक[र्ण्ण]यद्यस्य च
स्वासंभूतिमराति-चक्रमसम-त्रासात्तदा श्ल(ा*)घते ॥ 4
लक्ष्मीं रिपोः
7. स्व-भुज-वीर्य-वसी(शी)कृतां यो
भोग्यां तथा विहितवा[न्] द्विजपुङ्गवानां(नाम्) ।
एषां यथा युवतयो द्युतिमादधाना
ना-
8. काङ्गना इव विरि(रे)जुरिला-तले(ऽ*)पि ॥ 5
यस्योज्व(ज्ज्व)लेन यशसा भ्रमता समन्ता–
च्चक्रे चिरं धवलिते विदिशां (शं)दि–
9. [श]ञ्च (।*)
लोकेष्वभिप्रथयितुं मृगलाञ्छनः स्व-
मेनाङ्कमुल्वणमहर्न्निशमा[द]धाति ॥ 6
येनाद्यापि चकाश(स)ति प्रतिदि-
10. शं देवालयाः कारिता
भूयाङ्शो(यांशो) हिमदीधिति-द्युति-मुषो मेदिन्यलङ्क(ा*)रिणः ।
मुत्याय(मूर्त्याया)मतया हिमाद्रि-शिखर-स्प–
11. र्द्धोच्छ्रितैर्म्मूर्द्धभिः
कुर्व्वन्तो वियति स्खलद्गतिरथं प्रस्थान-दुस्थं रविं(विम्) ॥ 7
धर्म्मस्य हृद्य इव सूनुरजातशत्रु-

स्तस्याथ
12. धैर्यनिलयो(ऽ*)जनि यक्षपालः।
लुप्तक्रतौ कलियुगस्य विजिम्भृते यः
कामान्भृशं क्रतुभुजः क्रतुभिः पु-
13. पोष ॥ 8
नोष्ड(नष्टो)(ऽ*)नङ्गतया परेष्वयमयं भिक्षाभुजा निर्ज्जितः
सर्व्वेणाप्यव(ब)ला-व(ब)लो(ऽ*)यमचिरस्थायी मनोभूर-
14. यं(यम्)।
इत्यन्यो विधिना मनोज्ञतनुभृज्जें(ज्जे)ता द्विषं(षां) यो भुजा-
दण्डैक-प्रव(ब)लः स्थिरो युधि सदा मीनध्वजो निर्म्मि-
15. तः ॥ 9
भूभारो रोहणो(ऽ*)भूदितर-तरु-तुलामाश्रितः कल्पशाखी
किं-धेनुः कामधेनुः क्षितितल-परिखा कीर्त्ति-
16. पात्रं पयोधिः।
इत्यासन्नादि-दातॄन्प्रति जगति गिरो गीयमाना नरेन्द्रे
यस्मिन्नभ्यर्थमानैर्व्वसुभिरविरतं तर्प्पयत्यर्थि-सा-
17. र्थान् ॥ 10
यद्धृतपद्म-कुटीरक-प्रणयितामापादिते श्रीपतौ
सुप्रीते(ऽ*)व्यभिचार(रि)णीत्व-रतया भक्त्या परिक्रीडितं(तम्)।
अर्थिभ्यो वि-
18. नियुक्तयाप्यनुदिनं पात्रे शुचौ जातया
मत्स्वामि-प्रियवास एष इति यः कामं श्रिया संशि(श्रि)तः ॥ 11
मौनादित्य-सहस्रलिङ्ग-
19. कमलार्द्धाङ्गीन-नारायण-
द्वि(द्वा)सोमेश्वर-फल्गुनाथ-विजयादित्याह्वयानां कृतो।
स प्र(प्रा)सादमचीकरद्दिविषदां केदारदेवस्य
20. च
ख्यातस्योत्तरमानसस्य खननं सत्रं(त्रं) वटे चाक्षये ॥ 12
सूर्या-चन्द्रमसौ यावद्यावत्क्षौणी ससागरा।
तावत् श्री(वच्छ्रौ)-यक्षपालस्य रा
21. जन्तां भुवि कीर्त्तयः ॥ 13
न्यायविद्या-विदां श्रेयानागीग्राम-कुलोद्भवः।
श्री-मुरारिर्द्विज-श्रेष्ठः प्रशस्तिमकरोदिमां(माम्) (॥*)
लिखितासौ
22. श्री-पद्मपाणिना (॥*)

1. From impressions.

No. 22 — Bhubaneswar Stone Inscription of Bhavadeva, Minister of Harivarman (c. 1090-1110 A.D.)

Bhubaneswar,[1] Puri District, Orissa.
Prinsep and Marshall, *JASB*, VI, pp. 88 ff.; Kielhorn, *Ep. Ind.*, VI, pp. 203 f.; N. G. Majumdar, *Ins. Beng.*, III, pp. 32 ff.
Language : Sanskrit
Script : Gauḍīya

Metres : Vv. 1-2, 4, 9, 12, 16, 19, 21-22, 25 वसन्ततिलक; Vv. 3, 14-15, 17, 20, 26-27, 30 शार्दूलविक्रीडित; Vv. 5, 27 आर्या; Vv. 6, 10, 13 अनुष्टुभ् (श्लोक); Vv. 7, 29 उपजाति; Vv. 8, 18 शिखरिणी; V. 11 वंशस्थ ; Vv. 23, 28 स्रग्धरा; V. 31 मन्दाक्रान्ता; V. 32 मालिनी; V. 33 प्रहर्षिणी.

Summary : In the Brāhmaṇa family that descended from Sāvarṇa and that lived at SIDDHALA-GRĀMA in RāḌHĀ (in the Ajay valley in the Burdwan region) in the country of Āryāvarta, flourished three brothers, viz. Mahādeva, Bhavadeva and Aṭṭahāsa. BHAVADEVA (I) received the village of HASTINĪ-BHIṬṬA as a grant from the king of GAUḌA and had eight sons, the eldest of whom was Rathāṅga. From Rathāṅga was born Atyaṅga. His son was Budha *alias* Sphurita. His son ĀDIDEVA was the minister of war and peace to the king of VAṄGA. His son Govardhana was born of his wife Devakī. Govardhana's first wife was Sarasvatī. His second wife Saṅgokā, the daughter of a VANDYAGHAṬĪYA BRĀHMAṆA, gave birth to BHAVADEVA (II) who for a long time served under king HARIVARMADEVA [of Vaṅga] as his minister of peace and war. Bhavadeva *alias* BĀLAVALABHĪ-BHUJAṄGA (title indicaing association with the college at Bālavalabhī), prominent among the exponents of the Brahmādvaita system of philosophy and conversant with the writings of the BHAṬṬA (Kumārila), was an antagonist of the Buddhists and was the author of a book on Horāśāstra. He wrote a treatise on Smṛiti as well and superseded the texts that were already in the field. Following the Bhaṭṭa, he wrote a guide to the Mīmāṁsā philosophy. He was proficient in Siddhānta, Tantra, Gaṇita, Arthaśāstra, Āyurveda, Astraveda and so forth. BHAVADEVA excavated a tank in a village in

RĀḌHĀ. He installed a stone image of NĀRĀYAṆA and built a temple in which were placed the images of NĀRĀYAṆA, ANANTA and NṚISIṀHA. In the service of the god a hundred damsels (*devadāsīs*) were engaged. A tank was excavated in the front of and a garden laid outside the temple. The eulogy was composed by Bhavadeva's friend VĀCHASPATI.

TEXT[2]

1. १˘[3] ओं नमो भगवते वासुदेव[ा]य ॥
गाढोपगूढ-कमला-कुच-कुम्भ-पत्त्र-
मुद्राङ्कितेन[4] वपुषा परिरिप्समान[:] ।
मा लुप्यतामभिनवा वनमालिकेति
वाग्देवतोपहसितो(ऽ*)स्तु हरिः श्रिये वः ॥ 1
वा(बा)[5]ल्यात्प्रभृत्यहरहर्य्यदुपासितासि
वाग्दे-

2. वते तदधुना फलतु प्रसीद ।
वक्तास्मि भट्ट-भवदेव-कुल-प्रशस्ति-
सूक्ताक्षराणि रसनाग्रमधिश्रयेथाः ॥ 2
सावर्ण्णस्य मुनेर्म्महीयसि कुले ये जज्ञिरे श्रोत्रिया-
स्तेषां शासनभूमयो जनि-गृहं[6]-ग्रामाः शतं सन्तु ते ।
आर्यावर्त्त-भुवाम्वि-[7]

3. भूषणमिह ख्यातस्तु सर्व्वाग्रिमो
ग्रामः सिद्धल एव केवलमलङ्कारो(ऽ*)स्ति राढा-श्रियः ॥ 3
सत्पल्लवः स्थितिमयो दृढव(ब)द्ध-मूलः
शाखाग्र-लग्न-मुखर-द्विज-शीलित-श्रीः ।
न ग्रन्थिलो न कुटिलः सरलः सुपर्व्वा
सर्व्वोन्नतः सुखमिह प्रससार वंशः ॥ 4

4. तद्वंशोत्तंसमणेः[8] कलश्य[9] दातापि तापनप्रतिमः ।
भव इव विद्यातत्त्व-प्रभवः प्रव(ब)भूव भवदेवः ॥ 5
अग्रजानुजयोर्म्मध्ये महादेवाट्टहासयोः ।
स जज्ञे यज्ञपुरुषो विरिञ्चि-हरयोरिव ॥ 6

स शासनं गौड-नृपादवा-

5. प

श्री-हस्तिनीभिट्टमभीष्ट-भूमि ।
अष्टौ सुतानष्ट-महेश-मूर्त्ति-[10]
प्रख्यान् विजज्ञे(ऽ*)थ रथाङ्ग-मुख्यान् ।। 7
रथाङ्गादत्यङ्गः समजनि जनानन्द-जननः
शशीव क्षीरोदादविकल-कला-केलि-निलयः ।
स्फुरत्प्रज्ञाज्योतिः स्फुरित इति नाम्ना दि-

6. शि दिशि

प्रकाशो(ऽ*)भूत्सौम्य-ग्रह इव वु(बु)धस्तस्य तनयः ।। 8
तस्मादभूदभिजनाभ्युदयैक-वीज-
मव्याज-पौरुष-महातरु-मूल-कन्दः ।
श्री[11]-आदिदेव इति देव इवादिमूर्त्ति-
र्म्म[त्त्र्या]त्मना भुवनमेतदलङ्करिष्णुः ।। 9
यो वङ्गराज-

7. राज्य-श्री-विश्राम-सचिवः शुचिः ।

महामन्त्री महापात्रमव(ब)न्ध्यः सन्धिविग्रही ।। 10
स देवकी-गर्ब्भ(र्भ)-भं(भ)वं भुवः स्थितौ
समर्थमुच्चैःपद-लब्ध(ब्ध)-पौरुषं(षम्) ।
सरस्वती-जानिमजीजनत्सुतं
जगत्सु गोवर्द्धनमच्युतोपमं(मम्) ।। 11
वीर-स्थलीषु च सभासु च ती-

8. थिकानां

दो[र्ल्ली]लया च कलया च वचस्वितायाः ।
यो वर्द्धयन् वसुमतीञ्च सरस्वतीञ्च
द्वेधा व्यधत्त निज-नाम-पदं सदर्थं(र्थम्) ।। 12
वन्द्यां वन्दघटीयस्य व्र(ब्र)ह्मणः प्रयतां सुतां(ताम्) ।
साङ्गोकामङ्गनारत्नम्पत्नीं स परिणीतवान् ।। 13
तस्यां स्वप्न-[वि]धा-

9. न-वो(बो)धित-निजोत्पादः स देवो हरि-

र्जातः श्री-भवदेव-मूर्त्तिरमुतः क्ष्मामण्डली-कश्यपात् ।
यत्पाणि-प्रणयि द्वयञ्जलजयोरालक्षितं लक्ष्मणा
यस्यान्तर्न्निहितो(ऽ*)स्ति कौस्तुभ इति ज्ञातं प्रकाशोदयात् ।। 14

लक्ष्मीन्दक्षिणदोष्णि मन्त्र-विभवे विश्व-
10. म्भरा-मण्डलं
जिह्वाग्रे च सरस्वती रिपुतनौ नागान्तकं पत्त्रिणं[12] ॥
चक्रम्पादतले निवेशितवता दिव्यन्तदाद्यम्वपु-[13]
र्निह्नोतुन्निज-चिह्नमेतदमुना नूनम्वि[14]पर्यासितं[12] ॥ 15
यन्मन्त्र-शक्ति-सचिवः सुचिरं चकार
राज्यं स धर्म्मविजयी
11. हरिवर्म्मदेवः ।
तन्नन्दने वलति यस्य च दण्डनीति-
वर्त्मानुगा[15] व(ब)हल-कल्प-लतेव लक्ष्मीः ॥ 16
सत्पात्रस्य महाशयस्य कमलाधारस्य यस्य क्षमा-
म्वि(म्बि)भ्राणस्य गुणाम्व(म्बु)धेरकलितस्यान्तर्न्न दीनात्मनः ।
मर्य्यादा-महिम-प्रसा-
12. द-शुचिता-गाम्भीर्य्य-धैर्य्य-स्थिति-
प्रायाः प्रायश एव वाक्पथमतिक्रान्ताः स्वदन्ते गुणाः ॥ 17
महागौरी कीर्तिः स्फुरदसि-कराला भुजलता
रण-क्रीडा चण्डी रिपु-रुधिर-चर्च्चा रणभुवः (।*)
महालक्ष्मीर्म्मूर्त्तिः प्रकृति-ललि-
13. तास्ता गिर इति
प्रपञ्चः शक्तीनां यमिह परमेशं प्रथयति ॥ 18
यद्व्रा(ब्रा)ह्म-तेजसि व(ब)लीयसि मन्दवीर्य्यः
खद्योत-पोतकर्रणं तरणिस्तनोति ।
उच्चैरुदञ्चति यदीय-यशः-शरीरे
जातस्तुषारशिखरी ननु जानुदघ्नः ॥ 19
व्र(ब्र)ह्मा-
14. द्वैतविदामुदाहरण-भूरुद्भूत-विद्याद्भुत-
स्रष्टा भट्ट-[16]गिरां गभीरिम-गुण-प्रत्यक्ष-दृश्वा कविः ।
वौ(बौ)द्धाम्भोनिधि-कुम्भसम्भव-मुनिः पाषण्ड-वैतण्डिक-
प्रज्ञा-खण्डन-पण्डितो(ऽ*)यमवनौ सर्व्वज्ञलीलायते ॥ 20
सिद्धान्त[17]-तन्त्र[18]-गणि-
15. तार्ण्णव-पारदृश्वा
विश्वाद्भुत-प्रसविता फल[19]-संहितासु ।
कर्त्ता स्वयं प्रथयिता च नवीन-होरा-
शास्त्रस्य यः स्फुटमभूदपरो वराहः[20] ॥ 21
यो धर्म्म-शास्त्र-पदवीषु जरन्निव(ब)न्धा-
न्न्धीचकार रचितोचित-सत्प्रव(ब)न्धः ।

सुव्याख्यया विशद-

16. यन्मुनि-धर्म्म-गाथाः
स्मार्त्तक्रिया-विषय-संशयमुन्ममार्ज्ज ॥ 22
मीमान्सा[21]यामुपायः स खलु विरचितो येन भट्टोक्त-नीत्या
यत्र न्यायाः सहस्रं रवि-किरण-समा न क्षमन्ते तमान्सि[22] ।
किं भूम्ना सीम्नि साम्नां सकल-कवि-कलास्वागमेष्ववर्थ-

17. शास्त्रे-
ष्वायु[र्व्वे]दास्त्रवेद-प्रभृतिषु कृतधीरद्वितीयो(ऽ*)यमेव ॥ 23
यस्य खलु वा(बा)लवलभीभुजङ्ग इति नाम नादृतं केन ।
मीमान्सयापि[23] स-पुलकमार्कण्णित-वर्ण्णितोद्गीतं[12] ॥ 24
दंष्ट्राल-दुष्ट-भुजग-व्रण-मोह-रात्रि[24]
प्रत्यूष-तूर्य्य-निन-

18. दैरिव मन्त्रवर्ण्णैः ।
यो जीवयन्[25] जगदशेषमभूदपूर्व्व-
मृत्युञ्जयो गरल-केलिसु नीलकण्ठः ॥ 25
राढायामजलासु जाङ्गल-पथ-ग्रामोपकण्ठस्थली-
सीमासु श्रम-मग्न-पान्थ-परिषत्प्राणाशय-प्रीणनः ।
येनाकारि जलाशयः प-

19. रिसर-स्नाताभिजाताङ्गना-
वक्त्राब्ज(ब्ज)-प्रतिविम्ब(म्ब)-मुग्ध-मधुपी-शून्याब्जि(ब्जि)नी-काननः॥ 26
तेनायं भगवान् भवार्ण्णव-समुत्ताराय नारायणः
शैल-सेतुरिव प्रसाधित-धरापीठः प्रतिष्ठापितः ।
यः प्राचीवदनेन्दु-नील-तिलको लीलावतन्सोत्पलं[25a]
भू-

20. मेर्भूतल-पारिजात-विटपी संकल्प-सिद्धिप्रदः ॥ 27
तेन प्रासाद एष त्रिपुरहर-गिरि-स्पर्द्धया वर्द्धित-श्रीः
श्रीमान् श्रीवच्छ[26]-लक्ष्म[ा] हरिरिव विहितो विस्फुरच्चक्रचिह्नः ।
जित्वा यो वैजयन्तं वियति वितनुते वैजयन्ती-विलासान्
कैलासे

21. नाभिलाषं कलयति गिरिशे यस्य संलक्ष्य लक्ष्मीं[12] ॥ 28
न्यवीविशद्वेश्मनि तत्र विष्णोः
स निर्व्भ(र्भ)रं गर्व्भ(र्भ)-गृहान्तरेषु ।
नारायणानन्त-नृसिंह-मूर्त्ति-

र्व्विधातृ-वक्त्रेष्विव वेदविद्याः ॥ 29
एतस्मै हरिमेधसे वसुमती-विश्रान्त-विद्याधरी-
विभ्रान्ति-
22. न्दधतीः शतं स हि ददौ शारङ्गशावी-दृशः ।
दग्धस्योग्रदृशा दृशैव दिशतीः कामस्य संजीवनं
काराः कामिजनस्य सङ्गम-गृहं सङ्गीत-केलि-श्रियां[12] ॥ 30
प्रासादाग्रे स खलु जगतः पुण्य-पण्यैक-वीथीं
चक्रे वापीं मरकत-मणि-स्व-
23. च्छ-सुच्छाय-तोयां[12] ।
मध्ये वारि प्रतिकृतिमिषाद्दर्शयन्तीव तादृ-
ग्विष्णोर्द्धामाद्भुतमहिकुलस्याधिकं या चकास्ति ॥ 31
व्यधित विवु (बु) ध-धाम्नः सीम्नि संसार-सारं
स खलु निखिल-नेत्रानन्द-निस्यन्द-पात्रं[12] ।
त्रिभुवन-जय-खिन्नानङ्ग-विश्रा-
24. म-धाम
प्रथित-रति-विभाव-स्थानमुद्यान-रत्नं[12] ॥ 32
तस्यैव प्रिय-सुहृदा द्विजाग्रिमेण
श्री-वाचस्पति-कविना कृता प्रशस्तिः ।
आकल्पं शुचि-सुरधाम-मूर्त्ति-कीर्त्ते-
रध्यास्तां जघनमियं सुव[र्ण्ण] काञ्ची ॥ 33
— — — — — — — —[27]

25. [28]प्रशस्तिरियं वा (बा) लवलभीभुजङ्गापरनाम्नो भट्ट-श्री-भवदेवस्य ।

1. The inscription is said to have been originally fixed on the temple of Ananta-Vāsudeva at Bhubaneswar. It was taken out in 1810 by General Stewart along with another inscription belonging to the reign of the Gaṅga king Aniyaṅkabhīma, and brought over to the Asiatic Society of Bengal, Calcutta. This was taken strong objection to by the priests of Bhubaneswar; and in 1837 Major Kittoe arranged with the Society for the restitution of the inscribed stones. They were accordingly sent back, but instead of being placed in their original positions, the stones were fixed on the western wall of the temple courtyard where they may be seen even now. See *JASB*, 1837, pp. 278 ff.; R. L. Mitra, *Antiquities of Orissa*, II, p. 85. P. Acharya suggests that the inscription was engraved on the wall of a temple built by Bhavadeva in Bengal, but was wrongly sent to Bhubaneswar in place of a genuine Bhubaneswar inscription lying with the Asiatic Society. He seems to be right. See *Proc. IHC*, Calcutta, 1939, pp. 287 ff.

2. From the facsimile in *Ins. Beng.*, III.
3. Symbol for *siddham* or *siddhir=astu.*
4. *To* was originally engraved.
5. The record does not distinguish between *va* and *ba*, the latter being in all cases indicated by the sign for the former.
6. Read *gṛiha-grāmā.*
7. Read *bhuvāṁ vi°*.
8. Read *maṇiḥ.*
9. Read *phalasya* as suggested by Princep. Kielhorn suggests *kal-āva-dāto='pi.*
10. The eight *mūrtis* of Śiva are referred to in the *Agnipurāṇa*, 96.87: *Śarvaṁ Paśupatiṁ Yogaṁ Rudraṁ Bhavam=ath=Eśvaram / Mahādevañ=cha Bhīmañ=cha mantrās=tad-vāchakā ime.*
11. The rule of *sandhi* has not been observed owing to the requirement of the metre.
12. One would expect final *m* instead of the *anusvāra.*
13. Read *°d-ādyaṁ va°*.
14. Read *nūnaṁ vi°*.
15. *Rrtmo* was originally engraved.
16. Bhaṭṭa is evidently the same as Bhaṭṭa Kumārila.
17. The *Siddhāntas* are five in number; cf. *Bṛihatsaṁhitā*, II.
18. According to Kielhorn (who refers to Thibaut's *Astronomy*, p. 64) *tantra* treats of "the motions of heavenly bodies."
19. As Majumdar points out, the *Bṛihatsaṁhitā* has been explained by Utpala as *Phala-grantha.*
20. Varāha is evidently the celebrated Varāhamihira.
21. Read *Mīmāṁsā.*
22. Read *tamāṁsi.*
23. Read *mīmāṁsay=āpi.*
24. We can also arrange *°rātri-pratyūsha.*
25. Read *jīvayañ=jagad°*.
25a. Read *°vataṁs=o°*.
26. Read *śrīmāñ=chchhrīvatsa°*.
27. Some eight letters are illegible here.
28. The line commences below the *aksharas jāgri* of the word *dvij-āgrimeṇa* of the previous line.

No. 23—Rājghāṭ Stone Inscription of Bhīmadeva, [Minister of Madanapāla (c. 1143-62 A. D.)]

Rājghāṭ at Vārāṇasī, Varanasi District, U.P.
D. C. Sircar, *Ep. Ind.*, XXXII, pp. 277 ff.; Vol. XXXVII, pp. 245 f.

Language : Sanskrit
Script : Early Nāgarī
Metres : Vv. 1, 3, 6 Āryā; V. 2 Gīti; V. 4 Śārdūlavikrīḍita; V. 5 Vasantatilaka; V. 7 Anushṭubh.

Summary : MAṄGADEVA, the *Mahāsāndhivigrahika* and a member of the council of hereditary ministers of the king of GAUḌA, had a son CHAṄGADEVA by name, who received the title 'Rāṇaka of the Kingdom' which was very difficult to obtain. Chaṅgadeva's son, BHĪMADEVA, who was the *Mahāsāndhivigrahika* of the lord of the GAUḌA country, saved the kingdom of GAUḌA-VARENDRA after it had been immersed in the waters of the ocean that was the forces of the king of the RĀYĀRI lineage[1] and the king of KALIṄGA.—On the bank of the Avimukta-nadī (i.e. Gaṅgā at Vārāṇasī), Bhīmadeva constructed a temple of the god BHAVA (Śiva).—This BHĪMADEVA was the *Sandhivigrahika* of the Pāla king MADANAPĀLA (c. 1143-62 A.D.) and executed the latter's Manahali copper-plate grant issued in the eighth regnal year. The present inscription points to Madanapāla's success against the Gāḍhavālas in the Vārāṇasī region.

TEXT[1a]

1. सिद्धम्[2] (॥*) [न]मः शिवाय ॥
गौडमहीभृन्मौलामात्य-स[भा]यां सं[भा]जि[तारिरभूत्] ।
देव इव [मंग[3]]-[।[4]]
2. देवः क्षितिप-महासांधिविग्रहिकः ॥ 1
श्री-चंगदेवमजन[य]दयमथ तनयं प्र[सि]द्ध-नयविनय-
3. म् ।
प्राप दुरापां रा[ण]क-पदवीम[लघी]यसीं स रा[ज्य] स्य ॥ 2
[तस्य] तनूजः श्रीमानुदपद्यत भीमदेव इ-
4. ति विदितः ।

स च गौडावनि-जानेरजनि महासा[ं]धिविग्रहिकः ॥ 3
भिन्नारि-द्विप-निर्ज्जि[ता]नयदिषु- ।[6]

5. स्तोमातिरोमांचभू-
द्युद्धो[र्व्वी] कथितं द्विरुक्ति-चकिता प्राप्ता न यद्विक्रमम् ।
दानायानिशमुज्झु(ज्झि)तांवु(बु)-

6. सरितो येन स्थले वाहिता-
स्तत्प्रत्याहरता [स]रि[त्]कु[ल]-तला[दु]ल्लासिता धूलयः ॥ 4
रायारिवंश-नरना-

7. थ-कलि(ं*)गराज-
मुख्यारि-वीरव(ब)ल-वारिधिमध्य-[गुप्तं(प्तम्)][7] ।
[ये]नोदधारि गुरु-गौड-वरे[न्द्र]-[8]राज्य[ं]
मज्जत्पु- ॥[9]

8. रातन-वहित्र-चरि[त्र-चा]रि ॥ 5
विपुल-शिलामय[मि]दमयमविमुक्त-[न]दी-[10]ललाटतल-तिलकम् ।
भव-[भ]-

9. [वनं] महदरचयदरिचय-चेतश्चमत्कृतये ॥ 6
[सर्व]-सेव्य[मि]दं न्याय[तो](ऽ*)धिदेवकुलायते ।
आदि- ॥[11]

10. त्य-[का]च-[प्र]त्यय-गांगेय-कलश-ध्वजम् ॥ 7

1. The reference may be to king Rāyārideva Trailokyasiṁha, grandfather of Vallabhadeva of the Assam plates of Śaka 1107 (1185 A. D.). See *Ep. Ind.*, V, pp., 183 ff.

1a. From impressions.

2. Expressed by symbol.

3. Originally I was inclined to read this name differently. But the most probable reading of the damaged letters now appears to me to be *maṁga*. The first letter does not appear to be *ga*.

4. These *daṇḍas*, which were incised to cover up a little space at the end of the line, are unnecessary.

5. Originally I was inclined to read the name as *Vaṁga*: but the first letter looks more like *cha* than *va*.

6. The *daṇḍa* is redundant (cf. note 4 above).

7. The reading may also be *luptaṁ*.

8. The reading is possibly not *narendra*.

9. These superfluous *daṇḍas* have a cancellation mark (cf. note 4 above).

10. The reading may possibly also be *taṭī* meaning 'the bank of the river'.

11. This unnecessary *daṇḍa* bears a cancellation mark (cf. notes 4 and 9 above).

Chapter V

THE SENAS OF BENGAL AND BIHAR AND THEIR SUCCESSORS

A—The Senas

No. 24—Deopāḍā Stone Inscription of Vijayasena (c. 1096-1159 A.D.)

Deopāḍā,[1] Rajashahi District, Bangladesh.
Metcalfe, *JASB,* XXXIV, i, pp. 128-54; Kielhorn, *Ep. Ind.*, I, pp. 307 ff.; N. G. Majumdar, *Inscriptions of Bengal*, III (1929), pp. 46 ff.

Language : Sanskrit
Script : Gauḍīya
Metres : Vv. 1, 20, 22, 33, 35 **वसन्ततिलक**; Vv. 2-3, 6, 12-13, 17-19, 21, 25, 27, 30, 32 **शार्दूलविक्रीडित**; Vv. 4-5, 9, 11, 23, 26, 31 **स्रग्धरा**; Vv. 7, 15, 29 **पृथ्वी**; Vv. 8,34 **मन्दाक्रान्ता**; Vv. 10, 16 **मालिनी**; V. 14 **शिखरिणी**; V. 24 **इन्द्रवज्रा**; Vv. 28, 36 **उपजाति**.

Summary : In the LINEAGE OF THE MOON were born VĪRASENA and others who were kings of Dākshiṇātya. In that family flourished Sāmantasena, the head-garland of the BRAHMA-KSHATRIYAS (mixed Brāhmaṇa-Kshatriya community). He defeated the despoilers of the royal fortune of KARṆĀṬA. In his later years he retired to a hermitage on the banks of the GANGES. His son was HEMANTASENA. His son, from his wife YAŚODEVĪ, was VIJAYASENA who defeated the kings of GAUḌA, KĀMARŪPA and KALIṄGA and threatened NĀNYA (the Karṇāṭa king of North Bihar), RĀGHAVA (the Gaṅga king of Kaliṅga, 1156-70 A.D.), VARDHANA and VĪRA. He also led a naval expedition along the Ganges in order to conquer the kings OF THE WEST.—Vijayasena built a temple and installed therein the image of the god PRADYUMNEŚVARA (Hari-Hara) and excavated

a tank in its vicinity. The composer of the *praśasti* was the poet UMĀPATIDHARA and the engraver was *Rāṇaka* ŚŪLAPĀṆI who was the crest-jewel of the guild of artisans of VARENDRA, and the son of Bṛihaspati, grandson of Manodāsa and great-grandson of Dharma.

TEXT[2]

1. सिद्धम्[3] ॥ ओँ नमः शिवाय ॥
वक्षोंशुकाहरण-साध्वस-कृष्ट-मौलि-
माल्यच्छटाहृत-रतालय-दीप-भासः ।
देव्यास्त्रपामुकुलितं मुखमिन्दुभाभि-
र्व्वीक्ष्याननानि हसितानि जयन्ति शम्भोः ॥ 1
लक्ष्मीवल्लभ- ।[4]
2. शैलजादयितयोरद्वैत-लीलागृहं
प्रद्युम्नेश्वरशव्द(ब्द)-[5]लाञ्छनमधिष्ठानं नमस्कुर्म्महे ।
यत्रालिङ्गन-भङ्ग-कातरत[या[6]] स्थित्वान्तरे कान्तयो-
र्द्देवीभ्यां कथमप्यभिन्नतनुता शिल्पेऽन्तरायः कृतः ॥ 2
यत्सिंहासनमीश्वर-[7]
3. स्य कनकप्राय[ं] जटामण्डलं
गङ्गा-शीकरमञ्जरी-परिकरैर्यच्चामर-प्रक्रिया ।
श्वेतोत्फुल्ल-फणाञ्चलः शिवशिरः-सन्दानदामोरग-
श्छत्रं यस्य जयत्यसावचरमो राजा सुधादीधितिः ॥ 3
वंशे तस्यामरस्त्री-वि-
4. तत-रतकला-साक्षिणो दाक्षिणात्य-
क्षौणीन्द्रैर्व्वीरसेन-प्रभृतिभिरभितः कीर्त्तिमद्भिर्व्वं(र्ब्बं)भूवे ।
यच्चारित्रानुचिन्ता-परिचय-शुचयः सूक्ति-माध्वीक-धाराः
पाराशर्य्येण विश्वश्रवण-परिसर-प्रीणनाय प्रणीताः ॥ 4
तस्मिन्से-
5. नान्ववाये प्रतिसुभट-शतोत्सादन-व्र(ब्र)ह्मवादी
स व्र(ब्र)ह्मक्षत्त्रियाणामजनि[4a] कुलशिरोदाम सामन्तसेनः ।
उद्गीयन्ते यदीयाः स्खलदुदधिजलोल्लोल-शीतेषु सेतोः
कच्छान्तेष्वप्सरोभिर्द्दशरथतनय-स्पर्द्धया युद्धगाथा-
6. :॥ 5
यस्मिन् सङ्गरचत्वरे पटुरटत्तूर्य्योपहूतद्विष-

द्दुर्ग्गे येन कृपाण-कालभुजगः खेलायितः पाणिना ।
द्वैधीभूत-विपक्ष-कुञ्जरघटा-विश्लिष्ट-कुम्भस्थली-
मुक्तास्थूल-वराटिका-परिकरैर्व्व्या-
प्तं तदद्याप्यभूत् ॥ 6

7. गृहाद्गृहमुपागतं व्रजति पत्तनं पत्तना-
द्वनाद्वनमनुद्रुतं भ्रमति पादपं पादपात् ।
गिरेर्ग्गिरिमधिश्रितन्तरति तोयधिन्तोयधे-
र्यदीयमरि-सुन्दरी-सरक-पृष्ठलग्नं यशः ॥ 7

दुर्व्वृत्तानामयमरि-
8. कुलाकीर्ण्ण-कर्ण्णाट-लक्ष्मी-
लुण्टाकानां कदनमतनोत्तादृगेकाङ्ग-वीरः ।
यस्मादद्याप्यविहत-वसा-मान्स-[8]मेदः-सुभिक्षां
हृष्यत्पौरस्त्यजति न दिशं दक्षिणां प्रे[त]-भर्त्ता ॥ 8

उद्गन्धीन्याज्यधूमैर्म्मृगशिशुरसिताखिन्न-
9. वैखानसस्त्री-
स्तन्यक्षीराणि कीर-प्रकर-परिचित-त्र(ब्र)ह्म-पारायणानि ।
येनासेव्यन्त शेषे वयसि भवभयास्कन्दिभिर्म्मस्करीन्द्रैः
पूर्ण्णोत्सङ्गानि गङ्गा-पुलिन-परिसरारण्य-पुण्याश्रमाणि ॥ 9

अचरम-परमात्मज्ञान-भी-
10. ष्मादमुष्मा-
न्निज-भुज-मद-मत्तारातिमाराङ्क-वीरः ।
अभवदनवसानोद्भिन्न-निर्णिक्त-तत्त-
द्गुण-निवहमहिम्नां वेश्म हेमन्तसेनः ॥ 10

मूर्द्धन्यर्द्धेन्दुचूडामणि-चरणरजः सत्यवाक्कण्ठभित्तौ
शास्त्रं श्रोत्रे(ऽ*)रि-
11. केशाः पदभुवि भुजयोः क्रूर-मौर्व्वी-किणाङ्कः ।
नेपथ्यं यस्य जज्ञे सततमियदिदं रत्न-पुष्पाणि हारा-
स्ताडङ्कं नूपुरस्त्रक्कनक-वलयमप्यस्य भृत्याङ्गनानाम् ॥ 11

यद्दोर्व्वल्लि-विलास-लव्ध(ब्ध)गतिभिः शल्यैर्व्विदीर्ण्णोरसां[9]
12. वीराणां रण-ती[र्थ]-वैभववशाद्दिव्यं वपुर्व्व(र्ब्ब)भ्रताम् ।
संसक्तामरकामिनी-स्तनतटी-काश्मीरपत्राङ्कितं
वक्षः प्रागिव मुग्धसिद्ध-मिथुनैः सातङ्कमालोकितम् ॥ 12

प्रत्यर्थि-व्ययकेलि-कर्म्मणि पुरः स्मेरं मुखं वि(बि)भ्रतो
रे-

13. तस्यैतदसेश्च कौशलमभूद्दाने द्वयोरद्भुतम् ।
शत्रोः को(ऽ*)पि दधेऽवसादमपरः सख्युः प्रसादं व्यधा-
देको हारमुपाजहार सुहृदामन्यः प्रहारं द्विषाम् ॥ 13
महाराज्ञी यस्य स्व-पर-निखिलान्तःपुरवधू-
14. शिरोरत्नश्रेणी-किरणसरणि-स्मेरचरणा ।
निधिः कान्ते[:] साध्वी-व्रत-वितत-नित्योज्ज्वल-यशा
यशोदेवी नाम त्रिभुवन-मनोज्ञाकृतिरभूत् ॥ 14
ततस्त्रिजगदीश्वरात्समजनेष्ट[10] देव्यास्ततो(*ऽ)-
प्यराति-व(ब)लशातनोज्ज्व-
15. ल-कुमारकेलिक्रमः
चतुर्ज्जलधि-मेखलावलयसीम-विश्वम्भरा-
विशिष्टजय-सान्वयो विजय[से]न-पृथ्वीपतिः ॥ 15
गणयतु गणशः को भूपतींस्ताननेन
प्रतिदिनरणभाजा ये जिता वा हता वा ।
इह जगति विषे-
16. हे स्वस्य वंशस्य पूर्व्वः
पुरुष इति सुधांशौ केवलं राजशव्दः(ब्दः) ॥ 16
संख्यातीत-कपीन्द्रसैन्य-विभुना तस्यारिजेतुस्तुलां
किं रामेण वदाम पाण्डव-चमूनाथेन पार्थेन वा ।
हेतोः खड्गलतावतंसित-भुजामातस्य[11] येनार्ज्जितं
सप्ता-
17. म्भोधितटी-पिनद्धवसुधा-चक्रैकराज्यं फलम् ॥ 17
एकैकेन गुणेन यैः परिणतं तेषां विवेकादृते
कश्चिद्धन्त्यपरश्च रक्षति सृजत्यन्यश्च कृत्स्नं जगत[12] ।
देवो(ऽ*)यं तु गुणैः कृतो व(ब)हुतिथैर्धीमान्[13] जघान द्विषो
वृत्तस्थानपुषच्चकार च
18. रिपुच्छेदेन दिव्याः प्रजाः ॥ 18
दत्त्वा दिव्यभुवः प्रतिक्षितिभृतामुर्व्वीमुरीकुर्व्वता
वीरासृग्लिपि-लाञ्छितोऽसिरमुना प्रागेव पत्रीकृतः ।
नेत्थं चेत् कथमन्यथा वसुमती भोगे विवादोन्मुखी
तत्राकृष्टकृपाणधारिणि गता भ-[14]
19. ङ्गं द्विषां सन्ततिः ॥ 19
त्वं नान्य-वीर-विजयीति गिरः कवीनां
श्रुत्वाऽन्यथामनन-रूढ-निगूढ-रोषः ।

गौडेन्द्रमद्रवदपाकृत कामरूप-
भूपं कलिङ्गमपि यस्तरसा जिगाय ॥ 20
शूरंमन्य इवासि नान्य किमिह स्वं राघव श्लाघसे
स्प-
20. र्द्धां वर्द्धन मुञ्च वीर विरतो नाद्यापि दर्प्पस्तव ।
इत्यन्योन्यमहर्न्निश-प्रणयिभिः कोलाहलैः क्ष्माभुजां
यत्कारागृह-यामिकैर्न्नियमितो निद्रापनोद-क्लमः ॥ 21
पाश्चात्यचक्र-जय-केलिषु यस्य याव-
द्गङ्गाप्रवाहमनुधावति[16]
21. नौ-विताने ।
भर्गस्य मौलिसरि[17]दम्भसि-भस्मपङ्क-
लग्नोज्झितेव तरिरिन्दु-कला चकास्ति ॥ 22
मुक्ताः कर्प्पासवीजैर्म्मरकतशकलं शाकपत्रैरलावू(बू)-
पुष्पै रूप्याणि रत्नं परिणतिभिदुरैः कुक्षिभिर्द्दाडिमानाम् ।
कुष्माण्डीवल्लरीण[ां ि]व-
22. कसितकुसुमैः काञ्चनं नागरीभिः
शिक्ष्यन्ते यत्प्रसादाद्व(द्ब)हुविभवजुषां योषितः श्रोत्रियाणाम् ॥ 23
अश्रान्तविश्राणित-यज्ञयूप-
स्तम्भावलीं व्रागवलम्व(म्ब)मानः ।
यस्यानुभावाद्भुवि सञ्चचार
कालक्रमादेक-पदो(ऽ*)पि धर्म्मः ॥ 24
मेरोरा-
23. हत-वैरिसङ्कुल-तटादाहूय यज्वामरान्
व्यत्यासं पुरवासिनामकृत यः स्वर्ग्गस्य मर्त्त्यस्य च ।
उत्तुङ्गैः सुरसद्मभिश्च विततैस्तल्लैश्च शेषीकृतं
चक्रे येन परस्परस्य च समं द्यावापृथिव्योर्व्वपुः ॥ 25
दिक्शाखामूलकाण्डं गगनतल-म-[18]
24. हाम्भोधिमध्यान्तरीयं
भानोः प्राक्प्रत्यगद्रि-स्थितिमिलदुदयास्तस्य मध्याह्नशैलम् ।
आलम्व(म्ब)स्तम्भमेकं त्रिभुवनभवनस्यैकशेषं गिरीणां
स प्रद्युम्नेश्वरस्य[19] व्यधित वसुमतीवासवः सौधमुच्चैः ॥ 26
प्रासादेन तवामुनैव हरितामध्वा[20]
25. निरुद्धो मुधा
भानो(ऽ*)द्यापि कृतो(ऽ*)स्ति दक्षिणदिशः कोणान्तवासी मुनिः ।

अन्यामुच्छपयो(ऽ*)यमृच्छतु दिशं विन्ध्यो(ऽ*)प्यसौ वर्द्धतां
यावच्छक्ति तथापि नास्य पदवीं सौधस्य गाहिष्यते ।। 27
स्रष्टा यदि स्रक्ष्यति भूमिचक्रे
सुमेरुमृत्पिण्ड-विव-
26. र्त्तनाभिः ।
तदा घटः स्यादुपमानमस्मिन्
सुवर्ण्ण-कुम्भस्य तदर्प्पितस्य ।। 28
विलेशयविलासिनी-मुकुटकोटिरत्नाङ्कुर-
स्फुरत्किरणमञ्जरी-च्छुरितवारिपुरं पुरः ।
चखान पुरवैरिणः स जलमग्न-[21]
27. पौराङ्गना-
स्तनैण-मदसौरभोच्चलित-चञ्चरीकं सरः ।। 29
उच्चित्राणि दिगम्व(म्ब)रस्य वसनान्यर्द्धाङ्गना-स्वामिनो
रत्नालंकृतिभिर्व्विशेषित-वपुः शोभाः शतं सुभ्रुवः ।
पौराद्याश्च पुरीः श्मशानवसतेर्भिक्षाभु-
28. जो(ऽ*)स्याक्षयां
लक्ष्मीं स व्यतनोद्दरिद्रभरणे सुज्ञो हि सेनान्वयः ।। 30
चित्रक्षौमेभचर्म्मा हृदय-विनिहित-स्थूलहारोरगेन्द्रः
श्रीखण्डक्षोद-भस्मा करमिलित-महानीलरत्नाक्षमालः ।
वेषस्तेनास्य तेने गरुडमणिलता-गोन-[22]
29. सः कान्तमुक्ता-
नेपथ्य-न्यस्थिरिच्छासमुचित-रचनः कल्पकापालिकस्य ।। 31
वा(बा)होः केलिभिरद्वितीय-कनकच्छत्रं धरित्रीतलं
कुर्व्वाणेन न पर्य्यशेषि किमपि स्वेनैव तेनेहितम् ।
किन्तस्मै दिशतु प्रसन्नवरदो(ऽ*)प्यर्द्धेन्दुमौलिः
30. परं
स्वं सायुज्यमसावपश्चिम-दशाशेषे पुनर्द्दास्यति ।। 32
प्रस्तोतुमस्य परितश्चरितं क्षमः स्यात्
प्राचेतसो यदि पराशरनन्दनो वा ।
तत्कीर्त्तिपूर-सुरसिन्धु-विगाहनेन
वाचः पवित्रयितुमत्र तु नः प्रयत्नः ।। 33
यावद्वास्तोस्पति-
31. पुरधुनी भूर्भुवः स्वः पुनीते
यावच्चान्द्री कलयति कलोत्तंसतां भूतभर्त्तुः ।

यावच्चेतो गमयति सतां श्वेतिमानं त्रिवेदी
तावत्तासां रचयतु सखी तत्तदेवास्य कीर्त्तिः ॥ 34
र्निण्णवत-सेनकुलभूपति-मौक्तिकाना-
मग्रन्थिल-ग (ग्र) -
32. थन-पक्ष्मलसूत्र-वल्लिः ।
एषा कवेः पद-पदार्थ-विचारशुद्ध-
वु (बु) द्धेरुमापतिधरस्य कृतिः प्रशस्तिः ॥ 35
धर्म्मो (र्म्म) -प्रणप्ता मनदासनप्ता[23]
वृ (बृ) हस्पतेः सूनुरिमां प्रशस्तिं (स्तिम्) ।
चखान वारेन्द्रक-शिल्पिगोष्ठी-
चूडामणी राणक-शूलपाणिः ॥ 36

1. To the south of Deopāḍā there is a village called Vijaynagar which R. P. Chanda identifies with Vijayapura, mentioned in Dhoyi's *Pavanadūta* as the capital of the Sena kings. See *Gauḍarājamālā* (Bengali), p. 75. But the Barrackpur plate shows that Vijayasena's capital was Vikramapura (N. G. Majumdar, *op. cit.*, p. 62).

2. From the facsimile published in *Ep. Ind.*, I.

3. Expressed by symbol.

4. There is a vertical sign after *bha*; this covered a little space at the end of the line.

4a. The Brahmakshatriyas are those who have both Brāhmana and Kshatriya blood in their veins. The Purānas describe the dynasties whose progenitors were born of Brāhmaṇa father and Kshatriya mother as Brahmakshatra: cf.

Parasparaṁ yugānāñ=cha Brahmakshatrasya ch=odbhavaḥ |
Yathā vai prakṛitis=tebhyaḥ pravṛittānāṁ yathā kshayam ||
Jāmadagnyena Rāmeṇa kshatre niravaśeshite |
Kṛit=eyaṁ paṅkulā sarvā kshatriyair=vasudhādhipaiḥ ||
Divaṁ gatān=ahaṁ tubhyaṁ kīrttayishye nibodhata ||
Ekasy=Aikshvāku-vaṁśasya prakṛitiṁ parivakshate |
Rājānaḥ śreṇibaddhās=tu tath=ānye kshatriyā bhuvi ||
(*Brahmāṇḍa Purāṇa*, 33.44-46)

Brahmakshatrasya yo yonir=vaṁśo rājarshi-satkṛitah |
Kshemakaṁ prāpya rājānaṁ saṁsthā prāpsyati vai kalau ||
Ity=esha Pauravo vaṁśo yathāvad=anukīrttitah ||
(*Vāyu Purāṇa*, 99.238-39)

See Sircar, *The Guhilas of Kishkindhā*, pp. 6 ff.

5. *Va* and *ba* are never distinguished in the record.

6. Originally °*yāṁ*; but the *anusvāra* seems to have been deleted.

7. There is a vertical line here as at the end of line 1.

8. Read *māṁsa*.
9. There is a vertical line here as at the end of lines 1 and 2.
10. Read *samajaṁshṭa*.
11. Read *mātrasya*.
12. Read *jagat*.
13. Read °*māñ=jaghāna*.
14. There is a sign as at the end of line 2.
15. See note 14 above.
16. See notes 14-15 above.
17. The vowel-mark of *ri* is not properly formed.
18. A sign like that at the end of line 2.
19. The temple of Pradyumneśvara stood at Deopāḍā on the bank of a tank now known as Padumsar (Sanskrit : Pradyumnasaras).
20. There is a sign like that at the end of line 2.
21. See note 20 above.
22. See notes 20-21 above.
23. *Manodāsa* has been changed to *Manadāsa* for the sake of metre.

No. 25— Sanokhār Tāmra-kholī Inscription of Ballālasena (c. 1159-79 A.D.), Regnal year 9

Sanokhār Bāzār, Bhāgalpur District, Bihar
D. C. Sircar, *Ep. Ind.*, XXX, pp. 78-82.

Language : Sanskrit
Script : Gauḍīya

Summary : In the NINTH YEAR of the reign of Ballālasena (i.e. c. 1168-69 A.D.), the copper-cover bearing the inscription was granted in favour of the god DAMACHĀDITYA by CHIHOKA, the chief priest of the said deity's temple.

TEXT[1]

सिद्धम्[2] प्रमेसर-इत्यादि-[3] श्री-वललशेण-समत[4] ६ ॥ ताम्वर-खोलि[5] दत[6] ॥[7]
भट्टारक-श्री-दमचादितदेवपदाना[8] ॥[9] मठपति-चिहोकस्य

Corrected Text

सिद्धम् ॥ परमेश्वरेत्यादि-श्री-बल्लालसेन-संवत्सरे नवमे ताम्रखोली दत्ता
भट्टारक-श्री-दमचादित्यपादेभ्यः मठपति-चिहोकेन ।

1. From the original. See Plate in *Ep. Ind.*
2. Expressed by symbol.
3. Sanskrit *Parameśvar-ety-ādi* (i.e. *Parameśvar-ety-ādi- rājāvalī pūrvavat*).
4. Read *Ballālasena.*
5. Read *saṁvat*, i.e. *saṁvatsare.*
6. Sanskrit *Tāmrakholī* or °*kholikā.*
7. Read *dattā.*
8. The *daṇḍas* appear to be superfluous.
9. Read *Damachādityadevapādānām* (*debhyaḥ*). The reading does not seem to be *Damarā*° as the form of *ma* in *Pramesara* and *Bhaṭṭāraka* is different.
10. The reading does not appear to be *Rihokasya.* We may suggest the emendation *Chihokena.*

No. 26—Mādhāinagar Copper-plate Inscription of Lakshmaṇasena (c. 1179-1206 A.D.)

Mādhāinagar, Pabna District, Bangladesh.

R. D. Banerji, *JASB*, 1909, pp. 467 ff.; N. G. Majumdar, *Ins. Beng.*, III, pp. 109 ff.

Language : Sanskrit

Script : Gauḍīya

Metres : Vv. 1-2, 5, 7, 10 शार्दूलविक्रीडित; V. 3 पुष्पिताग्रा; Vv. 4, 11 स्रग्धरा; V. 6 मालिनी; V. 8 वसन्ततिलक; V. 9 उपेन्द्रवज्रा; Vv. 12-13 मन्दाक्रान्ता; Vv. 14-16 अनुष्टुभ् (श्लोक).

अत्रास्ते करि-व(वृ)न्दमुन्मदमिह प्रौढो(ऽ*)स्ति पञ्चाननः
सन्त्येतासु[5] जगद्द्रुहो गिरि-दरी-कु-

16. म्भीषु कुम्भीनशाः(साः) ।
स्नेहादित्यभिधाय [वृ]द्ध-शवरी-वर्ग्गेण व(ब)द्धाश्रुणा
यद्वैरि-प्रमदाजनो वन-

17. भुवः सञ्चारमध्यापितः ॥ 7
तस्यानुजो नत-स(म*)स्त-सपत्न-मौलि-
रत्नात्सुमात्सलित[6]-पाद-सरो-

18. [ज-रो][7]चिः ।
विद्या-निधिः प्रतिनिधिर्म्मधुश(सू)दनस्य
जातोऽथ विश्वविजयी नृपतिर्ययातिः ॥ 8

Second Plate : First Side

19. भटैरवष्टब्ध(ब्ध)मिदं नरेन्द्रै
राष्ट्र-द्वयं कोप(स)लमुत्कलञ्च ।
अकण्टकं साधयतः समन्ता-
द्भू(द्भु)ज-द्व-
20. यं यस्य कृतार्थमासीत् ॥ 9
तस्य ततः सुकृतफलं सफलीकृत-लोक-लोचनस्तनयः: ।
सम-
21. जनि गुणैकसीमा श्रीमानु(द्*)द्योतकेसरी नृपतिः ॥ 10
भक्ति-दु(दू)र-नत-कुन्तल-स्खल-
न्मल्लिकाकुसु-
22. म-दाम-राजयः ।
ढौकयन्त इव कीर्त्तौ(र्त्ति)-सन्तती-
र्यंम्प्रणेमुरभितो महीभुजः ॥ 11
तनयस्तस्य न-
23. मस्यन्नरेन्द्र-मौलीन्द्रनीलमणि-मधुपैः (।*)
भृङ्गारित-पद-पद्मः समजनि जनमेजयो नृपतिः ॥ 12
24. कृपाण-धाराधर-धौत-वौ(वै)रि-
भूपाल-कान्ता-म(मृ)गनाभि-पङ्कः ।
वसुन्धरा-भार-महाधुरि(री)ण-
दोः-काण्ड-
25. निर्भत्सि(र्त्सि)त-नागराजः[8] ॥ 13
ततस्तनु(नू)जो मनुजोत्तमो(ऽ*)भवत्
पुरञ्जयो वैरि-पुरञ्जयो नृपः (।*)
नमत्-क्षि-
26. तीशार्च्चित-पादपङ्कजः
स्फुरत्सुनासीर-समान-विक्रमः ॥
गौड-डाहल-कलिङ्ग-वङ्गजा 14
भूभु-
27. जो भुज-निवारितारयः ।
ते(ऽ*)पि यस्य भुज-सार-शङ्कया
कम्पमानमनिशम्मनो दधु-
28. : ॥ 15
तस्यानुजो निज-भुजार्ज्जित-शौर्य-सूर्य-

प्रौढप्रभा-शमित-शत्रु-यशः-शशाङ्कः-

29. :।

श्री-कर्ण्णदेव-नृपतिः क्षितिपाल-मौलि-

संलीन-रत्नचय-चुम्वि(म्बि)त-पादपीठः ॥ 16

त्रिभुव-

30. न-कुटीर-पटले सर्पति निजकीय-कीर्त्ति-वल्लि(ल्ली)यं(यम्) ।

यस्य समुन्नति-भाजं भुजयुग-निःश्रि(श्रे)णि-

31. कां श्रित्वा ॥ 17

स्वस्ति । श्री-ययातिनगरात(त्) । परममाहेश्वर-परमभट्टारक-

महाराजाधि-

32. राज-परमेश्वर-सोमकुलतिलक-त्रिकलिङ्गाधिपति-

श्री-महाशिवगुप्तराजदेवः

33. कुशली । उत्तर-तोप(स)लीय-व्र(ब्र)ह्मे अट्ठावीस(ष्टाविंश)-

खण्ड-सं(बद्ध*)-कोणाग्रामः । अतस्तति(त्)-खण्डीय-व्रा(ब्रा)ह्म-

34. णानापूज्य ।[9] समाहर्तृ-सन्निधातृ । नियुक्ताधिकारिक ।

दाण्डपाशिक । पिशुनवेत्रिकावरोध-

35. [ज][10]न । राज्ञी । राणक । राजपुत्र । राजवल्लभ । भोगिजन-

प्रमुख-निवासि-समस्त-जनपदान-

36. [नु]नयति वो(बो)धयति समाज्ञापयति विदितमस्तु भवतां यथाऽस्मा-

भिरयङ्ग्रामः

Second Plate : Second Side

37. स-जलस्थलः । स-गर्त्तोषरः । साम्र-मधूक-प्रभृति-नाना-वृक्षः । सनिधिः ।

सोपनिधि-

38. : । हस्तिदण्ड । वरव(ब)लीवर्द्द । चिट्टोल । अन्धारुआ । प्रत्यन्धारुआ ।

अदत्ता । पदातिजीव्य । अ-

39. न्तरावड्डि । रिन्तकावड्डि । वसावको । विषयाली । आ(अ)हिदण्ड ।

हलदण्ड । व(ब)न्धदण्ड । वन्दापना

40. । विजय-वन्दापना-प्रभृति-नाना-मार्ग्गणी-समेत-भविष्यत्कर-सहितः ।

स-खण्डपालीयः ।

41. सर्व्ववाधा-वर्ज्जितः । सर्व्वोपरिकर-दान-सहितः । चतुःसीमावच्छिन्नः ।

उत्कलदेशीय-श्री-

42. सलोणपुर-महाविहार-विनिर्ग्गतायै । कास्य(श्य)प- सगोत्रायै । त्र्यार्षे-

प्रवरायै । उदयम-

43. तीनाम्न्याः पौत्र्यै । महारी-माहूणदेवि(वी)-नाम्न्याः पुत्र्यै । राणी-
श्री-कर्प्पूरश्री-नाम्नौ(म्न्यै) । सलि-

44. लधारापुरस्सरं(रम्) । आचन्दा(न्द्रा)र्क-क्षिति-समकालोपभोगार्थं ।
मातापित्रोरात्मनश्च पु-

45. ण्ययशोभिवृद्धये । ताम्रशासनेनाकरीकृत्य । सम्प्रदत्त इत्यवगत्य ।
समुचि-

46. त-कर-भागभोगमुपनयद्भिभ(र्भ)वद्भिः सुखेन प्रतिवस्तव्यमिति ।
भाविभिश्च भूपति-

47. भिर्द्दत्तिरियमस्मदीया । धर्म्म-गौरवादस्मदनुरोवा(धा)च्च स्व-दत्तिरिवा-
नुपालनीया ॥ तथा

48. चोक्तन्धर्म्मशास्त्रे ॥
व(ब)हुभिव(र्व)सुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भू-

49. मिःत(मिस्त)स्य तस्य तदा फलं(लम्) ॥ 18
मा भूदफल-शङ्का वः परदत्तेति पार्थिवाः ।
स्वदत्तात् फल-

50. मानन्त्यं परदता(त्ता)नुपालने ॥ 19
षष्टिं वर्ष-सहस्राणि स्वर्ग्गे मोदति भूमिदः ।
आक्षेप्ता

51. चानुमन्ता च द्वौ तौ नरक-गामिनौ ॥ 20
अग्नेरपत्यं प्रथमं सू(सु)वर्ण्णं
भूर्वैष्णवी सूर्य-सू(सु)ता-

52. श्च गावः ।
यः काञ्चनं गाञ्च महीञ्च दद्यात्[11]।
दत्तास्त्रयस्तेन भवन्ति लोकाः ॥ 21
आस्फोट[य]-[12]

53. न्ति पितरो वल्गयन्ति पितामहाः ।
भूमिदाता कुले जातः स नस्त्राता भविष्यति ॥ 22
भू[मि]

54. यः प्रतिगृह्णाति यश्च भूमि प्रयच्छति ।
उभौ तौ पुण्यकर्म्माणौ नियतं स्वर्ग्ग-गामि[नौ] ॥ 23

Third Plate

55. तडागानां सहस्रेण वाजपेय-शतेन च ।
गवां कोटि-प्रदानेन भूमिहर्त्ता न शु-

56. ष्यति ॥ 24
हरति हारयेद्यस्तु मन्दवु(बु)द्धिस्तमोवृतः ।
सुव(ब)द्धो वारुणैः पाशैस्त्रिय(स्तिर्य)ग्योनिं
57. स गच्छति ॥ 25
स्व-दत्ताम्परदत्ताम्वा(त्तां वा) यो हरेत्त(त्) वसुन्धरा(म्*) ।
स विष्ठायां कृमिभू(र्भू)त्या(त्वा) पितृभिः सह
58. पच्यते ॥ 26
गामेका[ं] स्वर्ण्णमेकञ्च भूमेरप्यद्ध(र्द्ध)मङ्गुलं(लम्) ।
हरन् (न*)रकमाप्नोति यावदाहू-
59. त-स[ं]प्लवः(वम्) ॥ 27
सामान्यो(ऽ*)यं धर्म्मसेतु[र्नृ]र्पा(पा)णां
काले काले पालनीयो भवद्भिः ।
स[र्व्वा]नेतान(न्)
60. भाविनः पार्थिवेन्दा(न्द्रा)न्
भूयो भूयो याचते रामभद्रः ॥ 28
इति कमल-दलाम्वु(म्बु)-विन्दु-लोला(लां)
61. श्रियमनुचिन्त्य मनुष्य-जीवितञ्च(।*)
सकलमिदमुदाहृतञ्च वु(बु)द्ध्वा
न हि पुरुषैः पर-की[र्त्त]यो
62. विलोप्याः ।(॥) 29
यज्द(द्)ण्ड-मण्डलाग्रेण खण्डितैरहितैरयं(यम्) ।
सू(सु)नासीरोऽर्थवान् पृथ्वी(थ्व्याः) प्राप्ते य(चा)-
63. त्र वसुन्धरा ॥ 30
यस्य वु(बु)द्धि-व(ब)लाल्लक्ष्मीरेक-पत्नीव तस्थि(स्थि)ता(।*)
स श्रीमान् कृष्णदेवो(ऽ*)भू(द्भू)प-
64. तेः सन्धिविग्रही ॥ 31
महाक्षपटली श्रीमान(न्) वीरश्छित्तल्लदेवकः ।
सो(ऽ*)लीलिखत्
65. खलानन्द-नाशनस्ताम्रशासनं(नम्) ॥ 32
परममाहेश्वर-परमभट्टारक-महाराजाधि-
66. राज-परमेश्वर-श्रीमत्कर्ण्णराजदेवस्य प्रवर्द्धमानविजयराज्ये । सट-[13]
सम्व(संव)त्सरे । आ-
67. शि(श्वि)न-शुदि द्वादश्यां(श्याम्) । अङ्के सम्वत(संवत्) ५

आश्विन-शुदि १२ स्वर्ण्णवीथि-प्रतिव (ब) द्ध-स्व[14]ग्नहि-वि [ज्ञा?] नि-

68. शङ्खुकेन ताम्रशासनमिदमुत्कीर्ण्णमिति ॥

1. From the original plates and their impressions.
2. Expressed by symbol.
3. Read *yair=visphuṭaṁ.*
4. The correct form of the name is Nahusha.
5. There is a defective mark in the plate after this letter.
6. Read *ratn-āṁśu-saṁmilita.*
7. These two letters are cut off.
8. The reference is probably not to both Vāsuki and a king of the Nāga dynasty.
9. The *daṇḍa* here and in most of the cases in this line and the lines below is superfluous.
10. The first *akshara* in lines 35-36 is cut off.
11. Read *dadyād°* and omit the *daṇḍa.*
12. An *akshara* at the end of each of lines 52-54 is cut off.
13. Read *pañchama.* Although the word looks close to *shashṭha,* the corresponding figure is 5. It does not refer to the Aṅka reckoning in which the first and sixth years are omitted.
14. The reading may also be *su;* but the meaning of the word is uncertain.

C—The Gaṅgas

No. 33—Viśākhapaṭnam Copper-plate Inscription of Anantavarman Choḍagaṅga, Śaka year 1040 (1118 A.D.)

Viśākhapaṭnam, Viśākhapaṭnam District, Andhra Pradesh.
Sewell, *Arch. Surv. South. Ind.*, II, pp. 33, No. 19; J. F. Fleet, *Ind. Ant.*, XVIII, pp. 166 ff.
Language : Sanskrit
Script : Telugu-Kannaḍa

Metres : V. 1 वसन्ततिलक; V. 2 शार्दूलविक्रीडित; V. 3 स्रग्धरा; V. 4 वंशस्थ; V. 5 स्रग्धरा; V. 6 उपजाति (इन्द्रवज्रा & उपेन्द्रवज्रा); V. 7 शिखरिणी; V. 8 शार्दूलविक्रीडित; V. 9 वसन्ततिलक; V. 10 शार्दूलविक्रीडित; V. 11 स्रग्धरा; V. 12 मञ्जुभाषिणी; V. 13 वैतालीय; V. 14 उपजाति (इन्द्रवज्रा & उपेन्द्रवज्रा); V. 15 शार्दूलविक्रीडित; V. 16 स्वागता; Vv. 17-19 अनुष्टुभ् (श्लोक); Vv. 20-21 शार्दूलविक्रीडित; V. 22 अनुष्टुभ् (श्लोक); V. 23 उपजाति (इन्द्रवज्रा & उपेन्द्रवज्रा) V. 24 वंशस्थ; V. 25 मन्दाक्रान्ता; Vv. 26-27 स्रग्धरा; Vv. 28-29 शार्दूलविक्रीडित.

Summary : In the lineage of Atri was born Gāṅgeya. His son was Virochana; his son Saṁvedya; his son Bhāsvat; his son Dattasena; his son Soma; his son Aṁśudatta; his son Saurāṅga; his son Chitrāmbara; his son Sāradhvaja; his son Dharmaishī; his son Parikshit; his son Jayasena (I); his son Jayasena (II); his son Jitavīrya; his son Vṛishadhvaja; and his son Pragalbha whose son Kolāhala built the city Kolāhalapura (modern Koḷar in Mysore) in the Gaṅgavāḍi-vishaya (territory) and constructed the temple of Hari. His son was Virochana. After eighty kings, who enjoyed the city of Kolāhalapura, in this lineage there was born Vīrasiṁha. His five sons were Kāmārṇava, Dānārṇava, Guṇārṇava, Mārasiṁha and Vajrahasta. After leaving the kingdom in the hands of their paternal uncle, they set out to conquer the earth and reached the Mahendra mountain. They then subdued Bālāditya and took

possession of the KALIṄGA country. Kāmārṇava placed Dānārṇava over the capital of JANTĀVURA; to Guṇārṇava he gave the AMBAVĀḌI-VISHAYA; to Mārasiṁha the SODĀ° or SEDĀ-MAṆḌALA; and to Vajrahasta the Kaṇṭakavartani tract. And thus for 36 years he governed the Kaliṅga country.—After Kāmārṇava, his younger brother Dānārṇava reigned for 40 years. His son Kāmārṇava II reigned for 50 years from the city of NAGARA (Kaliṅga-nagara). His son Raṇārṇava reigned for 5 years; his son Vajrahasta II for 15 years; his younger brother Kāmārṇava III for 19 years; his son Guṇārṇava for 27 years; his son Jitāṅkuśa for 15 years; his brother's son Kaligalāṅkuśa for 12 years; his uncle Guṇḍama (I) for 7 years; his younger brother Kāmārṇava IV for 25 years; their younger brother Vinayāditya for 3 years; Vajrahasta IV, son of Kāmārṇava (III), for 35 years; his son Kāmārṇava V for half a year; his younger brother Guṇḍama II for 3 years; his maternal half-brother Madhu-Kāmārṇava VI for 19 years; his son (?) VAJRAHASTA (V), who ruled for 30 years, was the lord of TRIKALIṄGA. His son RĀJARĀJA reigned for 8 years. He won victory against the DRAMILAS and then married RĀJASUNDARĪ, daughter of the CHOḌA king (Rājendrachola). When during the old age of Vijayāditya (VII) the Veṅgī kingdom was about to sink in the great ocean of the CHOḌAS, Rājarāja caused him to enjoy prosperity for a long time in the western region.—Rājarāja's eldest son Choḍagaṅga, who was anointed king in the ŚAKA YEAR 999 on Saturday the 3rd of the bright fortnight of the month of Kumbha (Bengali Phālguna) (i.e. on the 17th February, 1078 A.D.), at first replaced the fallen lord of UTKALA in his kingdom in the eastern region and then the waning lord of VEṄGĪ in the western region and propped up their fallen fortunes.—Anantavarman, also called Choḍagaṅga, the ruler of the whole of Utkala, while residing at SINDŪRAPORA, called together the cultivators headed by the Rāshṭrakūṭas in the SAṀVĀ-VISHAYA, issued an order in the presence of the *Purohita*, *Amātya*, *Yuvarāja*, *Sandhivigrahin*, *Dauvārika* and other officials saying that the village of TĀMARAKHAṆḌI in the said *vishaya* was given to MĀDHAVA, son of Bhīmaya and Meḍama-nāyikā and grandson of Vāsudeva-nāyaka and Gaṇḍama-nāyikā in the ŚAKA YEAR 1040 (1118-19 A.D.).—The genealogy of the Gaṅgas, quoted in the present record, contains some imaginary elements

not noticed in the earlier records of Anantavarman Choḍa-gāṅga and in the inscriptions of his ancestors.

TEXT[1]

First Side

1. [2]लक्ष्मी-निषेव्यमुडुराज-कलङ्क-कांति
बाहा-चतुष्टय-चणं वपु-
2. रादधानः(।*)
प्रादुर्बभूव भुवनत्रितयं विधित्सु-
र्व्विश्व-प्रसूति-जर-
3. टो[3] भगवाननन्तः ॥ 1
तन्नाभि[4]-नलिनाद्बभूव भुवन-प्रारंभ-दीक्षा-रतो
4. ब्रह्मा वेद-परम्परा (·*) परिदधद्वक्त्रैश्चतुर्ब्बि[5]स्ततः (।*)
प्राजापत्य-धुराधिरूड-[6]
5. महसामत्रिर्म्मुनीनां प्रभु-
र्ज्जातस्सार्व्वजनिन[7]-दिव्य-तपसा(·*) ध्यातो वपुष्मा-
6. निव ॥ 2
अत्रे(:*) पुत्रोः[8] बभूव त्रिपुरहर-जटा-जूटा[9]-नेपत्य[10]-रत्न-
नेत्र-व्यापा-
7. र-देश(:*) स्मर-चरित-महानादिका[11]-सूत्रधारः(।*)
दृष्टांतो दाक्षिणात्या-मु-
8. ख-मुकुर-रुचां शर्व्वरी-जिवितेश-[12]
स्त्रैलोक्यानंद-कंदो गगन-तल-म-
9. हाम्भोधि-शंखश्शशा(·*)कः ।(।*) 3
ततो जगत्ताप-भिषज्यित-त्विष-
श्शुभ-ग्रहो-
10. (ऽ*)भूद्बिबुधाग्रणीर्ब्बुधः (।*)
पुरूरवास्तत्तनयो यदुल्लस-
द्भुजा भुजि-
11. ष्यां बुभुजे वसुंधरां(राम्) ।(।*) 4
तस्म(ा*)दायुश्शुभं वस्त्रिभुवन-विदितो जन्म लेभे
12. तदीयः
पुत्रो(ऽ*)भूज्जेत्र[13]-बाहुर्न्नहुष-नरपतिर्व्वू[14]भृतामग्र-गण्यः (।*)
य-

13. : पृथ्व्यामेक-पत्न्यामनुभव-विमुखो भूरि-जात-प्रजायां
स्वर्व्वेश्यां ख-
14. ण्डितेंद्रां प्रणय-परवशः पौरुषेणान्वभुङ्क्त[15] ॥ 5
ततो ययातिर्व्विजितारि-
15. यूति-
र्ज्जज्ञे ततस्तुर्व्वशुरुर्व्वरेशः (।*)
स पूर्व्व-गीर्व्वाण-गुरोर्गरिम्ना[16]
मातामि-
16. हस्योरसि हि प्रवृद्धः ।(।*) 6
अपुत्रत्वं प्राप्तस्सुचिरमतिखिन्नो नृप-वृ-

Second Plate : First Side

17. ष-
स्स गङ्गामाराध्यां नियत-गतिराराध्य वरदां(दाम्) ।
अजेयं गांगेय-
18. सुतमलभतारभ्य च तदा
क्रमस्तद्वंश्यानां भुवि जयति गङ्गान्व-
19. य इति ।(।*) 7
तस्यासीत्तनयो विरोचन-विभुर्व्वैरि-ग्रहास्ताचल[17]
क्षोणि-ना
20. थ-कीरीट[18]-पत्र-मकरी-लग्ना(ः*)घ्रि-रे[णू?]त्करः (।*)
लक्ष्मि[19]-वाग्वनिता-महाकुल-नदी-[स]-
21. वेद्यमुद्योगिनं
संवेद्यं समजिजनत्स[20] नृपतिर्ग्गङ्गान्वयोत्तंसकं(कम्) ।(।*) 8
स-
22. वेद्यतो मणिरिव(ा*)जनि नाम भास्वान्
भूपाल-मौलि-मुकुटैरुपलालनिय-[21]
23. : (।*)
त्रासादि-दोष-रहितस्स बभूव पुत्री
यत्संपदान्निधिरजायत दत्त-
24. सेनः ।(।*) 9
तस्योर्व्विश्वर-[22]मौलि-मण्डन-मणेरासीदसाधारणां
बिभ्राणो नृप-
25. ति-श्रियं प्रिय-सुतस्सोमो(ऽ*)तिरम्याकृतिः (।*)

तस्मादप्युदपादि सोदित-ज-
26. गच्चक्रो(ऽ*)शुदत्तस्तत-
स्सोरांगो[23](ऽ*)भवदन्य-राड्गज-घट(ा*)-पात-कृया[24]-पाक-
27. लः।(।*) 10
तस्माच्चित्रांबरो(ऽ*)भूत्क्षितितल-वलये राजशब्दैक-वाभ्य-[25]
स्सूनुस्सारध्व-
28. जो(ऽ*)स्याभवदखिल-भुवामाधिपत्य-प्रसूति(:*)(।*)
धम्मेव[26] तत्तनूजो नृप-नय-
29. पदवि[27]-पांथ-मुख्यो विरेजे
बभ्राजापत्या[28]मस्य क्षिति-जय-परवानेक-
30. धन्वा परिक्षित्।(।*) 11
स महीपतिस्सुतमपाप[29] मानिनं
जयसेनमन्य-
31. नृप-दर्प्प-शातनं(नम्) (।*)
अभवत्सुतो(ऽ*)स्य जयसेन-संज्ञितः
प्रथयन् दिशा-
32. सित-दुकूलित(:*) यशः।(।*) 12
जितवीर्य्यमसावजीजन-
त्स च भूपा-

Second Plate : Second Side

33. ल-वृषं वृषध्वजं(जम्) (।*)
सहशक्तिमलंघ्य-शासनं
विजिगीषुं स्स[30]-विरोधि-भी-
34. षणं(णम्) । (।*) 13
तस्य प्रगर्ब्ब[31]स्तनयो बभूव
क्षितीश-मार्ग्गाचरण-प्रगल्भः (।*)
य(:*) ख-
35. ड्ग-धारा-जल-धौत-वैरि-
नारी-कपोल-स्थल-पत्रभंगः।(।*) 14
आसीदेव सितातप-
36. त्र-तिलक(:*) क्षोणीभृदस्यात्मजो
वीरश्री-वनिता-स्वयंवृत-पतिर्द्दैवस्स को-
37. लाहलः (।*)

निर्म्मायोर्ज्जित-गंगवाडि-विषये कोलाहलाख्यं पुरं
यश्च-
38. क्रे सुर-सद्म-विक्षण[32]-रस-प्रत्यूहमक्ष्णां हरेः ।(।*) 15
तत्सुतो धृत-शरासन-य-
39. ष्टि-
र्ग्गामरक्षदपवर्ज्जित-चौर्य्यं(र्य्यां) (।*)
शासन-प्रथित-पाश-विदेया-[33]
मेक
40. एव स विरोचन-संज्ञः (॥*) 16
गते तत्र[33a] नरेन्द्राणां कोलाहल-पुरि-[34]भुजां(जाम्) (।*)
41. एकाशीत्यां च तद्वंश्यो वीरसिंहो(ऽ*)भवन्नृपः ।(।*) 17
तस्य कामार्न्नव[35]स्सू-
42. नुर्द्दानार्ण्णव-गुणार्ण्णवौ (।*)
मारसिंह इति ख्याता[36] वज्रहस्ताख्य-पंच
43. माः। (।*) 18
अथ कामार्न्नवो[37] दत्वा[38] पितृव्याय निजाम्महीं(हीम्) (।*)
प्रायात्पृथ्विं[39] भुवं जे-
44. तुम्माहेंद्रं[40] भ्रातृभिर्ग्गिर(रिम्) ।(।*) 19
तत्र च सकल-सुरासुर-सिद्ध-साध्य-किरीट-कोटि-
45. विघृष्ट-मसृण-चरणपीठमाराध्य गोकर्ण्णस्वामिनमस्य प्रसादात्समा-
46. सादित-वर-वृषभ-लांचन[41]स्समुपलब्ध-सकल-सांम्राज्य-[42]चिह्नो[43]रुप-
47. शोभमानस्स नरेन्द्रा[44] महेन्द्राचल-शिखरादवतीर्य्य युधिष्ठिर इव
48. चतुर्भिरनुजैरनुगम्यमानस्समर-निरसिक-[45]बालादित्यन्निजित्य[46]

Third Plate : First Side

49. कामार्ण्णवः कलिंगानग्रहीत् । तस्य चापहसित-सुरेंद्रपुरं जंतावुर-
50. न्नाम नगरी राजधान्यासीत् । असौ दानार्न्नव[47]मनुजं कंठिका-बंधुर-
51. कंधर(·*) निधाय गुणार्ण्णवायांबवाडि-विषयं मारसिहाय सो-
52. दा[48]-मंडलं वज्रहस्ताय कंटकवर्त्तनि[49]मदात् । एवं च क्रमेण
षट्त्रि-
53. शद्वर्षान्[50] कलिंगानपालयत् ।(।*) तस्य च श्रीमतामशेष-भुवन-भू-
54. पाल-मौलि-मालालंकार-यशसां निज-राज्य-संपदपहसित-महें-

55. द्राणां महेंद्राचलामल-शिखर-प्रतिष्ठितस्य सकल-भुवन-निर्म्माणैक-सू-
56. त्रधारस्य चराचरगुरो[51]र्ब्भगवतो[52] गोकर्ण्णस्वामिनस्समाराधन-ल-
57. ब्ध-निखिल-मनोरथानामात्रेय-गोत्राणां गंगानां कुलम-
58. लंकरिष्णोर्व्विष्णोरिव विक्रमाक्रांत-सकल-महीमंडलस्य कामार्ण्ण-
59. वस्यानुजो दानार्ण्णवश्चत्वारिंशतमब्दकान् राज्यमकार्षीत् । तत्सू-
60. नुर्द्वितीयः कामार्ण्णवः पंचाशद्वर्षान्महीमण्डलममण्डयत् । तस्य
तिरस्कृत-त्रिविष्ट-
61. पं नगरन्नाम[53] पुरमासीत् ॥
तस्मिन् सो(ऽ*)पि मधूक-वृक्ष-जननादीशस्य लिंगाकृतेः
कृत्वाख्यं
62. मधुकेश इत्यरचयत्प्रासादमभ्रंकषं(षम्) (।*)
यद्वा[54]रोर्ध्व-विचित्र-पत्र-लतिकाश्चित्राणि वा पश्य-
63. तां
सौधान्यंबरवर्त्तिनां हृदि भवेन्नूनं विमानारुचिः ।(।*) 20[55]
तत्तनयो रणार्ण्णवः पंच व-
64. र्षान् महीमहर्षयत् । तत्सूनुर्द्वितीयो वज्रहस्तः पंचदश
समाः क्ष्मामरक्षत् (॥*)
65. तस्यानुजस्त्रितीय-[56]कामार्ण्णवो(ऽ*)र्ण्णव-मेखलामेकोन-विंशति-
संवत्सरान्समवर्द्ध-

Third Plate : Second Side

66. यत् । तत्सुतो गुणार्ण्णवस्सप्त-विंशतिमब्दानब्धि-रशनां रशा-[57]
मनैषीत् । तदात्मजः जि-
67. तांकुशः पञ्चदशवत्सरान् महीन्निस्सपत्नामकार्षीत् । ततस्तद्भ्रातु-
स्सूतः[58] कलि-
68. गलांकुशो[59] द्वादश वत्सरान् कलिंगानलंचकार । ततस्तस्य पितृ-भ्राता
सप्त वर्षान्
69. गुण्डम-राजो [मही-मण्डल-मण्डनो][60] बभूव (॥*) तस्यानुजश्चतुर्थः
कामार्ण्णवः पंच-
70. विंशति-वर्षान् वसुंधरामनुबभूव । तयो(ः*) कनि[61]यान्विनया-
दित्यो
71. वर्ष-त्रयं धरित्रीमत्रायत्[62] । ततस्तज्ज्येष्ठस्य[63] कामार्ण्णवस्य
सुतश्च-

72. तुर्यो वज्रहस्तः पंच-त्रिंशतमब्दकान् । यद्वृत्त-दंति-
सहस्र-
73. दान-वारिणा च कु-वलयं पंकिलमासीत् । ततस्तत्सुतः
74. पंचम-कामार्ण्णवो(ऽ*)र्द्ध-समां(माम्)। ततस्तदनुजो द्वितीयो गुण्ड-[64]
75. म-राजस्त्रीणि वर्षाणि । तस्य द्वैमातुरो भ्राता षष्ठो मधु-
कामार्ण्ण-
76. व एकोनविंशति-वर्षाणि (।*) ततस्तदीय-नंदनो[65] वज्रहस्त-
स्त्रिंश-
77. तमब्दकान् । तद्वर्ण्णने ।
व्याप्ते गंगकुलोत्तमस्य यशसा दिक्चक्रवाले
78. शशि-
प्रद्योतामलिनेन यस्य भुवन-प्रह्लाद-संपादिना (।*)
सिंदूरैरति-
79. सांद्र-पंक-पटलैः कुंभस्थली-पट्टके-
ष्वालिपंति पुनः पुनश्च हरि-
80. तामाधोरणा वारणान् ।(।*) 21
अनुग्रहेण गुणिनो यस्य नक्षो-[66]मुखा-
81. ब्जयोः (।*)
आसीने श्री-सरस्वत्यावनुकूले विराजितः ।(।*) 22
न न(।*)मतः के-
82. वलमर्त्थतो(ऽ*)पि
[स] वज्रहस्तस्त्रिकलिंग-नाथः (।*)
यो वज्रि-हस्तादपथः[67] पृथि-
83. व्यां
वज्रं पतद्वारयितुं समर्थ(:*) ।(।*) 23
तत्सुतो राजराजजो[68](ऽ*)ष्ट-व-
84. त्सरान् । तद्वर्ण्णने ।
स राजराजः प्रथमं जयश्रियः
पतिर्ब्बभु-
85. व[69] द्रमिलाहवोत्सवे (।*)
विराजमानामथ राजसून्दरी-[70]
मुदूड-[71]
86. वांश्चोड-महीभुजात्मजां(जाम्)[72] ।(।*) 24
त्यक्त्वा वेंगी(·*) सपदि परिण(।*)मोदये द्या-

87. मिवात्यां
चोड-व्याजे महति विजयादित्यमव्धौ[73] मिम(·*)क्षु(म्*) (।*)
आ-
88. पन्नानां परमशरणं राजराजो विचित्रं
लक्ष्मी-भाज(·*) सु-
89. चिरमकरोत्पश्चिमायां दिशायां[74] (।*) 25
तस्याबुदग्र[75]-सूनुः पृथुल-
90. निज-भुजा-विक्रमादित्य-[76]सार-
स्सत्य-त्यागैकसीमा विमलतर-य-
91. शश्चन्द्रिका-धौत-लोकः (।*)
वागुल्लंघि-प्रतापः शुभचरित-निधिर्व्वाग्य-[77]
92. सौभाग्य-राशिः
क्षोणी-प्राणाधिनाथस्सकल-रिपु-मनोभंग-दश्चोडगं-
93. गः (।*) 26
शाकाब्दे नंद-रंध्र-ग्रहगण-गणिते[78] कुंभ-संस्थे दिनेशे
शु-
94. क्ले पक्षे तृतीया-युजि रविज-दिने रेवती-भे नृयुग्मे (।*)
लग्ने गंगान्व-
95. वायांबुज-वन-दिनकृद्विश्व-विश्वंभराया-
श्चक्रं संरक्षितुं
96. सद्गुण-निधिरधिपश्चोडगंगो(ऽ*)भिषिक्तः ॥ 27*
वीरश्रीर्ब्बुज[79]-दण्ड-युग्म-
97. ललिता यस्यारि-दर्प्प-च्छिद(:*)
स्तम्भ-द्वंद्व-नियंत्रितैक-करिणी-सा

Fourth Plate : Second Side

98. दृश्यमाक्लिप्यति[80] ।
यत्पाद-द्वितयांतिक-प्रणयिनं[81] क्षोणीभृताम्मौ-
99. लय
स्फायत्पद्म-युग्मानुकारि-[82]मधुप-श्रेणि-श्रियं बिभ्रति
100. ॥ 28
पूर्व्वस्यां दिशि पूर्व्वमुत्कल-पति(·*) राज्ये विधाय च्युतं
पश्चात्पश्चि-
101. म-दिक्तटे विगदितं[83] वेगिश[84]मप्येतयोः (।*)

लक्ष्मि[85] वंदन-मालि-

102. कामिव जयश्री-तोरण-स्तम्भयो-

र्ब्बंध्नाति स्म समिद्ध-वित्त-विभव(:*)

103. श्री-गंग-चूडामणिः ॥ 29

स श्रीमदनंतवर्म्म-महाराजो राजाधि-

104. राजो राजपरमेश्वरः[86] परमभट्टारकः परमवैष्णवः परमब्र-

105. क्षण्यः ।[87] मातापितृपादानुध्यात(:*) श्री-चोडगंगदेवस्संवा-

106. विषये रष्टकूट[88]-प्रमुखान् कुटुंविनस्सर्व्वान्स-

107. माहूय पुरोहितामात्य-युवराज-संधिवि-

108. ग्रहि-दौवारिक-प्रमुख-परिजन-समक्षमित्थमाज्ञापयति (।*)

109. विदितमस्तु वो यथा ॥ आसीदार्य-कुलोद्भवो वासुदेव-ना-

110. यकस्तद्भार्य्या गण्डम-नायिका तत्पुत्रो भीमय-नामा तद्भा-

111. र्य्या मेडम-नायिका तत्पुत्रो माधवस्तस्म[89] मत्पादोपजीविने

112. भवद्विषये तामरखण्डि-नाम-ग्रामस्सतत-प्रतिबद्धाभिरविच्छिन्न-

113. समोपभोगाभिश्च पल्लिभिस्सार्द्धं स-जल-स्थलं सर्व्वोपद्रव-रहित-

Fifth Plate

114. माचंद्रार्क्क-प्रतिष्ठम्मातापित्रोरात्मनश्च पुण्य-यशोभिवृद्धये विय-[90]

115. दुदधि-खेंदु-गणितेषु शक-वत्सरेषु पुण्ये(ऽ*)हनि सकलोत्कल-साम्रा-

116. ज्य-पदवी-विराजमानैर्स्सिदूरपोर-निवासिभिरस्माभिर्द्धारा-पूर्व्वक(·*)

द-

117. त्तस्तद्भाविभिरपिभूमिपालैः परिपालनीय इति ॥

1. Prepared from Fleet's transcript. Compare the earlier names in the family and some details with their counterparts in No. 34 below.
2. Here there is a symbol for *Siddham* or *Siddhu=astu.*
3. Read *jaratho.*
4. The metre requires *nābhī.*
5. Read °*turbbhi*°.
6. Read °*rūḍha.*
7. Read °*janīna.*
8. Omit *Visarga* which is misplaced and should have come after *Atre*°.
9. Read *jūta.*
10. Read *nepathya.*
11. Read *nāṭikā.*

12. Read *jīvi°*.
13. Read *°j=jaitra*.
14. Read *°tir=bbhū°*.
15. Read *°bhuṅkta*.
16. Read *°rimṇā*.
17. Read *°chalaḥ*.
18. Read *°kirī°*.
19. Read *lakshmī*.
20. Read *°jija°*.
21. Read *°nīya*.
22. Read *°rvvīśvara°*.
23. Better read *°s=Saurāṅgo°*.
24. Read *kriyā*.
25. Read *vāchya°*.
26. Fleet suggests *Dharmm-ākhyaḥ*. Read *Dharmaishī*.
27. Read *padavī* for the metre's sake.
28. Read *°j=āpatya°*.
29. Read *°m=avā°*.
30. Read *sva-vi°*.
31. Elsewhere it is *Pragalbha°*.
32. Read *vīkshaṇa*.
33. Read *vidheyā*.
33a. Better read *Gatāyāṁ cha*.
34. Read *purī*.
35. Read *Kāmārṇṇava*.
36. We need not correct it to *khyāto*.
37. Read *°rṇṇavo*.
38. Read *dattvā*.
39. Read *°t=prithvīṁ*.
40. Read *°m=Maheṁdra*.
41. Read *lāṁchhana*.
42. Read *sāmrājya*.
43. Read *chihnai°*.
44. Read *°rendro*.
45. Read *nīrasika*.
46. Read *°rjitya*. Jantāvura=Dantapura ?
47. Read *Dānārṇṇava°*. Add *tatra*.
48. Fleet's alternative suggestion is *Sedā°*.
49. Ambavādi, Sodā and Kaṇṭakavarttani have not been identified.
50. The reference is to Kāmārṇava.
51. Fleet's correction *sa-char-ā°* is unnecesary.
52. Read *°r=bbhagavato*.
53. The reference is possibly to Kaliṅganagara.
54. Read *yad-dvā°*.
55. The verse speaks of the god Madhukeśvara of Mukhaliṅgam.
56. Read *°s=tritīya°* or *s=tritīyaḥ*.
57. Better read *rasanāṁ rasā°*.

58. Read °*s=sutaḥ*.
59. This is a unique name.
60. The reading of the passage within brackets is not beyond doubt.
61. Read *kanī*°
62. Read °*trāyata*.
63. °*s=taj-jyeshṭhasya*.
64. In some records he is called Guṇḍa-mahārāja. Guṇḍa may be an abbreviated form or a mistake for Guṇḍama.
65. Read *tataḥ pañchama-Kāmārṇava-nandano*.
66. Read *vaksho*.
67. Read °*patham*. See No. 34 verse 14 below.
68. Read *Rājarājo*°.
69. Read °*r=bbabhūva*.
70. Read °*suṁdarīm*°.
71. Read °*dūḍha*.
72. The king's name is sometimes given as Rājendrachola.
73. Read °*m=abdhau*.
74. Read *diśāyām*.
75. Read *tasy=ābhū*°.
76. The reference is here to king Vikrama of the legends.
77. Read °*r=bbhāgya*.
78. *Nanda*=9, *randhra*=9, *graha-gaṇa*=9, i. e. Śaka 999. The actual date is Saturday, the 17th February, 1078 A.D.
79. Read °*r=bbhuja*.
80. Read °*klṛipyati*.
81. Read *praṇayināṁ*.
82. Read °*nuchāri*. The *Visarga* before *sphā* is elided according to the rule *khar-pare śari*, etc.
83. Read *vigalitaṁ*.
84. Read *Veṁgī*°.
85. Read *lakshmīṁ*.
86. We need not omit *rāja*.
87. Omit the unnecessary mark of punctuation and better read °*hmaṇy*°. He became a devotee of Vishṇu (i.e. Purushottama-Jagannātha) after his conquest of the Puri region.
88. Read *rāshṭra*°.
89. Read °*s=tasmai*.
90. *Viyat*=0, *udadhi*=4, *kha*=0, *indu*=1, i. e. 0401, which according to the dictum *aṅkānāṁ vāmato gatiḥ* give Śaka 1040 (1118 A.D.).

No. 34—Nagarī Copper-plate Inscription of Anaṅgabhīma III, Śaka 1151 and 1152 (1230-31 A.D.)

Nagarī, Cuttack District, Orissa.
D. C. Sircar, *Ep. Ind.*, XXVIII, pp. 235ff.
Language : Sanskrit
Script : Gauḍīya

Metres : Vv. 1-3, 5-6, 9-11, 15, 20, 24-31, 34, 40-41, 48, 50, 54, 56-58, 60-61, 64, 67, 73-74, 76, 78 शार्दूलविक्रीडित; Vv. 4, 21, 37, 42, 53, 66 स्रग्धरा; Vv. 7, 23, 49, 65 मालिनी; Vv. 8, 13, 34, 38-39, 44-46, 51, 59, 68, 75, 79-80 88 वसन्ततिलक; Vv. 12, 16, 18-19, 22, 32, 36, 43, 52, 55, 62-63, 69-71, 77, 81-87, 89 अनुष्टुभ्; Vv. 14, 17, 35, 72 उपजाति; V.47 इन्द्रवज्रा.

Summary : From the navel of VISHṆU sprang BRAHMAN; from Brahman was produced ATRI and from Atri's eyes was born the MOON who was the progenitor of the CHANDRAVAṀŚĪS. In this family was born KOLĀHALA also called ANANTAVARMAN, who became the lord of GAṄGAVĀḌI and the founder of the GAṄGA dynasty. His capital was known by the name of KOLĀHALAPURA. His eldest son MĀRASIṀHA succeeded him to the throne while the other sons left the country for conquering other territories. Of them the fifth one, named KĀMĀRṆAVA, occupied KALIṄGA. His descendant VAJRAHASTA (III), lord of TRIKALIṄGA, got a son, RĀJARĀJA (I), by his wife NAṄGAMĀ. The son of Rājarāja and his chief queen RĀJASUNDARĪ (daughter of Rājendrachola) was ANANTAVARMAN CHOḌAGAṄGA. He levied tribute from the whole land between the GAṄGĀ and GAUTAMA-GAṄGĀ (Godāvarī). He conquered the UTKALA country where the god PURUSHOTTAMA-JAGANNĀTHA had been in worship for many years. He also defeated the king of MANDĀRA on the bank of the GANGES and destroyed the latter's city ĀRAMYĀ. He died after a reign of 70 years and his son KĀMĀRṆAVA *alias* KUMĀRA by his wife KASTŪRIKĀMODINĪ succeeded him in ŚAKA 1069 (1147 A.D.). When he died after 10 years of rule (about 1156 A.D.), another of Anantavarman's sons, RĀGHAVA, by his wife INDIRĀ of the solar dynasty, became king and ruled for 15 years (1156-1170 A.D.). Then came RĀJARĀJA II, another son of Anantavarman by the queen CHANDRALEKHĀ. He ruled

for 25 *Aṅka* years (i.e. 21 years, 1170-90 A.D.). Rājarāja's younger brother and successor ANIYAṄKABHĪMA (Anaṅgabhīma) reigned for 10 *Aṅka* years, i.e. 8 years (1190-98 A.D.). RĀJARĀJA III, the son of Aniyaṅkabhīma and his chief queen VĀGHALLADEVĪ, ruled for 17 *Aṅka* years, i.e. actually 14 years (1198-1211 A.D.). His son and successor, ANAṄGABHĪMA III, born of his wife MALHAṆADEVĪ of the CHĀLUKYA family, on the Mīnasaṅkrānti on Saturday, Chaitra su-di 9, ŚAKA 1151 (i.e. the 2nd February, 1230 A.D.), while taking a sacred bath in the MAHĀNADĪ between the temples of the gods CHITREŚVARA and VIŚVEŚVARA at ABHINAVA-VĀRĀṆASĪ-KAṬAKA (Cuttack) granted 20 *Vāṭis* of land at PŪRAṆA-GRĀMA in the SĀILO-vishaya to the Brāhmaṇa SAṄKARSHAṆĀNANDAŚARMAN. On Thursday, Māgha-badi 6, in Śaka 1152 (i.e. the 26th December, 1230 A.D.), he granted to the same Brāhmaṇa a township covering thirty *Vāṭis*, twenty of which lay in PŪRAṆA-GRĀMA and the rest, a plot of homestead land, were in JAYANAGARA-GRĀMA. Both the villages were situated in the SĀILO-VISHAYA. The inhabitants of the township included a number of merchants such as a perfumer, a worker or dealer in conch-shells, a weaver of silk, a goldsmith and a brazier. There were sellers of betel, a florist, a maker of (or dealer in) sugar, milkmen, weavers, oilmen, potters, fishermen, a barber, some craftsmen and a washerman.—In the same year on the occasion of a LUNAR ECLIPSE on Thurdsday, Mārgaśīrsha-sudi 15 (i.e. the 21st November, 1230 A.D.), he granted 18 *Vāṭis* of land in Pūraṇa-grāma to the Brāhmaṇa RUDRAPĀṆIŚARMAN. In the same year, on the occasion of the Makara-saṅkrānti (i.e. the 26th December, 1230 A.D.), the king granted five *Vāṭis* of land to the Brāhmaṇa SOMAPĀLAŚARMAN. In the same year, on the occasion of the installation of the god PURUSHOTTAMADEVA, the king granted two *Vāṭis* of land to the Brāhmaṇa CHANDRAKARAŚARMAN. On the occasion of a SOLAR ECLIPSE on the Karkaṭak-āmāvāsyā (probably in Śaka 1152, i.e. the 14th May, 1230 A.D.), while the king was on a pilgrimage to PURUSHOTTAMA-KSHETRA, he granted five *Vāṭis* of land in Pūraṇa-grāma to the Brāhmaṇa KĀPAḌĪŚARMAN and some other Brāhmaṇas. When the king was standing before the god Purushottamadeva at ABHINAVA-VĀRĀṆASĪ on the occasion of Makarāmāvāsyā on Sunday (probably in Śaka 1152, i.e. the 5th January, 1231 A.D.), he granted four *Vāṭis* and eight *Mānas*

of land, covered with barley, wheat and sugarcane crop and situated in the village called VILĀSAPURA-GRĀMA in the KUDDIṆḌĀ-VISHAYA to the Brāhmaṇa DEVADHARAŚARMAN. The land was made a permanently revenue-free gift. To get the actual figure out of the figure of the *Aṅka* calculation of Orissa, one has to omit 1, 6 and numbers with 6 at the end (such as 16, 26, etc.) and 20 and higher numbers ending in a zero (such as 30, 40, etc.). 20 *Mānas* = 1 *Vāṭi* (about 20 acres).

TEXT[1]

First Plate

1. [सिद्धम् ॥][2] ओँ (॥*)
लक्ष्मी-पादसरोरुह-द्वयमदः श्रेयान्सि(यांसि) दासीष्ठ(ष्ट) वः
प्रस्फुर्ज्जन्नख-रश्मि-केसर-सटम्भास्वन्नखाली-दलम(म् ।)
2. विस्पष्टम्प्रतिविम्वि(म्बि)त(:*) प्रणमनैः क्रीडापराधोद्भवैः
कृष्णो यन्नख-दीप्तिषु भ्रमरतान्द(न्ध)त्ते स लक्ष्मीप्रियः ॥ 1
3. क्षीराव्धे(ब्धे)र्म्मथितात्सुरासुर-गणैः प्राद्(दु)र्भवन्ती रमा
शम्भु-व्र(ब्र)ह्म-पुरन्दरप्रभृतिषु प्रख्यात-कीर्त्तिष्वपि ।
पश्यत्स्वम्व(म्बु)जनाभमी-
4. शमवृणोल्लोकत्रयाह्लादिनं
भृङ्गाली सहकारमेति हि वने फुल्ले(ऽ*)न्य-शाखिन्यपि ॥ 2
तन्नाभी-सरसीरुहोद्भव-वि-
5. धेरत्रिर्व्व(र्ब्ब)भूवामुत-
श्चन्द्रश्चन्द्रिकया प्रकासि(शि)त-जगत्सम्भूतवान्नेत्रतः ।
त्रैलोक्य-ग्रसनैक-दक्ष-तिमिर-ग्रासित्व-साम्ये(ऽ*)-
6. पि यो
लक्ष्मव्याजि दधत्तमः प्रतिवपुः सूय्या(र्य्या)धिको निर्म्मलः ॥ 3
श्रीदेवी-सोदरत्वादमृत-सु(स)खतया कल्पवृक्षानुजत्वा-
7. ल्लोकानन्दं विधाता तिमिर-विषहरः सर्व्वदै(दे)वैक-भोग्यः ।
तत्तत्-संसर्गलाभा(त्*) तदनुगत-गुणकं[3] स्वाङ्गनिष्ठन्द-
8. धानः
स्वस्यैतन्निर्म्मलत्वं जगति विजयते दर्शयन्नूनमिन्दुः ॥ 4
वङ्शे(वंशे) तस्य नृपेश्वराः समभ(वं*)न्ते(स्ते)-
9. षाड्गुणाच्छ(श्छ)न्दसः
प्रोत्फ(त्फु)ल्ला इव यत्पुराण-पथगास्तत्रापि नो सम्मताः ।

दोर्द्दण्डार्ज्जित-भूतलोत्थित-रमा-क-

20. ण्ठग्रहामन्दिनः ॥(।)

किञ्चास्माकमियम्भुजासिलतिका संवेष्टताम्(तां) वैरिणाम्(णां)

कण्ठारण्यमियञ्च कीर्त्ति-लतिका द्यान्नः समा-

21. रोहतु ।(।) 9

भ्राम्यद्भिर्व्विजिगीषया क्षितितलं क्वापि द्विषद्वन्दितैः

क्वापि द्वेषि-कुल-प्रमाधि(थि)भिरपि प्राप्ताः कलिङ्गाः किल ॥(।)

तैः

22. कामार्ण्णव-पञ्चमैर्न्नृप-वरैर्य्युद्धङ्कलिङ्गैः समं[14]

प्राप्तं द्रष्टुमिवार्ण्णवादुदगमत्कूर्म्मावतारो हरिः ॥ 10

कृ(कू)र्म्मस्वामिनि सा-

23. क्षिणि त्रिनयने तस्मिन्महेन्द्राङ्गते

गोकर्ण्णे(ऽ*)पि महोदधौ वियति वा सूर्य्ये तथेन्दावपि ।

कालिङ्गीम्भुवमाहरद्भुजव(ब)लाद-

24. न्योपभुक्ताञ्चवम्[15]

लक्ष्मीश्चित्ये(ञ्चेत्य)थ का स्त(स्तु)तिर्व्वद तहे(तो) गङ्गान्वय-
स्याहवे ॥ 11

तत्रासीद्वंशकर्त्तासौ कामार्ण्णव-महीपतिः ।

यस्यै-

25. ते पुत्र-पो(पौ)त्राद्या राजानः ख्यात-विक्रमाः ॥ 12

शास्त्रार्थ-निष्ठित-मतिर्द्विषदन्तकारी

सर्व्वार्त्थिवर्ग्ग-परितोषण-हेतु-वर्ग्गः ।

श्रा-

26. चाव(र)तोपि मुनिपुङ्गव-मार्ग्ग-चारी

तस्मादभून्नृपवरो भुवि वज्रहस्तः ॥ 13

न नामतः केवलमर्त्थतो(ऽ*)पि

स वज्रहस्त-

27. स्त्रिकलिङ्ग-नाथः ।

को वज्रहस्तादपरः प्रिथिव्याम्(पृथिव्यां)

वज्रम्पतद्वारयितुम्(तुं) समर्थः ॥ 14[16]

व्याप्ते गङ्गकुलो-

28. त्तमस्य यशसा दिक्चक्रवाले शसि(शि)-

प्रायेणामलिनेन यस्य भुवन-प्रह्लाद-सम्पादिना ।

सिन्दूरैरति-

29. सान्द्र-पङ्क-पटलैः कुम्भस्थली-पट्टके-
ष्वालिम्पन्ति पुनः पुनश्च हरितामाधोरणा वारणान् ॥ 15
महिषी
30. नङ्गमा तस्य पार्व्वतीव पिनाकिनः
तस्मात्तस्यामभूद्वीरो राजराजो महीपतिः ॥ 16
स राजराजो द्विजराज-कान्ति-
र्भुज-
31. ङ्ग-राजानन-वर्ण्य-कीर्त्तिः ।
श्रीमत्तयाधःकृत-राजराज(:*)
स्वविक्रम-न्यक्कृत-देवराजः ॥ 17
तस्याग्रमहिषी राज्ञो नाम्ना
32. या राजस(सु)न्दरी ।
लक्ष्मीर्न्नारायणस्येव चन्द्रस्येव च रोहिणी ।(।*) 18
ततस्तस्यामभूद्देवश्चोडगङ्गो नरेश्वरः ॥(।)
क्षोणी-
33. भृद्गर्व्वविच्छित्यौ(त्यै) दिवीन्द्रात् कुलिशं यथा । (॥) 19
धात्री तस्य सरस्वती समभवन्नूनन्न चेत्पीतवा-
न्तत्सारश्व(स्व)तमा-
34. मार्य्य-वा(बा)लकतमः श्री-चोडगङ्गः पयः ।
तादृग्वेदमतिः कथन्निपुणता शास्त्रेपु(षु) तादृक्व(क्क)थ-
न्तादृक्काव्य-कृतिः कथम्परिणति(:*) शिल्पेषु
35. तादृक्व(क्क)यम(म्) ॥ 20
क्षोणीम्(र्णी) दिक्पाल-से(शे)षामयमकृत पदद्वन्द्वमेतस्य वैरि-
क्ष्माभृच्चूडाश्रियाप्तम्(प्तं) स्तुतिरिति कियती चोडगङ्गेश्वर-
36. स्य ।
[नू]नम्पूर्ण्णः सुधांशुः परनृप-धवलच्छत्र-व(बु)द्ध्यापहर्त्ता
मामित्यङ्कस्य वृद्धि(·*) त्यजति यत इव त्रस्त-चित्तः प्रवीरात् ॥
गृह्णाति- 21

Second Plate : Second Side

37. स्म करम्भूमेर्गङ्गा-गौतमगङ्गयोः ।
मध्ये पश्यत्सु वीरेषु प्रौढः प्रौढ-स्तिषा(स्त्रिया) इव ॥ 22
प्रतिभट-कर-शस्त्र-व्याहृ-
38. त-स्वाङ्ग-निय्य(र्य्य)-

द्रुधिरमवनिनिष्ठन्नो भवेद्यान्तदे(द्यत्तदे)व ।
निज-कर-धृत-शस्त्र-च्छिन्न-भिन्नाङ्गमेता-
नकृत धरणि-शय्र्या(य्या)-
39. न्द्वन्द्व-युद्धेषु गङ्गः ॥ 23
यत्तेजः-परिभूत-शत्रु-नगर-प्रोद्भूत-धूमोद्गमै-
र्भूयः खाण्डव-दाह-शङ्कि-मनसो देवाः क्ष-
40. णम्भा(म्भी)रवः ।
स्वर्ण्णो(र्न्नो)तादसिधारया रिपुगणाद्वृत्तान्तमाकर्ण्य च
प्रौढिन्तस्य नुवन्ति गङ्गनृपतेर्भीतिम्वि(तिं वि)हाय ध्रुवम्
41. ॥ 24
क्रोधोद्यद्द्विपमेघवृन्दिनि मदः(द)-स्त्रो(स्रो)तस्वती-दुर्ग्गमे
चञ्चत्खङ्ग-तडित्प्रभावति नदन्नाराच-वज्रोदये ।
म(य)त्सैन्ये जलदाग-
42. म-प्रतिनिधौ जेत्तु(तु)म्प्रवर्त्तेत कः
शूरो(ऽ*)पीति वंदस्त्रिलोचन-विभुर्व्व(र्ब्ब)द्धो(ऽ*)मुना सङ्गरे ॥ 25
निर्म्मथ्योत्कलराज-सिन्धु[17]मपरङ्ग-
43. ङ्गेश्वरः प्राप्तवा-
नेकः कीर्त्तिसुधाकरम्पृथुतमल्ल(मं ल)क्ष्मीन्धरण्या समम् ।
माद्यद्दन्ति-सहस्रमश्व-नियुतम्(तं) च[18] रत्नान्यसंख्यानि
44. वा
तत्सिन्धोः किमिमम्प्रकर्षमथवा ब्रु(ब्रू)मस्तदुन्माथिनः ॥ 26
पादौ यस्य धरान्तरिक्षमखिलन्नाभिश्च सर्व्वा दिशः
श्रोत्रे नेत्र-
45. युगम्(गं) रवीन्दुयुगलम्मूद्धा(र्द्धा)पि वा द्यौरसौ ।
प्रासादम्पुरुषोत्तमस्य नृपतिः को नाम कर्त्तुं क्षम-
स्तस्ये-
46. त्याद्य-नृपैरुपेक्षितमयञ्चक्रे(ऽ*)थ गङ्गेश्वर[:] ॥ 27
लक्ष्मी-जन्मगृहम्पयोनिधिरसौ सम्भावितस्य स्थिति-
र्नो
47. धाम्नि श्वसु(शु)रस्य पु(पू)ज्यत इति क्षीराव्धि(ब्धि)-वासा(द्*) ध्रुवम् ।
निर्व्विण्णः पुरुषोत्तमः प्रमुदितस्तद्धाम-लाभाद्रमा-
प्येतद्भर्तृ-गृ-
48. हम्(हं) वरम्पितृ-गृहात्प्राप्य प्रमोदान्विता ॥ 28

त्वङ्कूर्म्माधिप निश्चल त्वमपि भोः (भो) व्यालेन्द्र धैर्य्यम्व (र्य्यं व) ह
त्वं पृथ्वि स्थिरताम्भज
49. त्वमधुना व्र (ब्र) ह्माण्ड गाढम्भव ।
श्री-गङ्गाधिप-व (ब) द्ध-सिंहविसरद्घोषा जगद्व्यापिनो
दिङ्नागेषु भयाच्चलत्सु जगती क-
50. म्पेन्द (त) वा यु (य) त्क्रमात (त्) ॥ 29
आरम्या-नगरात्कलिङ्गज-व (ब) ल-प्रत्यग्र-भग्नावृति-
प्राकारायत-तोरण-प्रभृतयो[र्ग][19]ङ्गा-तटस्थात्ततः
पा-
51. र्थास्त्रैर्य्युधि जज्ज (जर्ज्ज) रीकृत-नमद्राधेय-गात्राकृति-
म्म (र्म्म) न्दाराद्रि-पति (ति) र्गतो रणभुवो गङ्गेश्वरानुद्रुतः ॥ 30
व्र (ब्र) ह्माण्डाद्व (द्ब) हिरस्य की-
52. त्ति (र्त्ति) -यशसा लिप्तन्न वा भाविने
दत्तश्चार्थि-गणाय हेम-निचयः सङ्कल्पिनो (ने) वा व (ब) हु ।
निर्द्दग्धारि-प (पु) रश्च भावित-नवस्तस्य प्र-
53. तापैर्ण्ण (र्न्न) वा
किम्वा (किंवा) नो कृतवानसौ स्तुति-पदम् (दं) श्री-चोडगङ्गेश्वरः ॥ 31
वर्षा (र्षा) णाम् (णां) सप्ततिम्वी (तिं वी) रः क्षोणी-सम्भोगमाचरत् ।
दि-
54. ङ्नायकात्प्र (न् प्र) तीहारान्विधायाशासु सर्व्वतः ॥ 32
किप्रा (किम्प्रा) प्ता महिषी तपोभिरतुलैः श्री-चोडगङ्गेन सा
देवैं स्तुत्यगुणैर्व्वि (र्व्वि) भू-

Third Plate : First Side

55. षि (षि) त-वपुः कस्तू (स्तू) रिकामोदिनी ।
नाविष्णुः पृथिवीपतिः प्रभवतीत्यस्मिन (न्) हरौ वा भुवो
रक्षार्थन्धृत-जन्मनि स्वयम-
56. सौ लक्ष्मी (:*) प्रसूताथवा ॥ 33
तस्यान्ततो (ऽ*) जनि जगत्त्रितयैकवीरः
कामार्ण्णवस्त्रिजगदेक-वदान्य एषः ।
सूर्य्यं प्रताप-विभव (वे) -
57. न जगत्प्रसिद्धः
कीर्त्तेः (र्त्या) शशाङ्कमधरीकृतवान्विशुद्धचा । (॥) 34

गङ्गेश-सूनोर्व्विवु (बु) धाश्रयस्य
दृप्य (द्*)-द्विषद्वंश-विभेदि-शक्तेः (।*)
58. कामार्ण्णवस्यास्य कुमारकत्वं
न नामतः क (के) वलमर्थतो (ऽ*) पि ॥ 35
प्राप्योदयं शशाङ्भ (ङ्क) स्य वद्ध (र्द्ध) तान्नाम वारिधिः ।
वर्द्धते कीर्त्ति-च-
59. न्द्रो (ऽ*) यं चित्रङ्कामार्णरो (वो) दये ॥ 36
नन्दर्त्तु-च्यो (व्यो) म-चित्र-[20]प्रमित-शक-समा-व्याप्तकाले दिनेशे
चापस्थे (ऽ*) न्य-ग्रहौघे व (ब) लवति रि-
60. पुषु प्रक्षयं प्राप्तवत्सु ।
अस्मिन्मूर्द्धाभिषिक्ते नृपवर-तनये सर्व्वं (र्व्व)-लोकैकनाथे
श्रीमत्कामार्ण्णाव (र्ण्णवे) शे जगदभवदि-
61. दन्तत्तदानन्द-पूर्ण्णम (म्) ॥ 37
क्षीरार्ण्णवादजनि चन्द्रकलेति वार्ता
कामार्ण्णवात्तु सकलेन्दु-दिवाकराभम् ।
कीर्ति-प्रताप-
62. मिथुनं सहचारि लोके
श्लिष्यत्यहो पर-नृपाननुराग-शून्यान् ॥ 38
यस्यासि-निर्द्दलित-वैरिकरीन्द्र-कु-
63. म्भ-
निर्म्मुक्त-मौक्तिकफलान्यसृगुक्षितानि ।
कामार्ण्णवस्य रिपुसंहतिहेत्वकाल (ले)
सन्ध्या-प्रभाप्त-भ-गणा
64. इव भान्ति युद्धे[21] ॥ 39
दृप्यद्वैरि-चमूर्म्मया कवलिता नैवम्मयास्वादिते-
त्यन्योन्यङ्कलहे तु निर्णयवि-
65. धौ खड्ग-प्रतापेच्छया ।
माध्यस्थङ्गमितेव निर्म्मलतरा कीर्त्तिर्य्यदीया व (ब्र) वी-
म्यालोच्येह महद्भिरित्युपगता
66. धातु (:*) श्रुतीवादरात् ॥ 40
अस्राक्षीत्स हिरण्यगर्भमपरं[22] लोकम्महेशः पुरे-
त्यर्थो (ऽ*) यं विवदन्ति ये च वदन-व्रातस्तदीयो (ऽ*) घु
67. ना ।
रुद्धो यत्तु हिरण्यगर्भमकरोत्कामार्ण्णवेशस्ततः

सम्पन्न(ं*) जनितं जगद्यत इह प्रत्यक्षतः प्राणिनाम् ॥ 41
स-
68. प्ताम्भोधीन्वहन्ती क्षितिरतितरला नाग-कूर्म्मेश्वराणां
साहाय्यं[23] वाञ्छतीयन्तदपि पुनरयङ्कल्पितस्तत्र भारः ।
धा-
69. ता कामार्ण्णवाख्यः स तु निजतुलना(ं*) निर्ज्जयत्स्वर्ण्ण-भारै-
र्भूयो भूयस्त(स्तु)लायां स्थित इति धरणेर्भार-वा(बा)हुल्यमा-
70. प्तम(म्) ॥ 42
हृष(ष्ट)-पुष्ट-जनाकीर्ण्णं विद्वज्जन-मनोरम(म्*) ।
दशाव्दी(ब्दी)मकरोद्राज्यङ्कामार्ण्णव-महीपतिः ॥ 43
श्रीचोडगङ्गनृपते-
71. र्म्महिषा(षी) ततो(ऽ*)न्या
तस्येन्दिरा रविकुलोद्भव-राज-पुत्री ।
याद्यापि धातुरुपमाजनि सुन्दरीणां
सेयं सुधांशु-

Third Plate : Second Side

72. वदना स्वयमेव जाता ॥ 44
यद्रु(द्रू)पशीलगति-वर्ण्णनया प्रसिद्धा
दृष्टान्तभूग्गि(र्गि)रिसुतेत्यतिवाद-दोषः ।
नास्त्येव चण्डरुचि काम-
73. हरो यदत्र
तामिन्दिरामुदवहद्भुवि चोडगङ्गः ॥ 45
तस्यान्ततः समजनि क्षितिनाथ-नाथः
श्री-राघवः पर-धनेश्वव(र)-दर्प-
74. मर्द्दी ।
यत्पट्ट-व(ब)न्धन-विधि-श्रवण-प्रभीताः
सर्व्वे नृपा(:*) स्व-हृदि कम्पमवाप्तवन्तः ॥ 46
श्री-राघवे राजनि चित्रमेत-
त्तेजो-विही-
75. नः क्षितिपाल-वर्ग्गः ।
तत्पाद-सेवाकृत-देह-सिद्धि-
र्म्मित्रीभवत्येव समस्त एषः ॥ 47
प्रौढारि-प्रहतिप्रकार-विहित-प्राच-

76. ण्डयमन्तर्भव(द्*)-
दोर्द्दण्डोपमिति-प्रगल्भ-विषय-प्राग्भूतवानर्ज्जुनः ।
सम्प्रत्याहा(ह)व-रङ्गसङ्गत-रिपु-श्रेणी-शिरः-कन्दुक-
क्री-
77. डाश(स)क्त-भुजः शरासनभृतां चित्रोपमा राघवः ॥ 48
जगति परशुरामः प्रादुरासी(द्*) द्वितीयः
किमु रिपुकुल-हन्ता
78. स्वाज्ञयाच्छन्न-लोकः ।
क्षिति-वितरण-दीक्षासक्त-हस्तः प्रतापा-
दपि दशशतवा(बा)हुर्य्यस्य शत्रुर्वि(र्व्वि)नाशी ॥ 49
भेदम्भेद-
79. मराति-कुञ्जर-घटाः(टा)-क्षौणीध्र-पंक्ति[·] रणे
पायं पायमसृक्पयान्सि(यांसि) व(ब)हुधा श्री-राघवासिः क्षणात् ।
शु-
80. भ्रं शुभ्रमिवोद्वमन्विजयते कीर्त्ति-प्रतानम्परं
चन्द्रं चन्द्रिकया प्रपूर्ण्णतरया संसेव्यमानाकृतिम(म्) ॥ 50
दु-
81. र्ग्गेषु दाव-दहनः क्षितिभृत्स(त्सु) वज्र(· *)
माद्यत्करीन्द्र-घटनासु च सिंह एषः ।
विद्वेषि-भूमिपतयो नि-
82. वसन्ति यत्र
श्री-राघवः क्षितिपतिर्व्वितत-प्रतापः ॥ 51
श्री-राघव-धराधीशः क्षोणीनाथ-शिरोमणिः ।
अकरोद्राज्यमव्दा(ब्दा)ना-
83. मुद्दामो दश पञ्च च ॥ 52
तस्य श्री-चोडगङ्ग-क्षितिवलयपतेर्व्वंन्स(र्व्वंश)-सन्तान-वल्ली-
कन्द-श्री-चन्द्रलेखा स्फ(स्फु)टमदितिरिव प्रेयसी
84. कस्य(श्य)पस्य ।
तस्यामुद्दामधाम-क्षयित-दिनमणिर्य्य(र्ज्ज)ज्ञिवान्राजराजो
राजन्य-क्षोदकेली-तिलकित-महिम-व्याप्त-दिव्व(क्च)-
85. वालः ॥ 53
तस्मिन् दिग्विजय-प्रयाण-रशि(सि)के संरम्भ-शुम्भच्चमू-
संक्षुण्ण-क्षितिचक्र-पांशुपटल-प्राग्भारवत्यम्व(म्ब)रे ।
भूसंर्प्प(स्प)-

86. शंघृणा-वशाद्दिनमणेरुच्चैः [प्लु]तं सप्त(प्ति)भिः
स्वभ्यस्तं[24] सुरसिन्धुरेण धरणीपट्टे रदोद्‌घट्टनम् ॥ 54
चोडगङ्ग-नरेन्द्रस्य सूनु-
87. रुद्दाम-विक्रमः ।
राजराज इति ख्यातस्त्रिकलिङ्ग-महीपतिः ॥ 55
विश्वं क्रोडयति प्रगल्‌त(ल्‌भ)-यशशि(सि) प्रालेयशैल-त्विषि[25]
यद्यद्याद्-
88. गभूत(द)भूत-सदृशं सन्तः समाकर्ण्यताम् ।
धात्री पीठति लिङ्गति स्वरव(च)लः प्रासादति त्वद्यशो
दिङ्नाथाः प्रतिमन्ति यस्य परि-
89. तः [श्रेष्ठः(यः)]-पदं शृङ्गति ॥ 56
आनन्दं विदधाति चेतसि भू(भ)वत्कीर्त्तिर्ग्गुण-ग्राहिणः
सूते दोहदमर्थिनं(नः) सुमनशि(सि) श्री-राजराज ध्रुव[म् ।]

Fourth Plate : First Side

90. सेयं कर्ण्णपथं समेत्य हृदये शल्यायते वैरिणः
स्वात्मेच्छानुविधायिनान्न हि निजो भाव(:*) क्वचिद्दृश्यते ॥ 57
एतस्याम्भुवि पञ्चविङ्श(विंश)ति-स-
91. माः क्ष्मापाल-लक्ष्मीधवः
कृत्वा जित्वर-चाप-चञ्चल-भुजा-दम्भोलिरुर्व्वीपतिः ।
राज्यं प्राज्य-यशस्तुषार-किरण-श्रेणी-रगा(सा)दासना-
दुद्‌गच्छ-
92. त्पु(न्पु)रुहूत-गीत-चरित-श्री-राजराजो नृपः ॥ 58
तस्यानुजो नृपतिराज-पदाभिषिक्त :
सूक्तिप्रियः परिमितादि-नृप-प्रशस्तिः ।
पृथ्वीपतिः क-
93. लि-मलोज्झित-धम्म(र्म्म)-शुद्धः
कार्य्यक्षमः प्रभुरसावनियंकभीम. ॥ 59
वीराधिष्ठित-सङ्ग[रा][26]द्रि-शिखरे शङ्ख-श्व(स्व)नाशासिते
कुन्तोद्भि[न्न]-मदे-
94. भ कुम्भ-विगलन्मुक्तावली-पुञ्जिते।
हर्षादुग्र-निज-प्रताप-दहने खड्ग-स्रुचा विद्विषां
राज्ञामानन-पङ्कजानि नृपतिर्ग्गत्वानयद्यः श्रिय-
95. म(म्) ॥ 60
क्षीराध्वे(ब्धे)रमृत(ता)त्सुरासुर-भुज-व्यापार-विक्षोभिता-

च्चन्द्रस्यार्द्धमभूत्तदप्यधिययावीशानमेकं किल ।
चञ्चद्वा(द्बा)हु-व(ब)लेन सङ्गरभुवि
96. तत्खड्ग-धाराजला-
ज्जातस्त्वष्टदिगीश्वरात्पृ(न्पृ)थु-यशश्चन्द्रः समालिङ्गति ॥ 61
यत्प्रयाण-समुद्भूत-रजः-संपूरिते(ऽ*)म्व(म्ब)रे ।
अभू(द्*)द्विरदराजस्य धू-
97. ली-मद-चिता तनुः ॥ 62
दश वर्षाणि वीरो(ऽ*)सौ निर्ज्जितारातिमण्डलः (।*)
अनङ्कभीम-भूपालो धरित्रीं समपालयत्[27] ॥ 63
प्रौढानर्गल-विक्र-
98. मः कुलगृहं यो दण्डनीति-श्रियः
सत्याचार-विचार-चारुचरितः पुण्यैक-पारायणः ॥(।)
तस्यासीदनियङ्क-
99. भीम-नृपतेरद्धा(र्द्धा)ङ्गलक्ष्मीः स्वय(ं*)
स्नेहस्यातिशयेन पट्टमहिषी वाघल्लदेवी भुवि ॥ 64
तुलित-पितृगुणौघः सूनु-
100. रासीदमुष्या
निरतिशयित-तेजा यौवनावाप्त-राज्यः ॥(।)
प्रणत-नृपति-चूडारत्न-रोचिः-पिशङ्गी-
कृत-चरणस-
101. रोजो राजराजा नृपालः ॥ 65
यस्योद्यद्वाजि-वृन्द-प्रखर-खुर-पुटाघात-[28]निद्र्ना(र्द्दा)रितोर्व्वी-
सम्भूतम्भूरिभास्वत्कर-निकर-महः-स्यूत-सान्द्र-प्र-
102. याणो(णम् ।)
विस्तीर्ण्णं कर्ण्णतालाहतिभिरविरतोन्मत्त-सेनागजाना-
मष्टानां[29] दिग्गजानां मुखपटतुलनामदधे धूलि-जालं(लम्) ॥ 66
यस्मिन(न्) शासति
103. शासितामर-गणैः सम्यक(क्) समुद्राम्व
(म्ब)रा(ं*)
पृथ्वीं पार्थिवपुङ्गवे नय-गुणैः श्री-राजराजे नृपे
चक्रं माधव एव तैक्ष्ण्यमधिकं कौ-
104. क्षेयके चिन्तनं
शास्त्राभ्यास-विधौ विधौ च जडता काले कलिः(लेः) श्रूयते ॥ 67
यत्कीर्त्ति-दुग्ध-जलधिर्भुवनान्तरालं

संप्लाव्य दु(दू)रतरमु-
105. त्च्छ(च्छ)लितः स भाति ।
तारा-गणाः स्फू(स्फु)ट-रुचो गगने समन्ता-
त्सूक्ष्मातिसूक्ष्मतरला इव विप्रुषन्ति ॥ 68
त्यागे सौ(शौ)र्य्ये च सत्ये च
106. कर्ण्णार्ज्जुन-युधिष्ठिरैः (।*)
सदृशो(ऽ*)यम्महावीरो राजराजो नराधिपः ॥ 69
राजराजो नरपतिर्द्दश सप्त च वत्सर न(न्) ।
भुवि राज्य-श्रि-
107. यम्(यं) भुक्त्वा स्वाराज्याय प्रतस्थिवान(न्) । (।*) 70
चालुक्यकुल-संभूता वेला सौन्दर्य्य-वारिधेः (।*)
नाम्ना मल्हणदेवीति[30] महिषी तस्य भूपतेः ॥ 71
108. तस्यामभूदद्भुत-विक्रम-श्रिः(श्रीः)
श्रीमी(मा)नयं भूभृदनङ्कभीमः ।
विराजते कीर्त्ति-सुधा-तरङ्गै-
र्धौ(धौ॑)तासु (दि*)ग्भित्तिषु यत्प्रशस्ति(:*) ।(॥) 72

Fourth Plate : Second Side

109. यस्यानर्ग्गल-दोर्व्विलास-लहरी-लावण्य-वैरिव्रज-
त्क(क्र)न्दत्पौरवधू-विलोचन-पयःपूरैर्द्धरा दन्तुराम्[31] ।
किञ्च त्याग-तरङ्ग-
110. भङ्गि-कि(क)लनैः पाथोधि-यानोत्सवा-
द्व्रीडा-वक्रित-कन्धरः स भगवान्मन्ये पुराणो मुनिः ॥ 73
कस्त्वम्भोः कलिरश्मि(स्मि) किन्नु
111. विमनाः कस्मै निवेद्यात्मनः
शोकाम्भोधिमपाहरामि कलया कि(·*) वेत्सि नो मां हरिम् ।
यद्येवङ्कलयास्मदा-
112. न-[32]समयोत्क्षेपाय गङ्गान्वये
जातः श्रीमदनङ्कभीम-नृपतिः सो(ऽ*)प्यर्थभूतो[33] मम ।(॥) 74
ध्याना[34]नुव(ब)न्ध-निविड-प्रसर-
113. प्रमोद(·*)
माध्वीक-मुग्ध-मसृणं हृदयारविन्दम(म्) ।
देवः पुराणपुरुषः परिरभ्य यस्य
रोलम्व(म्ब)-डम्व(म्ब)र-कलाम्(लां) क-

114. लयाश्चकार । (॥) 75
लक्ष्मी-रक्षण-सौविदल्लं (ल्ल)-पदवी (*) प्रत्यर्थि-पृथ्वीभुजा-
म्प्राणाकर्षण-रज्जुवैभव-तुलामुद्दाममाम-
115. ण्डयन (न्) ।
सङ्ग्रामस्थलकेलि ताण्डवकला-पाण्डित्यमाण्डयन्
येनाय (*) जगद[द्धु]तैक-विलसत्क्रीडा-नटः
116. सायकः ॥ 76
हिरण्यगर्भ मा गर्व्वम् (र्व्वं) कुरुष्वेवेति सेर्ष्यया ।
हिरण्यगर्भो भूत्वा यः क्ष्मामिमाम्परि (र्य)पालय-
117. त (त्) ॥ 77[35]
यस्यानर्गल-विक्रमार्ज्जित-यशः क्षीरोद-दानोर्म्मिभिः (भि)-
दा (र्दा)तारः किल कामगो-प्रभु (भृ)तयः[36]
118. प्रोत्सारिता दूरतः ॥(।)
किञ्चायञ्च हिरण्यगर्भकलना-वैदग्ध्यमाक[र्ण्ण]य (यँ)-
ल्लज्जा-लोल-चतुर्म्मु-
119. खाक्षि-युगलो मन्ये महान् पद्मभूः ॥ 78
येनाभिषेक समयः कलित-त्रयेण
नीतस्तुलापुरुषदान-क-
120. लानुव (ब)न्धैः ।
लव्धा (ब्धा)पि नः क्षितिरमुष्य मुदे तथाभू-
द्यादृग्वि (ग् द्वि)जातिजन-शासनदान-केलिः ।(।*) 79
आकर्षता हृद-
121. यमेण-विलोचनाना-
माधु[न्व]ता च परितः प्रतिपार्थिवानाम् ।
अर्थान्वय-प्रणयिना कृतिनामनङ्ग-
भीम-प्र-
122. सिद्धिरमुना विदधे (धे) नृपेण ॥ 80[37]
सो (ऽ*)यं श्रीमदङ्कभीम-राउत्त[38]देवः शाकाब्दे (ब्दे) चन्द्रेषु-रुद्र-गणिते चैत्र-शुक्ल-नवम्यां
123. सौरि-वारे मीन स (*)क्रान्त्यां अभिनव-वारणसीकटके चित्रेश्वर-विश्वेश्वरयोर्म्मध्ये महानद्या साइलो-विषये [पु]रण-
124. ग्रामे दानसागर-भूमिदानावर्त्त (र्त्ते) महाभारतोक्तां पुण्यां मृदुरसां विंशति-वाटी-परिमितां भूमिं घृतकौशिक-गोत्रा-
125. य यजुर्व्वेदान्त र्गत-काण्व-शाखाध्यायि-पण्डित-सङ्कर्षणानन्द-

शर्म्मणे ब्रा(ब्रा)ह्मणाय भगवतः श्रीपुरुषोत्तमस्य प्रीतये

126. धारापूर्व्वकमाचन्द्रा[र्क्क]मुपभोगायाकरीकृत्य प्रादात् ॥ पुनरब्दा(ब्दा)-
न्तरे माघकृष्ण-षष्ठ्यां गुरुवारे तस्यान्नद्यान्तस्मिन्नेव वि-

Fifth Plate : First Side

127. षये तस्मिन् मास-दानावर्त्ते वामनपुराणोक्ता(·*) प्राकार-
मुखमण्डप-मध्यमण्डप-सहित-नृपतिगृहतुल्य-गृहच-

128. तुष्टय-नानापुरजन-समेत-त्रिंशत्(शद्)गृह-निर्म्मितं त्रिंशद्वाटी-
परिमित-भूमिकन्नगरन्तस्मै पण्डित-सङ्कर्षणा-

129. नन्दशर्म्मणे व्रा(ब्रा)ह्मणाय भगवतः श्रीपुरुषोत्तमस्य प्रीतये धारापूर्व्व-
कमाचन्द्रार्क्कमुपभोगायाकरीकृ-

130. त्य प्रादात् ॥ तस्य च जयनगर-ग्रामे दश-वाटी-परिमिता वास्तु-भूमिः ।
पूरण-ग्रामे विंशति-वाटी-परिमिता सस्य-

131. भूमिः ॥ तस्य पुर-जन-जाति-नामानि । तत्र वणिजः गान्धिक-
शाङ्खिक-पाटकार-स्वर्ण्णकार-कांस्यिकाः वापुलि-नारायण-दामोदर-माध-
[व]-[चि]-

132. त्रसोम-वाह्लु-केशव-महादेव-नरसिंघ(ह)-शिवु-नामानः ॥
ताम्वू(म्बू)लिकाः महानाद-सोमा-इ(मे)रण्डु नामानः ॥
मालिको मनु-नामा । गौ[डि]-

133. को महादेव-नामा । गोपालौ धीरु-गभी-नामानौ । तन्तुवायौ नागु-
जगाइ-नामानौ । तैलिकौ गणु-सुन्या-नामानौ । कुम्भका-

134. रौ अर्ज्जुन-विसू-नामानौ । कैवर्त्ताः राजु-वासु-पद्म-नामानः । नापितः
शिल्पिनो रजकश्च ॥ तथा तस्मिन्नेवाव्दे(ब्दे) त-

135. स्याम्महानद्यां मार्ग्गशीर्ष-पौर्ण्णमास्यां गुरु-वारे चन्द्रोपरागे
तस्मिन्पूरणग्रामे भूमिदानावर्त्ते वृ(बृ)हस्पत्यु-

136. क्ता(·*) गोचर्म्ममात्रामष्टादश-वाटी-परिमिताम्भूमिं भारद्वाज-
सगोत्राय दीक्षित-रुद्रपाणिशर्म्मणे वा(ब्रा)ह्मणा-

137. य तथा मकर-संक्रान्त्यां(न्त्याम्) आदित्यपुराणोक्तां पञ्च-वाटी-
परिमिताम्भूमिं राथीतर-सगोत्राया[39]हिताग्नि-सोमपालश-

138. र्म्मणे व्रा(ब्रा)ह्मणाय[40] तथा श्री-पुरुषोत्तमदेवस्य प्रतिष्ठा-समये
कास्य(श्य)प-सगोत्रायाचार्य्य-चन्द्रकरशर्म्मणे व्रा(ब्रा)ह्मणाय

139. च द्वि-वाटी-परिमिताम्भूमिं भगवतः श्रीपुरुषोत्तमस्य प्रीतये

धारापूर्व्वकमाचन्द्रार्क्कमुपभोगायाकरीकृत्य

140. प्रादात् ॥ एते काण्वशाखाध्यायिनः ॥ पु(पू)रणग्रामे मिलित्वा
एताः पञ्चषष्ठि(ष्टि)र्व्वाटयः ॥ पश्चिमोत्तर-पूर्व्व-प्रदेशेषु पूर्व्वसिद्ध-

141. ग्रामसीमावच्छिनाः(न्नाः) । दक्षिणे यावन्नलितम् ॥ एतन्मध्ये
पूतिमाष-गोत्र-शासनाधिकारि-गङ्गाधरार्य्यस्य[41] भूवाटिच(ट्ये)का
गृहवाटी

142. च ॥ ताम्ब्र(म्र)-शिल्पिनो मा(म)हानादस्यैतदम्[42] ॥ श्रीपुरुषोत्तम-
क्षेत्रे दक्षिण-त्री(तो)र्थराज-तटे कर्क्कटकामावास्यायां सूर्य्योपरागे

143. तस्मिन् पूरणग्रामे कात्यायन-गोत्रायाचार्य्याग्निचित्कापडीशर्म्मणे व्रा-
(ब्रा)ह्मणाय यजुर्व्वेदान्तर्ग्गत-काण्व-शाखाध्यायिने
ना-

144. नागोत्र-ऋग्वे[43]वेदाध्यायि-ऋत्विक-धृतिकरानन्त-विश्वेश्वर-यज्ञ-
सिद्धू-शङ्कर-माधव-पृथी(थ्वी)धर-सहिताय हिरण्यगर्भ-महादा-

145. नाङ्गत्वेन पञ्च-वाटी-परिमिताम्भूमिन्धारा-पूर्व्वकमाचन्द्रार्कमुपभोगा-
याकरीकृत्य प्रादात् ॥ तत्राचार्य्यस्य तिस्रो वाटयः ॥ ऋ-

Fifth Plate : Second Side

146. त्विजाम्(जां) द्वे वाट्यौ । तथा अभिनव-वाराणस्यां भगवतः श्रीपुरु-
षोत्तमदेवस्य सन्निधौ मकरामावास्यायां रवि-वारे कुद्दिण्डा-
विषये विला-

147. सपुर-ग्रामे दानसागरे विष्णुधर्म्मोक्ता(ऽ*) यव-गोधूमेक्षु-सन्ततामष्ट-
मानातिरिक्त -[चतु]र्व्वाटी-परिमिताम्भूमिं भारद्वाज-सगोत्रा-

148. य देवधरशर्म्मणे व्रा(ब्रा)ह्मणाय यजुःसामान्तर्ग्गत-काण्व-कौथुम-शाखै-
कदेशाध्यायि[ने] भग[वतः] श्री-पुरुषोत्तमस्य प्रीतये

149. धारापूर्व्वकमाचन्द्रार्क्कमुपभोगायाकरीकृत्य प्रादात(त्) ॥
मद्दानफल-सिद्ध्यर्थन्तद्रक्षा-[फल-सिद्धये ।]
[म]द्धर्म्मः परिपाल्यो(ऽ*)यम्भूपैराच-

150. न्द्र-तारकम् ॥ 81
मा भूदफल-शङ्का ते परदत्तेति पार्थिव ।
स्व-दत्तादधिकम्पुण्यम्पर-दत्तानुपाल[ने ॥] 82
[स्व]-दत्ताम्पर-दत्ताम्वा(त्तां वा) यला(त्ना)द्रक्ष युधि-

151. [ष्ठि]र ।
महीम्मतिमतां श्रेष्ठ दानात्त्रे(च्छ्रे)यो(ऽ*)नुपालनम् ॥ 83
स्व-दत्ताम्पर-दत्ताम्वा(त्तां वा) यो हरेत वसुन्ध[राम्] ।
स विष्ठायां कृमिर्भूत्वा पितृभिः
152. सह पच्यते ॥ 84
निर्ज्जले प्रान्तरे देशे शुष्क-कोटर-वासिनः ।
कृष्णसर्पा हि जायन्ते ये हरन्ति वसु[न्धराम्] ॥ 85
गामेकां स्वर्ण्णमेकम्वा(कं वा) [भूमेर]-
153. प्यर्द्धमङ्गुलम् ।
हरन्नरकमाप्नोति यावदाभूतस(ं*)प्लवम् ॥ 86
शत्रुणापि कृतो धर्म्मः पा[ल]नी[यो] मनीषिभिः ।
शत्रुरेव हि शत्रु(:*) स्याद्धर्म्मः
154. शत्रुर्न्न कस्यचित् ॥ 87
मद्वंशजाः परमहीपति-वंशजा वा
पापादपेत-म[नसो] [भुवि] भावि-भूपाः ।
ये पालयन्ति मम
155. [ध]र्म्ममिदं(मं) समस्त-
न्तेषाम्मया विरचितो(ऽ*)ञ्जलिरेष मूद्धनि(र्द्ध्नि) ॥ 88
तस्याज्ञया यथाज्ञानं गङ्गान्वय-गणान्प्रति ।
प्रशस्ति-र-
156. [च]ना-श्लोकानप्पनः[44] कृतवान्कृती ॥ 89

1. From the original plates and their impressions. See plates in *Ep. Ind.*
2. Expressed by symbol.
3. Read *guṇaṁ* for the sake of the metre.
4. Some other later Gaṅga records make Purūravas the son of Anala and grandson of Budha although the relationship indicated by our record is supported by ancient Indian literature.
5. Some records wrongly read *Vāyu* in place of Āyu.
6. Some inscriptions read Chitrāṅgada instead of Vichitrāṅgada.
7. The *daṇḍa* is superfluous.
8. The first *akshara* of this name is often found to be *Śi*, *Śī* and *Sī*. Sīradhvaja is a famous name in the epics and the Purāṇas.
9. The name has been read in one record as Medhāvi.
10. In some records Jayasena's son is called Vijayasena.
11. Read *Pragalbhaḥ* and note how the word is written in line 76 below. In line 87 the word has been written as in the present case. In some records Pragalbha is mentioned as the father of Śakti.
12. An extra hook of *ka* wrongly incised at the right of the superscript *na* has made *nkra* look like *kkra*.

13. In some inscriptions the name has been read as Nārasiṁha.

14. A sign of superscript *r* had been incised above *sa* and then erased.

15. Read *°ñ=chiraṁ.*

16. Verse 14 is found in some records of Anantavarman Choḍagaṅga while the following verse is found in the records of Vajrahasta III, his son Rājarāja I and the latter's son Choḍagaṅga.

17. A *visarga* sign had been here incised and afterwards erased.

18. Omit *cha* for the sake of the metre.

19. Read *prabhṛitito Gaṅg-ā°.*

20. Read *chandra* in place of *chitra.* Other records read *Ved arttu-vyoma-chandra* instead of *nand-arttu-vyoma-chitra. Nanda*=9, *ṛitu*=6, *vyoma*=0, *chandra*=1, *veda*=4. The Śaka year is 1069 and not 1064.

21. The *akshara ya* is written here as in modern Oriya.

22. Read *°apare loke.* The *anusvāra* sign looks like the superscript *ra* in this case. Some versions read *°m=apare loke....pur=ety=atyartham* (or *°utkrishṭaṁ*) *pravadanti.*

23. *Jya* was at first incised in the place of *yya.*

24. The *anusvāra* sign here looks like superscript *r.*

25. *Kshi* was originally incised in place of *tvi.*

26. *Rā* had been at first omitted and afterwards somehow indicated.

27. The mark indicating final consonant is placed below *ya.*

28. The *ā* sign of *ghā* had been at first omitted and was later indicated by a short stroke.

29. The *anusvāra* sign here looks like a superscript *r.*

30. This seems to be the correct form of the name that has been read wrongly in one record as Maṅkuṇadevī and actually reads Sa(*d**)guṇadevī in another. Cf. Prahlāda in line 28 and Vāhlu in line 132.

31. Read *danturā.*

32. Read *°y=āsmadīya.*

33. Better read *so='nartha.*

34. An additional medial *u* sign is found with *nā.*

35. This verse is not found in some later records giving the genealogy of the Gaṅgas.

36. Note the same form of *bhu* in line 104.

37. The verses from the beginning upto line 122 are found quoted in the later charters of the family often with slight variations.

41. The restoration is due to Kielhorn.
42. Kielhorn reads *samudra-gata-kīrtti°* and suggests the alternative reading *samaṁ bhramati kīrtti°*. There can be no doubt that the latter is the correct reading as *maṁ* and *ti* are quite clear.
43. Kielhorn reads *Kañchhukā.*
44. Restorations in the verse are due to Kielhorn.
45. We need not correct it to *raveḥ* which is the suggestion of Kielhorn.
46. Before this word Kielhorn wants to read *yasy=aujo na vyaraṁsīd=bhuvana°.*
47. Read *prasaraṁ* which is Kielhorn's reading.
48. Kielhorn has *saṁkathā°.*
49. Read *tridiva.*
50. Vaikuṇṭha is a form of Vishṇu whose description is given in the *Rūpamaṇḍana* (III. 52-53) by *Sūtradhāra* Maṇḍana (middle of the 15th century) as follows :

> *Vaikuṇṭhaṁ cha pravakshyāmi so='shṭa-bāhur=mahābalaḥ /*
> *Tārkshy-āsanaś=chaturmukhaḥ karttavyo bhūtim=ichchhatā //*
> *gadāṁ khadgaṁ śaraṁ chakraṁ dakshiṇe cha chatushṭayam /*
> *saṁkhaṁ kheṭaṁ dhanuṁ padmaṁ vāme dadyāch=chatushṭayam //*

A Vaikuṇṭha image from Gujarat has been reproduced in *IHQ*, XVI, Plate II facing p. 530.

51. Kielhorn's text has *prastayamāna* which may be a misprint.
52. Kielhorn reads *namvra.*
53. Kielhorn reads *tīrasthite,* but suggests the reading *°sthitād=bhāsvataḥ.* Better read *°sthiter=Bhāsvataḥ.*
54. This restoration is due to Kielhorn.
55. Read *śabd-ānuśāsana.*
56. Kielhorn doubtfully reads *gu* which seems to be clear.
57. Here 10 or 12 *aksharas* cannot be read.
58. Read *°deve.*
59. Kielhorn's suggested reading is *vasudh=ānadhigatā nir'dagdha-vairibhiḥ.*
60. There is the symbol of a lotus here.

F—The Kings of Kārttikeyapura

No. 15—Pāṇḍukeśvar Copper-plate Inscription of Lalitaśūra, Regnal year 22 (854 A.D.)

Pāṇḍukeśvar, Garhwal District, U.P.
D.C. Sircar, *Ep. Ind.*, XXXI, pp. 277ff.

Language : Sanskrit.
Script : Siddhamātṛikā.
Metres : Vv. 1-4 *Anushṭubh*; V. 5 *Pushpitāgrā*.

Summary : There was the illustrious NIMBARA whose son, born from the queen Nāśūdevī, was ISHṬAGAṆADEVA. The latter's queen Vegādevī gave birth to LALITAŚŪRADEVA. From the city of KĀRTTIKEYAPURA, *Paramabhaṭṭāraka Mahārājādhirāja Parameśvara* LALITAŚŪRADEVA informed all the officials assembled there, together with the officers in charge of the townships inhabited by the eighteen kinds of subjects, headed by the *Rājan*, *Rājanaka*, *Rājaputra*, *Rājāmātya*, *Sāmanta*, *Mahāsāmanta*, *Ṭhakkura*, *Mahāmanushya*, *Mahākārttākṛitika Mahāpratīhāra*, *Mahādaṇḍanāyaka*, *Mahārājapramātāra*, *Śarabhaṅga*, *Kumārāmātya*, *Uparika*, *Duḥsādhyasādhanika*, *Dāśāparādhika*, *Chauroddharaṇika*, *Śaulkika*, *Gaulmika*, *Tadāyuktaka*, *Viniyuktaka*, *Paṭṭakāpachārika*, *Āshedhabhaṅgādhikṛita*, superintendents of the elephant, horse and camel troops, *Dūta*, *Preshaṇika*, *Dāṇḍika*, *Dāṇḍapāśika*, *Gamāgamin*, *Khāḍgika*, *Abhitvaramāṇaka*, *Rājasthānīya*, *Vishayapati*, *Bhogapati*, *Tarapati*, *Aśvapati*, *Khaṇḍaraksha*, *Pratiśūrika*, *Sthānādhikṛita*, *Vartmapāla*, *Koṭṭapāla*, *Ghaṭṭapāla*, *Kshetrapāla*, *Prāntapāla*, *Kiśoravaḍavāgomatishyadhikṛita*, *Bhaṭṭa-Mahattama*, cowherd, merchant, and foremen of guilds, down to the KHAŚA, KIRĀTA, DRAVIḌA, KALIṄGA, GAUḌA, HŪṆA, UḌRA, MEDA, ANDHRA and CHĀṆḌĀLA, to all the inhabitants, to the entire people, to the regular and irregular soldiers (or, Pāiks and Barkandāzes), etc., that some land which was in the possession of a person named Denduvāka and was lying within the jurisdiction of the administrative unit called Thappalasāri forming a part of the *vishaya* of KĀRTTIKEYAPURA was granted in favour of the god NĀRĀYAṆA-

BHAṬṬĀRAKA installed by BHAṬṬA-ŚRĪPURUSHA in a village called GARUḌĀGRĀMA. The executor of the grant was the *Mahādānākshapatalādhikṛita* PĪČKA. The record was engraved by Gaṅgabhadra from the draft of the original prepared by *Mahāsāndhivigrahākshapaṭalādhikṛita* ĀRYAṬA. The record was issued in the king's REGNAL YEAR 22, on the 15th day of the dark half of KĀRTTIKA (see below).

TEXT[1]

1. सिद्धम्[2] स्वस्ति ।। श्रीमत्कार्त्तिकेयपुरात्सकलामर-दि[ति]तनुज-मनुज-विभु- भक्ति-भाव- भरानमितामितोत्तमाङ्ग - संगि-विकट-मुकुट-किरीट-विटङ्क-कोटि-कोटि-श्वेतैकता-
2. नानायक-प्रदीप-दीप्त-दीधिति-पान-मद-रक्त- चरण-कमलामल-विपुल-व-(ब)ह(ल*)- किरण-केसरासार-सारिताशेष- विशेष-मोषि-घन-तमस्ते-जसस्स्वधु र्नी-धौत-जटाजू-
3. टस्य भगवतो धूर्ज्जटे ⁀ प्रसादान्निजभुजोपार्ज्जितो(तौ)र्ज्जित्य-निर्ज्जित-रिपु-तिमिर-लब्धो(ब्धो)दय-प्रकाशः दया-दाक्षिण्य-सत्य-सत्त्व-शील-शौच-शौर्यौ र्दार्य-गाम्भीर्य-मर्यादार्य-वृत्ताश्च-
4. र्य-कार्य-वर्यादि-गुण-गणालंकृत-शरीरः महा-सुकृति-सन्तान-वीजाव-तारः कृत-युगागम-भूपाल-ललितकीर्त्तिः नन्दाभगवती-चरण-कमल-कमला-सनाथ-मूर्त्तिः श्री-
5. निम्व(म्ब)रस्तस्य तनयस्तत्पादानुध्यातो राज्ञी महादेवी श्री-नाशूदेवी तस्यामुत्पन्नः परममाहेश्वरः परमव्र(ब्र)ह्मण्य[:] शित-कृपाण-धारोत्-खात-मत्तेभ-कुम्भाकृष्टोत्कृष्ट-मुक्ता-
6. वली-यशः-पताकोच्छ्राय-चन्द्रिकापहसित-तारा-गणः परमभट्टारक-महा-राजाधिराज- परमेश्वर - श्रीमदिष्टगणदेवस्तस्या(स्य) पुत्रस्तत्पादानु-ध्यातो राज्ञी महादेवी श्री-
7. वेगादेवी तस्यामुत्पा(त्प)न्नः परममाहेश्वरः परमव्र(ब्र)ह्मण्य[:] [कलि]-कलङ्क- पङ्कातङ्क- मग्न-धरण्युद्धार-धारित- धौरेय-वर-वराह-च-रितः सहज-मति-विभव-विभु-विभूति-
8. स्थगितारारति-चक्र-प्रताप-दहनः प्र[ति]वैभव-संभारारम्भ-[संभृत]-भीम-भ्रूकुटि-कुटिल-केस[रि]-सटा-भीत-भीतारातीभ-कलभ-भर[:] प्रतुण्ड-रण-(त्*)-कृपाण-वा(बा)ण-गण-प्राण-

9. गुण-हठाकृ[ष्टो]त्कृष्ट - सलील-जयलक्ष्मी - प्रथम-समालिङ्गनावलोकन-
वैलक्ष्य-सखेद-सुरसुन्दरी-विधूत-कर - स्ख[ल]द्व[ल]य - [कु]सुम - प्रकर-
प्रकीर्ण्णावतंस-सम्व(संव)र्द्धित-कीर्त्ति-

10. वी[ज]: पृथुरिव दोर्द्दण्ड-साधित-धनुर्म्मण्डल-व(ब)लावष्टम्भ-वस-
(श)-वशीकृत-गोपाल[ना]-निश्चलीकृत-धराधरेन्द्रः परमभट्टारक-महारा-
जाधिराज-परमेश्वर-श्रीमल्ललि-

11. तशूरदेव: कुशली। श्रीमत् कार्त्ति[क(केय)पु]र-विष[ये]समुपगता[न्सर्व्वा]-
नेव नियोगस्था[न्रा]ज-राजनक[3]-राजपुत्र-राजामात्य-सामन्त-महासामन्त-
ठक्कुर-महामनुष्य-म-

12. हाक(का)र्त्ताकृ[ति]क- म[हाप्रतीहार]- महादण्डनायक- महाराजप्र[मा-
तार]-शरभङ्ग -[कु]मारामात्योपरिक - दुस्साध्यसाधनिक - द(दा)शाप-
राधिक-चौरोद्धरणिक-शौल्कि-

13. क-गौल्मिक- तदायुक्तक - विनियुक्तक - पट्टकापचारी(रि)काशे(से)ध-
भङ्गाधिकृत-[हस्त्य]श्वोष्ट्र-व(ब)ल - व्यापृतक-दूत - प्रेषणिक-द(दा)-
ण्डिक-द(दा)ण्डपाशिक-गमागमि-खा-

14. ड्गिकाभित्वरमाणक - राजस्थानीय - विषयपति - भोगपति - तरपत्यश्व-
पति-खण्डरक्ष-प्रति[शू]रिक-स्थानाधिकृत-वत्म(र्त्म)पाल-कोट्टपाल - घट्ट-
पाल-क्षेत्रपाल-प्रा[न्त]-

15. पाल-कि[शोर-व]डवा-गोमहिष्यधिकृ[त-भट्टमहत्त]माभीर - वणिक्श्रेष्ठि-
पुरोगान्साष्टादश- प्रकृत्या(त्य) धि[ष्ठा]नीयान्खष(श)-किरात - द्रविड-
कलिङ्ग-गौ-

16. ड-हूणोड्र-मदा[न्ध्र]-चाण्डाल- पर्यन्तान्सर्व्वं-सम्वा(संवा)सान्सम[स्त]-ज-
(जा)नप[दा]न्भट- चा[ट -सेवक]दीनन्यान्श्च(न्यांश्च) कीर्त्तितान-
कीर्तितानस्मत्पाद-पद्मोपजीविनः प्रतिवासि-

17. न[श्च] व्रा(ब्रा)ह्मणोत्तरा[न्य]थार्हं मानयति वो(बो)धयति समा[ज्ञा]-
पयत्य[स्तु] वस्सम्वि(स्संवि)दित(म्*)उपरि-संसूचित-विषये थप्पलसा-
[रि]-प्रतिव(ब)द्ध-देन्दुवाक-परिभुज्यमा-

18. न(नं) [ता]वत्स्थानं मया मातापित्त्रोरात्मनश्च पुण्य-यशो(ऽ*)भिवृद्धये
पवन-विघट्टिताश्वत्थ-पत्त्र-चञ्चल-तरङ्ग-जीवलोकमवलो[क्य ज]ल-वु-
(बु)द्बु(द्बु)दाकारमसार[ञ्चा]-

19. युर्दृष्ट्वा गज-कलभ-कर्ण्णाग्र-चपलताञ्च ल[क्ष्म्या ज्ञात्वा] परलो[क-
निःश्रे]यसार्थ(र्थं) संसारार्ण्णव-तरणार्थञ्च पुण्ये(ऽ*)ह[नि] विषु(व*)-
संक्रान्तौ ग[न्ध]-पुष्प-धूप-दीपोपलेपन-व(ब)-

20. लि-चरु-नृत्य-गेय-वाद्य-सत्त्रादि-प्रवर्त्तनाय खण्ड-स्फुटित-स(सं)स्करणाय
भृत्य-पादमूल-भरणाय च अभिनव-कर्म्म-करणाय च गरुडा-ग्रामे भट्ट-श्रीपुरु-
21. षेण प्रतिष्ठापित-भगव[ते] श्री-नारायण-भट्टारकाय शासन-दानेन प्रति-
पादितं प्रकृति-परिहार-युक्तमचाट-भट-प्रवेशमकिञ्चित्प्रग्राह्यमनाच्छेद्यं-
(द्यम्) आचन्द्रा-
22. र्क्क-क्षिति-स्थिति-समकालिकं विषयादुद्धृत-पिण्डं स्व-सीमा- गोचर-
पर्यन्तं स-वृक्षारामोद्भेद-प्र[स्रव]णोपेतं देव-ब्रा(ब्रा)ह्मण-भुक्त-भुज्य-
मान-वर्ज्जितं (तम् ।) यतस्सु[ख ·] प(पा)रंपर्य्ये-
23. ण परिभुञ्जतश्चास्योपरि-निर्द्दिष्टैरन्यतरैर्व्वा धरण-विधारण-परिपन्थना-
दिकोपद्रवो मनागपि न कर्त्तव्यो(ऽ*)[तो](ऽ*)न्यथाज्ञा-हानौ महाद्रोहः
स्यादिति । निवेशं(शः) तस्य देवस्य व(ब)-
24. दरिकाश्रमीय-तपोवन-प्रतिव(ब)द्ध-व्र(ब्र)ह्मचारी(रि)णां स(य)त्-
किञ्चित्साध्यं(ध्यं) तत्त्र कर्त्तव्यं तत् स[र्व्वं] व्र(ब्र)ह्मचारिभिः
करणीयं(यम्) । प्रवर्द्धमान-विजय-राज्य-सम्व(संव)त्सरे द्वाविङ्श-
(विंश)तितमे सम्व(संव)त्
25. २२ कार्त्तिक-वदि १५[4](।*)दूतकोत्त्र महादानाक्षपटलाधिकृत-श्री-पीऊक-
(कः ।) महासन्धिविग्रहाक्षपटलाधिकृत-श्रीमदार्यटः(ट) - वचना(त्*)
टङ्कोत्कि(त्की)र्ण्णं(र्णं)श्रीगङ्गभद्रेण ॥
ब(ब)हुभिर्व्व-
26. सुधा भु[क्ता] राजभिस्सगरादिभिः (।*)
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं(लम्) (॥) 1
स्व-दत्ताम्परदत्ताम्वा(त्तां वा) यो हरेत वसुन्धरां(राम्) ।
षष्टिम्व(ष्टिं व)र्ष-श(स)हस्राणि श्व-विष्ठ्या[5] जायते कृ-
27. मि(मिः ॥) 2
षष्टिम्व(ष्टिं व)र्ष-सहस्राणि स्वर्ग्गे तिष्ठति भूमिदः ।
अच्छेत्ता चानुमन्ता च्च(च)तान्येव नरके वसेत् ।। 3
गामेक(का)ञ्च सुवर्ण्णञ्च भूमेरप्येकमङ्गुलं(लम्) ।
हृत्वा नरकमायाति यावदा-
28. भूति(त)-संप्लवः(वम्) । 4
इति कमल-दलाम्वु(म्बु)-विन्दु-लोलां
श्रियमनुचिन्त्य मन(नु)ष्य-जीवितञ्च ।
श(स)कलमिदमुदाहृतञ्च वु(बु)[द्ध्वा]
न हि पुरुषैः पर-कि(की)र्त्तयो विलोप्यः(प्याः) ॥[6] 5

1. From impressions. See Plate in *Ep. Ind.*, XXXI.

2. Expressed by symbol.

3. The word is also found in the form *Rājānaka*, the same as *Rāṇaka* of later records.

4. Considering the palaeography of the inscription and the fact that Māgha-vadi 3, Uttarāyaṇa-saṅkrānti, year 21 of Lalitaśūra's reign, which is the date of another charter of the king, seems to correspond to the 22nd December, 853 A.D., Kiehlorn was confident that the date of the present charter corresponds to the 25th September, 854 A.D. For the other inscription edited by Kielhorn, see *Ind. Ant.*, XXV, 1896, pp. 177 ff.

5. Read *vishṭhāyāṁ* for *śva-vishṭhyā*.

6. Here there is a design indicating the end of the writing.

G—The Gāhaḍavālas

No. 16—Chandrāvatī Copper-plate Inscription of Chandradeva, [Vikrama] year 1150 (1092 A.D.)

Chandrāvatī, Varanasi District, U.P.
Daya Ram Sahni, *Ep. Ind.*, XIV, pp. 192ff. Cf. R. Niyogi, *Ind. Hist. Quart.*, XXV, pp. 36-37; D.C. Sircar, *Ep. Ind.*, XXXV, p. 202, note 6.

Language : Sanskrit.
Script : Early Nāgarī.
Metres : Vv. 1, 4-5, 15-20 *Anushṭubh*; Vv 2-3, 7-8, 10-12, 22 *Vasantatilaka*; V.6 *Śārdūlavikrīḍita*; V.9 *Sragdharā*; V.14 *Śālinī*; V. 21 *Mālinī*.

Summary : On the destruction of the family of [Pratihāra] DEVAPĀLA, another dynasty of rulers occupied the city of KANYAKUBJA. In this family was born YAŚOVIGRAHA. His son was MAHĪCHANDRA, and the latter's son CHANDRADEVA conquered the GĀDHIPURA kingdom by his own prowess.—*Paramabhaṭṭāraka Mahārājādhirāja Parameśvara Paramamāheśvara* CHANDRĀDITYADEVA, after bathing at the SVARGADVĀRA-TĪRTHA at the confluence of the SARAYŪ and the GHARGHARĀ in Ayodhyā conferred on a body of five hundred Brāhmaṇas the KAṬHEHALĪ-PATTALĀ (modern Kaṭehir Pargana of the Varanasi District, U.P.) bounded by the KOLLAKANANDIVĀRA-PATTALĀ, and the GOMATĪ, BHĀGĪRATHĪ and VARAṆĀ rivers, with the exception of certain villages formerly given to temples and Brāhmaṇas as *vikara* (rent-free) holdings, on SUNDAY the 15TH day of the DARK HALF of the month of ĀŚVINA in [VIKRAMA] 1150, on the sacred occasion of a SOLAR ECLIPSE. The village of SARISOḌA in the BṚIHADṚIHEVAṀKĀṆAI-PATTALĀ was also granted in favour of the Brāhmaṇa settlement (*Brahmapurī*). The inhabitants of the KAṬHEHALĪ-PATTALĀ and persons depending on His Majesty, such as *Rājan*, *Rājñī*, *Yuvarāja*, *Mantrin*, *Senāpati*, *Purohita*, *Dūta*, officers in charge of the *karin*, *turaga*, *paṭṭana*, *ākarasthāna*, *vishaya*, *gokula*, etc., were

informed of the grant. The land was granted together with its, water and dry land, hills and forests, ravines and saline wastes, stones, mines of iron and salt and with its groves of *madhūka* and mango trees, enclosed gardens, bushes, grass and pasture land. The donees were allowed to enjoy every kind of income, the due share of the produce, the *bhoga, kara, turushka-daṇḍa, praty-ādāya, vishaya-dāna*, etc., and also *naukā-bhāṭaka* and *taradāya*. HṚIDAYADHARA, son of Śivastambha of the KĀYASTHA community, wrote the copper-plate charter.

TEXT[1]

First Plate

1. [स्वस्ति ।।]
अकुण्ठोत्कण्ठ-वैकुण्ठ-कण्ठ-पीठ-लुठत्करः ।
संरंभः सुरतारम्भे स श्रियः श्रेयसे(ऽ*)स्तु वः ।। 1
आसीदशेष-नरनाथ-किरीट-कोटि-
संघट्ट-घट्टित-लसन्मणि-पाद-पीठः ।
श्रीदे-
2. वपाल-नृपतिस्त्रिजगत्प्रगीत-
कुंदेंदु-धाम-हिम-कैरव-कान्त-कीर्त्तिः ।। 2
कालेन नाशमथ तस्य गते(ऽ*)न्ववाये
दोर्द्दण्ड-विक्रम-हठार्ज्जित-कन्यकुब्जः(ब्जः) ।
क्षात्रो(ऽ*)यमत्र व(ब)हु-पत्ररथानुगम्य-
मा-
3 नोन्नतिर्विजयते भुवि भूप-वंशः ।। 3
तस्मिन्वंशे समुत्पन्नो यशोविग्रह-संज्ञकः ।
विगृह्य मेदिनी येन दण्ड-प्रणयिनी कृता ।। 4
तत्सुतो(ऽ*)भून्महीचन्द्रश्चन्द्र-धाम-निभं निजं(जम्) ।
येनापारमकूपार-पारे
4. व्यापारितं यशः ।। 5
तस्याभूत्तनयो नयैकरसिकः क्रान्त-द्विषन्मण्डलो
विध्वस्तोध्वत-वीर-योध-तिमिरः श्री-चन्द्रदेवो नृपः ।
येनोदारतर-प्रताप-शमिताशेष-प्रजोपद्रव-
श्रीमद्गा-

5. धिपुराधिराज्यमसमं दोर्व्विक्रमेणार्ज्जितम् ॥ 6
तीर्थानि काशि-कुशिकोत्तरकोसलेंद्र-
स्थानीयकानि परिपालयताभिगम्य(।*)
हेमात्मतुल्यमनिसं(शं) ददता द्विजेभ्यो
येनांकिता वसुम-
6. ती शतशस्तुलाभिः ॥ 7
हैमानि येन मणिभिः खचितान्यनर्घै-
र्दत्तानि विष्णु-हरये च विभूषणानि ।
काश्यां व्यभूषयदनेक-सुवर्ण्ण-रत्नै-
र्यश्चादिकेशव-विभोः प्रतिमां निवेश्य ॥ 8
केशा-
7. नाकर्ष हर्षादपहर कुचयोरंव(ब)रं भिंद्धि सन्धी-
नुद्गाढान्कंचुकस्य प्रणम चरणयोर्नू पुरासक्त-हस्तः ।
नीवीमुन्मुंच कांचीमपनय न चिरादित्थमुद्वेलराग-
श्चक्रे वै संकर्त्वो(था)नां स्व-पतिरि-
8. व रते यस्य लुंटन्भटौघः ॥ 9
दिक्चक्र-चुंवि(बि)-रुचिर-प्रसरत्करो यः
पद्माकरानसुहृदो मुकुलीकरोति ।
अस्मै कलंक-मलिनाय जडात्मने च
वक्राय न स्पृहयते रजनीकराय ॥ 10
9. प्राचीनमनुप्रचलितानि व(ब)लानि यस्य
धूलीभिरंवु(बु)-घन-पंकमकार्षु रप्धेः(ब्धेः) ।
किं चौर्व्व-रोचिरचिरोष्मभिरन्तराश(स)-
न्यादांसि पंक-पुट-पाक-पचेलिमानि ॥ 11
क्षोणीतलं विपुलमद्रि-पतीनुद-
10. प्रा-
नंभोनिधीनतिपृथून्ककुभां महेभान् ।
उल्लंघा(घ्य) स(श)क्रपुर-सीम्नि यसो(शोऽ)स्ति वृद्धं
यस्य श्रम-क्लम-भरादिव संमुमूर्च्छ ॥ 12
रवि-शशि-कुले गुणाढ्या भारवयो राजशेखरा रेजः ।
जगति
11. पुनरेक एव स्वामी योगीश्वरश्चंद्रः ॥ 13

सो(ऽ*)यं नरपति-मुकुट-मकरिका-मरकत-प्रभा-पटल-पल्लवित-पादपीठो गजपति-गल-गर्ज्जित-प्रलय-पचाननस्त्रिशंकु-पति-क-

12. पट-पाटन-ऋकच-पातश्चपल-पंचाल-चूल-चुवनचण-चंद्रहासो गिरिपति-पिचु- पिण्ड- चण्ड-मारुतः कवलित-कलिकाल-कपट-पेटको निर्व्वाण-पथिक-लोपाक-दर्शनः समधिग-

13. त-सकल-दर्शन-स्वर-सपेशल-ज्ञान- संपद्विजित-मुनि-मनोवृत्तिराश्रयः श्रेय-सामाकरः सर्व्वविद्यानामालयः कलानामाधारः सामि(स्वामी) संपदां परमभट्टारक-महाराजाधिराज-प-

14. रमेश्वर-परममाहेश्वर - निज-भुजोपार्जित-श्री-कन्यकुब्जा(ब्जा)धिपत्य-श्रीमच्चन्द्रादित्यदेवो विजयी ।। च्छ ।। कठेहलीपत्तला-निवासिनो निखिल-जनपदानुपगतानपि च रा-

15. ज-राज्ञी-युवराज-मंत्रि- सेनापति- पुरोहित- प्रतीहाराक्षपटलिक- भाण्डा-गारिक-भिषग्नैमित्तिकान्तःपुरिक-दूत-करि-तुरग-पत्तनाकरस्थान - विषय-गोकुल-प्रमुखाधिकारि-पु-

16. रुषानपरानपि यथार्हं मानयति वो(बो)धयत्याज्ञापयति च यथास्तु वो विदितंव तावदियमनित्यता जगतः कतिपय-दिवसावलोक-रमणीया मधुमास-कुसुम-संपदिव सं-

17. पत(त्*) सतत-गत्वर-स्वरूपं गिरि-कटक- वाहिनी-पुलिन-वालुका-कूट-मिव देहिनामायुरापान-मधुराः कटुक-पाकिनो दुर्जरास्तिलखला इव विषय-भोगाः सदसदालो(कन*)-परा-

18. ङ्मुखानि स्वार्थैक-निष्ठानि वेश्या-विलसितानीव दुरुपचाराणीन्द्रियाणि कतिपय-कला-विलासिनी जल-वुद्व(बुद्ब)द- स्तवक-संपदि[व] यौवन-श्री-स्तदिदमस्माभिरपि सकल-दर्शनावि-

19. संवादिनीभिः प्रामाणिकीभिः श्रुतिभिः परिच्छिद्य हरि-हर-कमलासन-सुनासीरपुर-भोग-भाजनं भूमिदानमिति कृतनिश्चयैरुत्तरकोशलाभिधा-नायामयोध्या-

Second Plate

20. या पचाशदधिकैकादश-स(श)त-संवत्सरे आश्विने मासि अमावस्यायां रवि-दिने(ऽ*)ङ्के(ऽ*)पि सवत् ११५० आश्विन-वदि १५ रवौ सूर्यो-पराग-पर्व्वणि जनित-मरय-घर्घरा-

21. घमर्षणे स्वर्गद्वार-नाम्नि तीर्थे स्नात्वा विधिवन्मन्त्र-देव-मुनि-मनुज-भूत-पितृगणांस्तर्पयित्वा तिमिर-पटल-पाटन-पटु-मह[सम्]ष्णरोचिष-मुपस्थाय क्षिति-जल-दहन-पवन-ग-

22. गन - यजमान - तुहिन-किरि(र)णारुण - वपुषमोषधीपति-शकल-शेखरं समभ्यर्च्य भगवतस्त्रिभुवन-त्रातुर्व्वासुदेवस्य पूजां विधाय प्रचुर-पायसेन हविषा हविर्भुजं हुत्वा पितृपि-

23. ण्ड-यज्ञन्निर्व्वर्त्त्य उपरि-लिखित-पत्तला स-जल-स्थल-गिरि-गहन-गर्त्तोषर-पाषाण-लोह-लवणाकरा स-मधूक-चूत-वन-वाटिका-विटप-तृण-यूति-गोचर-पर्यंता विसे(शे)षतो निर्द्दिक्ष(द्दिश्य)-

24. मान-पूर्व्वदत्त-देव-द्विज- विकर-ग्राम-वर्जिता कोल्लकनदिवार-पत्तला गोमती-भागीरथी- वरणा-सरिद्भिश्चतुराघाट-विशुद्धा निर्द्दिक्ष(द्दिश्य)-मान-नाना-नाम-गोत्रेभ्यश्चतुश्चरण-चातु(चतुः)श्रु-

25. ति-पाठकेभ्यः पंच-स(श)त-संख्येभ्यो ब्रा(ब्रा)ह्मणेभ्यो गो-कर्ण्ण-कुश-पूत-करतलोदक-पूर्व्वमापचन्द्रार्कं यावच्छासनीकृत्य प्रदत्ता तद्व्र-(द्ब्र)ह्मपुरी-निवासाय वृहद्देवकार्गे-प-

26. त्तलाया मरिसोडग्राम· प्रदत्त इति मत्वा यथादीयमान-भाग-भोग-कर-तुरुष्कदण्ड-प्रत्यादाय-विषयदाण(न)-प्रभृति-समस्तादायान् तथा स्व-नौका-भाटक-तरादायानेभ्य उपने-

27. (त*)व्य(व्यान्*) उपनेष्यथेति ॥च्छ॥ अस्यां पत्तलायां देव-द्विज-विकर-ग्रामास्तथा देव-ग्रामाः ॥ भंडदह । उडेल्डी । पणि-हली । खजुरी । तलसाम । सायी । लघुवर्डवि-

28. ण्डी । मलेणी । दूणा । उंधरौंहा । स्वागमुग्रामार्द्ध । जिगणा । लघुकमवली । सेंचलवण । चठतरा । सोणक । अधिव । उपलाइच । वृ(बृ)हत् सीउ । वृ(बृ)हत्पंचलाम । मोणदहा (।*)

29. कधिवी अणदौरी । अणदौरा । चमेख । कुण्डाम । द्विज-ग्रामाः ॥ चुदवाम-द्वादशक ॥ तलहुति । विकर-ग्रामाः । चिरिरिली । सेंविली । गुलवट । चडथला । दीवाक-

30. क्ष । चिलाड । भवन्ति चात्र शोका यथा ।
सर्व्वानेतान्भाविनः पार्थिवेन्द्रा-
न्भूयो भूयो याचते रामभद्रः ।
सामान्यो(ऽ*)यं धर्म्म-सेतुर्नृपाणां
काले काले पा-

31. लनीयो भवद्भिः ।(।*) 14
शंखो भद्रासनं च्छ(छ)त्रं वराश्वा वर-वारणाः ।
भूमि-दानस्य चिह्नानि फलं स्वर्गः पुरन्दर ।(।*) 15
सर्व्वेषामेव दानानामेकजन्मानुगं फलम् ।
32. हाटक-क्षिति-गौरीणां सप्त-जन्मानुगं फलम् ।(।*) 16
गाम(मे)कां स्वर्ण्णमेकं च भूमेरप्येकमंगुलम् ।
हरन्नरकमायाति यावदाहु(त*)-संप्लवम् ।(।*) 17
स्व-दत्तां पर-दत्तां
33. वा यो हरेत्तु वसुन्धराम् ।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह मज्जति ।(।*) 18
भूमिं यः प्रतिगृह्णाति यस्तु भूमिं प्रयच्छति ।
उभौ तौ पुण्य-कर्म्माणौ नि-
34. यतौ स्वर्ग्गगामिनौ ।(।*) 19
व(ब)हुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ।(।*) 20
मंगलं महाश्रीः ॥
35. द्विजवर-नति-रक्तः सु(शु)द्ध-कायस्थ-वंश्यो
हृदयधर-समाख्यः श्री-सि(शि)वस्तंभ-सूनुः ।
अलिखदखिल-वर्ण्ण-व्यक्त-पंक्ति-प्रशस्यं
नव-कि[श]लय-कान्तं ताम्रे(म्रमे)तद्वि(द्वि् व)जानां(नाम्) ॥ 21
36. किं तस्य चन्द्र-नृपतेर्व्वत वर्ण्णयामो
यस्य द्विजेंद्र-सुर-शासन-ताम्र-पट्टैः ।
उत्कीर्यमाण-निविडाक्षर-पंक्ति-[जाल]-
वाचालितैर्व्वधिर-भावमियाय विश्वम् ॥ [Lotus symbol] 22

1. From impressions. See Plate in *Ep. Ind.*, XIV.

2. Sahni draws our attention to *Rāja-śrīr=durjarā tasya navatve bhū-bhujo='bhavat* in the *Rājataraṅgiṇī*, V. 19.

3. The rest of the inscription, lines 37-90 engraved on plates III-V, contains the names of the donees. We have not transcribed this concluding part. The text of verses 1-20 is ignored in Sahni's transcript.

No. 17—Basāhi Copper-plate Inscription of Govindachandra issued in the reign of Madanapāla, [Vikrama] year 1161 (1104 A.D.)

Basāhi, Etawah District, U.P.
R.L. Mitra, *JASB*, XLII, Pt. I, pp. 314ff; J.F. Fleet, *Ind. Ant.*, XIV, pp. 103f.

Language : Sanskrit.
Script : Early Nāgarī.

Metres: Vv.1-2 अनुष्टुभ्; V.3 स्रग्धरा; V.4 अनुष्टुभ्; Vv.5-6 वसन्त-तिलक; V.7 शार्दूलविक्रीडित; Vv.8-11 अनुष्टुभ्.

Summary : In the family of the GĀHAḌAVĀLAS, there was a victorious king, the son of MAHIALA (Mahītala, Mahīchandra), named CHANDRADEVA, who, when on the death of king BHOJA and king KARṆA, the world became troubled, came to its rescue, became king and established his capital of KANYĀKUBJA. His son was MADANAPĀLA whose son GOVINDACHANDRA issued commands from ASATIKĀ on the 5TH day of the BRIGHT fortnight of the month of PAUSHA in [VIKRAMA] SAṀVAT 1161 (1104 A.D.) to the *Mahattaras* and others that the village of VASABHĪ in the JĪYĀVANĪ-PATTALĀ was donated to ĀLHEKA, son of Kalpe or Kalye and grandson of Meme, after a bath in the Yamunā.—The charter was written by *Paṇḍita* VIJAYADĀSA, son of Kūke, with the permission of *Purohita* JĀGŪKA, *Mahattaka* Vālhaṇa and *Pratihāra* Gautama.

TEXT[1]

1. १[2] नमो भगवते वासुदेवाय ॥
तमाद्यं सर्व्वदेवानां दामोदरं[3] उपास्महे ।
त्रैलोक्यं यस्य वक्तीव ।[4]

2. क्रोडान्तस्थं वलि- त्रयी ॥ 1
वंसे[5] गाहडवालाख्ये पभुव[6] विजयी नृपः ।
महिम्रल-सुतः श्रीमान्नल-नाभाग-सन्नि-

3. भः ॥ 2
याते श्री-भोजभूपे विवु(बु)[7]ध-दर-वधू-नेत्र-सीमातिथित्वं
श्री-कर्ण्णे कीर्त्ति-शेषं गतवति च नृपे क्ष्मात्यये जायमाने ।
भ-

4. र्त्तारं यं वरित्री[8] त्रिदिवविभु-निभं प्रीतियोगादुपेता
त्राता विश्वसा[9]-पूर्व्वं समभवदिह स क्ष्मापतिश्चन्द्रदेवः ॥ 3
द्वि-

5. षत्क्षितिभृतः सर्व्वान्विधाय विवशान्वशे ।
कन्याकुब्जे(ब्जे)(ऽ*)करोद्राजा राजधानीमनिंदितां(ताम्) । 4
तेनाजनि द्विषदिला-प-

6. ति-दन्ति-सिंहः
क्षौणीपतिर्मदनपाल इति प्रसिद्धः
येनाक्रियन्त व(ब)हुशः समर-प्रव(ब)न्धाः
सन्नर्त्तित-प्रहत-शत्रु-कव(ब)न्ध-व(ब)-

7. न्धाः ॥ 5
तस्मादजायत नरेश्वर-वृंद-वंद्य-
पादारविंद-युगलो ज्वलित-प्रतापः ।
क्षौणीपतीन्द्र-तिलको रिपु-रंग-भंगी
गो-

8. विंदचंद्र इति विश्रुत-राजपुत्रः ॥ 6
संवत् सहसैके[10] एकषष्ट्युत्तर-शताभ्यधिके पौष-मासे शुक्ल-पक्षे पंचम्यां रवि-दिनेऽङ्के संव-

9. त् ११६१ पौष-सु[11] दि ५ रवौ । अद्येहासतिकायां सकल-कल्मष-क्षय-कारिण्यां यमुनायां स्नात्वा यथाविधानं ॥[12] मन्त्र-देव-ऋषि[13]-म-

10. नुष्य-भूत-पितृ[14]स्तर्पित्वा ।[12] सूर्य्यं भट्टारकं सर्व्व-कर्त्तारं भगवन्तं शिवं विश्वाधारं वासुदेवं(च*)समभ्यर्च्य ।[12] हुतवहं हुत्वा ॥[12] जीयावनी-

11. पत्तलायां वसभी-ग्रामे समस्त-महत्तम-जनपदान्संवो(बो)धयति ॥[12] यथा ग्रामो(ऽ*)यं मया क्षेत्र-वन-मधूकाम्राकास[16]-पाताल-सहि-

12. तः स-दशापराध-दण्डः भाग-कूटक-दशव(बं)ध-विंशति[17]-अठूप्रस्थाक्षपटल-प्रस्थ-प्रतीहारप्रस्थाकर-तुरुष्कदण्ड-वरवन्नं[18]-हि-

13. रण्य-सर्व्वादाय-संयुक्तः ॥[12] पूर्व्वस्यां वांधमौग्र-ग्रामः पश्चिमायां वड-
थला-ग्रामः दक्षिणस्यां पुसौलि-ग्रामः उत्तरस्यां सावभद- ॥[12]

14. ग्रामः एवं चतुराघाट-विशुद्धः ।[12] माता-पित्रोरात्मनश्च यशः-पुण्य-
विवृद्धये । जल-वुद्बु(बुद्बु)दाकारं जीवितं दान-भोग-फलां लक्ष्मो(·*)
ज्ञात्वा ।[12]

15. व(ब)ह्वृच-शाखिने गौतम-गोत्राय गौतम-अवितथ-अङ्गिरस[20]-त्रिप्रवराय
मेमे-पौत्राय कल्पे[21]-पुत्राय ज्योतिर्विदे व्रा(ब्रा)ह्मण-आल्हे- ॥[12]

16. काय महाराज-पुत्र-श्रीमद्गोविंदचंद्रदेवेन उत्तरायन[22]-संक्रान्तौ कुश-
पूतेन हस्तोदकेन चंद्रार्क्कं यावत् शासनत्वेन प्रदत्तः ॥

17. ये यास्यन्ति महीभृतो मम कुले किंवा परस्मिन् पुर-
स्तेषामेष मयाञ्जलिर्विरचितो नादेयमस्मात्कियत् ।
दूर्व्वा-मात्रमपि सु-धर्म्म-नि-

18. रता दत्तं मया पाल्यतां
वायुर्व्वास्यति तप्स्यति प्रतपनः श्रुत्वा मुनीनां वचः ॥ 7
व(ब)हुभिर्वसुधा भुक्ता राजभिः सगरादिभि-[23]
र्यस्य यस्य

19. यदा भूमिस्तस्य तस्य तदा फलं(लम्)॥ 8
स्वदत्तां परदत्तां वा यो हरेत वसु(*)धरां(राम्) ।
स विष्ठायां कृमिर्भू त्वा पितृभिः सह मज्जति ॥ 9
भूमिं यः प्र-

20. तिगृह्णाति यस्तु भूमिं प्रयच्छति ।
तावुभौ पुण्य-कर्माणौ नियतं स्वर्ग्ग-वासिनौ ॥ 10
तडागानां सहस्रेण वाजपेय-शतेन च ।
ग-

21. वां कोटि-प्रदानेन भूमि-हर्त्ता न शुध्यति ॥ 11
लिखितं च पुरोहित-श्री-जागूक ।[12] महत्तक-श्री-वाल्हन ।[12] प्रतीहार-श्री-
गौतम ।[12] एषां[25] सं-

22. मत्या पंडित-श्रीकूके-पुत्र-विजयदासेनेति ॥

1. Adapted from Fleet's transcript. Of the places mentioned, Vasabhi = modern Basâhi; Vāndhamaua = Bāndhmau, 3 miles to the east of Basâhi; Pusauli 2 miles to the south of Basâhi; Sâvabhada = Sabhād $2\frac{1}{2}$ miles to the north-west of Basâhi.

2. Symbol for *Siddham* or *Oṁ siddhiḥ*.

3. Read °*daram*.

TEXT[1]

1\. [१̆ न*]मः ।
याब्ज (ब्ज) [न्म][2]-[मु*]खाब्ज (ब्ज)-श्रीः श्रीमता (त्या) या विरोधिनी ।
तां वन्दे वाङ्मयीं देवीं वाक्प्रपञ्च- प्रसिद्धये ।१।
एको (ऽ*) पि [गु][ण*]-स[·*]पर्क्काद्भिद्यते मुरजित्त्रिधा ।
यो ज[ग[3]] xxxx xxxx [सो (ऽ*) स्तु वः] थ्रि (श्रि*) ये ।२।
आक्रान्त-भूतलमघौघ-विघात-दक्षं
गं[गा*]-

2\. [प]यः—परिचयेन विराजमानं (नम्) ।
पायादनन्त-मुनि-लोक-निषेवितं वो
वारीव यामुनमधोक्षज-पाद-युग्मं (ग्मम्) ।३।
[ए]का त्वं हृदयं ममाधिवससीत्युक्तं त्वया — U —[4]
— — — प्रिय-वल्लभा यदपरा[6] स्वौ (स्वो) रः-स्थले शायितां (ता।)
इत्थं कौस्तुभ-दर्प्पणे

3\. प्रतिमितिं स्वां वीक्ष्य पद्माह यं
सासूयं स पराङ्मुखीमनुनयंस्तां पातु वो [मा*]धवः ।४।
त्यक्त्वासूत्प्रि (न्प्रि) य-विप्रयोग-विधुरा गोप्यो दिवं या ययु-
स्ता एतास्तव पूर्व्ववद्रत-सुखं प्रत्यागताः सेवितुं (तुम्) ।
इत्युक्तः फणिनः फणा-मणि-गणे दृष्ट्वात्मनो विम्वि (म्बि) ता-
न्यः सेर्ष्यं र-

4\. मय (ा*) मुरारिरवतात्प्रत्याययन्वः सतां (ताम्) ।५।
नीरन्ध्रः प्रथितः पुरः पृथुतरः प्रोत्खात-भूभृत्कुलो
व्याप्तासो[5] जनित-प्रताप-दहनो (ऽ*) प्यासादिता[6] स्वोन्नतिः ।
अन्तःसारतरोऽरि-कुंजर-कर-व्याघात-दक्षोऽभव-
द्वंशस्तद्विपरीत एष [गु]हिलस्याद्धार-भू-[7]

5\. तो [भु]वः ।६।
अ[स्त्र]-ग्रामोपदेशैरवनत-नृपतीन्भूतलं भूरि-भूत्या
भूदेवान्भूमि-दानैस्त्रिदिवमपि मखैर्न्न[न्दय]न्नन्दितात्मा ।
व्र (ब्र) ह्म-क्षत्रान्वितोऽस्मिन्समभवदसमे राम-तुल्यो विशल्यः
सौर्याढ्यो[8] भर्त्तृपट्टो रिपु-भट-विटपि-च्छेद-केली-पटीयान् ।७।
ली-

6. लाक्रा[न्त-महा]महीभृदवनिर्ग्गौरी-कुचालि[ङ्गन]-
व्यापारैकरसो(ऽ*)प्यभिन-[9] हृदयो वा(बा)णैर्म्मनोजन्मनः ।
भास्वद्भू ति-वि(भू*)षि[तः] कृतवर्जिग्नित्यं विशुद्धे [वृ]षे
तस्मात्स्था[णु]रिव व्यजायत नृपादीशान-पूर्व्वो भटः ।८।
उपहत-वृषो याच्ञा-लम्वा(म्बा)ल्लघुत्वमुपागतः
कृत-जड-रति-

7. र्म्मार्या[च](र*)रो द्वि-जिह्व-समाश्रितः ।
हरिरहमहो ना[स्मी][त्युच्चै]र्व्विवाहमरि[ं] [म]धो-
रहसदिव यो भूपः सोऽभूदुपे[न्द्र]भटस्ततः ।९।
[कल]समुद्योतित-[10] सर्व्व-भूतले
निजोदयानन्दित-भृत्य-कैरवः ।
उदीर्ण्ण-धामा परिपुरि[11][पूर्ण्ण]-मण्डलः
शसीव[12] जज्ञे गुहिलस्ततो नृपः ।१०।

8. मानं मानवतां मतिं मतिमतामानन्दमा न[न्दि]नां
[कोशं*] [को*]शवतां व(ब)लं व(ब)लवतामुद्योगमु[द्योगिनां(नाम्)] ।
सत्वं सत्व[13]वतां स्थितिं स्थितिमतां दुर्ग्गाणि दुर्ग्गश्रितां यः
शौर्यादहरद्द्विषां स धनिकस्तस्माप्तजज्ञे[14] प्रभुः ।११।
कर-विहित-जय-श्रीः सत्व[15]-शल्यावसादा-

9. दजित-नर-सहायो भीमसेनानुयातः ।
UUUUUU —ष्याद्यो(ऽ*)यमानन्दकारी
[सुत] इव तपसोऽस्मादाउकोऽभूत्स भूयः[16] ।१२।
चक्राक्रान्तारि-चक्रो हत-नरक-भयानन्दिताशेष-लोको
लक्ष्मी-लाभाद्विशेष-प्रज[नि]त-परमुद्धस्त-विद्वेष-वा(बा)णः ।
सा-

10. [धू]नां सत्व[17]-स[क्त]: स्थितिमुपविदधन्निग्र[हं]
पाप-[भाजा]-
[मा]म्भोधि-प्राप्त-कीर्त्तिर्म्मधुजि[दि]व ततः कृष्ण-
राजो व(ब)भूव।१३।
प्रतिज्ञां प्राक्कृत्वोद्भट[18]-करि-घटा-संकट-रणे
भटं जित्वा गौड-क्षितिपमवनिं संगर-हृतां(ताम्)[4] ।
वालाद्दासीं[19] चक्रे [प्र]भु-चरणयोर्यः प्रण-

14. यिणीं
ततो भुपः[20] सो(ऽ*)भूज्जित-व(ब)हु-रणः शंकरगणः ।१४।(*)

2. क्ष्मापाल-मालासु दिवङ्गतासु ।
साक्षाद्विवस्वानिव भूरि-धाम्ना
नाम्ना यशोविग्रह इत्युदारः ॥ 2
तत्सुतो (ऽ*) भून्महीचन्द्रश्चन्द्रधाम-निभन्निज-

3. म् ।
येनापारमकूपार-प(र*)रे[3] व्यापारितं यशः ॥ 3
तस्याभूत्तनयो नयैक-रसिकः क्रान्त-द्विषन्मण्डलो
विध्वस्तोद्धत-धीत(र)-योध-तिमिरः

4. श्री-चन्द्रदेवो नृपः ।
येनोदारतर-प्रताप-शमिताशेष-प्रजोपद्रवं
श्रीमद्गाधिपुराधिराज्यमसमन्दोर्व्विक्रमेणार्ज्जितम् ॥ 4
तीर्थानि का-

5. शि-कुशिकोत्तरकोशलेन्द्र-
स्थानीयकानि परिपालयताभिगम्य[4] ।
हेमात्म-तुल्यमनिशन्ददता द्विजेभ्यो
येनाङ्किता वसुमती शत-

6. शस्तुलाभिः ॥ 5
तस्यात्मजो मदनपाल इति क्षितीन्द्र-
चूडामणिर्व्विजयते निज-गोत्र-चन्द्रः ।
यस्याभिषेक-कलशोल्लसितैः पयोभिः
प्रक्षा-

7. लितं कलि-रजः-पटलन्धरित्र्याः ॥ 6
यस्यासीद्विजय-प्रयाण-समये तुङ्गाचलोच्चैश्चल-
न्माद्यत्कुम्भि-पद-क्रमासम-भर-भ्रश्यन्मही-

8. मण्डले ।
चूडारत्न -विभिन्न-तालु-गलित-स्त्यानासृगुद्भासितः
शेषः पेष[5]वशादिव क्षणमसौ क्रोडे निलीनाननः ॥ 7
तस्मादजाय-

9. त निजायत-वा(बा)[6]हु-वल्लि-
व(ब)न्धा(व*)रुद्ध-नव-राज्य-गजो नरेन्द्रः ।
सान्द्रामृत-द्रव-मुचां प्रभवो गवां यो
गोविन्दचन्द्र इति चन्द्र इवा-

10. म्बु (म्बु) राशेः ।। 8
न कथमप्यलभन्त रण-क्षमां-
स्तिसृषु दिक्षु गजानथ वज्रिणः ।
ककुभि व[7]भ्रमुरभ्रमु-वल्लभ-
प्रतिभटा इव यस्य घ-

11. टा-गजाः ।। 9
सो (ऽ*) यं समस्त-राज-चक्र-संसेवित-चरणः[8] परमभट्टारक-महाराजा-
धिराज-परमेश्वर-परममाहेश्व (र*)-निजभुजोपार्ज्जि-

12. त-श्री-कन्यकुब्जा (ब्जा) धिपत्य-श्री-चन्द्रदेव - पादानुध्यात-परमभट्टारक-
महाराजाधिराज-परमेस्वर[9]-परममाहेश्वर-श्री-मदनपा-

13. लदेव-पादानुध्यात-परमभट्टारक-महाराजाधिराज-परमेश्वर-परम-
माहेश्वराश्वपति[10]-गजपति-नरपति-राजत्रयाधिप-

14. ति-विविध-विद्या-विचार-वाचस्पति - श्रीमद्गोविन्दचन्द्रदेवो विजयी
हलदोय-पत्तलायां महसोणमौग्र-ग्रावा[12]-निवासिनो मि-[13]

15. खिल-जनपदानुपगतानपि राज-राज्ञी-युवराज- मन्त्रि-पुरोहित-प्रतीहार-
सेनापति-भाण्डागारिकाक्षपटलिक-भिषग्ने[14]मित्तिकान्तःपु-

16. रिक-दूत-करि-तुरग-पत्तनाकरस्थान - गोकुलाधिकारि - पुरुषांश्चा[1] ज्ञा-
पयति वो (बो) धयत्यादिशति च यथा विदितमस्तु भवतां यद्वोपरि-[16]

17. लिखित-ग्रामः स-जल-स्थलः स-लोह-लवणाकरः स-मत्स्याकरः स-पर्ण्णा-
करः स-गर्त्तोषरः स-मधूक-चूत-वन-वाटिका-विटप-तृण-यूति-

18. गोच (र*) -पर्य्यन्तः सोर्द्धा (द्ध्वा) धश्चतुराघाट-विशुद्धः स्व-सीमा-पर्यन्तः
संवत् ११८२ माघ-सुदि १५ सनौ[17] श्रीमदप्रतीहार-समावासे सोम-ग्र-

19. हण-पर्व्वणि गङ्गायां स्नात्वा विधिवन्मन्त्र-देव-मुनि-मनुज-भूत-पितृ-गणां-
स्तर्प्पयित्वा तिमिर-पटल-पाटन-पटु[18]-महसमुष्णरोचिष-

20. मुपस्थायौषधिपति-शकल-शेखरं समभ्यर्च्चर्य त्रिभुवन-त्रातुर्व्वासुदेवस्य
पूजां विधाय हविषा हविर्भुजं हुत्वा मातापित्रोरा-

21. त्मनश्च पुण्य-यशो (ऽ*) भिवृद्धये[19] कुशलता-पूत-करतलोदक-पूर्व्व-
मस्माभिर्व्व (र्ब्ब) न्धुल-गोत्राय व (ब) न्धुलाघमर्षण विश्वामित्र-त्रि [प्र]
वरा-

22. य दीक्षित-श्री-पुरुषोत्तम-पौत्राय दीक्षित-श्री-वील्हा-पुत्राय महापुरोहित-
श्री-जागू-शर्म्मणे[20] आचन्द्रार्क्कं शासनीकृत्य[21] प्रदत्तो[22]

23. मत्वा यथादीयमान-भागभोगकर-प्रवणिकर-कूटक-प्रभृति-समस्तादायाना-
ज्ञाविधियीभूय[23] दास्यथ ।। भवन्ति चात्र पुण्य-श्लो-

24. काः ॥
भूमि यः प्रतिगृह्णाति यश्च भूमि प्रयच्छति ।
उभौ तौ पुण्यकर्म्माणौ नियतं स्वर्ग्ग-गामिनौ ॥ 10
शङ्खं भद्रासनं च्छत्त्रं[24] वराश्वा व-
25. र-वारणाः ।
भूमि-दानस्य चिह्नानि फलमेतत्पुरन्दर ॥ 11*
सर्व्वानेतान्भाविनः पार्थिवेन्द्रा-
न्भूयो भूयो याचते रामचन्द्रः ।
सामा(ा*)न्यो(ऽ*)यं धर्म्म-
26. सेतुर्न्नृपाणां
काले काले पालनीयो भवद्भिः ॥ 12
व(ब)हुभिर्व्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य त-
27. दा फलम् ॥ 13
स्व-दत्तां पर-दत्तां वा यो हरेत वसुन्धरां(राम्) ।
स [वि]ष्ठायां कृमिर्भूत्वा पितृभिः सह मज्जति ॥ 14
श्रीवास्तव्य-कुलो-
28. द्भूत-कायस्थोल्हण-सूनुना ।
लिखितस्ताम्व्र[25]पट्टो(ऽ*)यं कीठणेन नृपाज्ञयेति ॥ छ ॥ छ[26] ॥ 15

1. From facsimile in *Ep. Ind.*, IV.
2. Symbol for *siddham* or *Oṁ siddhiḥ*.
3. *Pari* appears to have been originally engraved; *ri* has later been made *re*.
4. Some records read °*dhigamya*.
5. Kielhorn corrects this to *śaisha*.
6. The letters *b* and *v* have not been distinguished.
7. Read *babhra*°.
8. Some records insert *sa cha* here.
9. Read °*śvara*.
10. Read °*pati*.
11. The Haladoya-pattalā has been mentioned in another record of Govindachandra (*JASB*, XXVII, p. 243).
12. Read *grāma*.
13. Read *nikhila*.
14. Read *bhishag-nai*°.
15. Better construct *gatān=api cha......purushān=ājñāpayati*.

16. Read *yath-o°*.
17. Read *Śanau.*
18. Read *paṭu.*
19. Kielhorn reads *°vṛdvaye.*
20. The correction *°sarmmaṇa°* is unnecessary.
21. Read *°kṛitya.*
22. Read *pradatto.*
23. Read *vidheyī°*
24. Read *chhattraṁ.*
25. Read *°s=tāmra.*
26. These are symbols indicating the end of the document. Sometimes they indicate the end of a section.

No. 19 Saheṭh-Maheṭh Copper-plate Inscription of Govindachandra, [Vikrama] year 1186 (1129 A.D.)

Saheṭh-Maheṭh on the borders of the Gonda and Bahraich Districts, U.P.
D.R. Sahni, *Ep. Ind.*, XI, pp. 22ff.

Language : Sanskrit.
Script : Early Nāgarī.

Metres: V.1 अनुष्टुभ् (श्लोक) ; V.2 इन्द्रवज्रा; V.3 अनुष्टुभ् (श्लोक) ; V.4 शार्दूलविक्रीडित; Vv.5-6 वसन्ततिलक; V.7 शार्दूलविक्रीडित; V.8 वसन्ततिलक; V.9 द्रुतविलम्बित; Vv. 10-12 अनुष्टुभ् (श्लोक); V.13 शालिनी; Vv.14-15 अनुष्टुभ् (श्लोक); V.16 वसन्ततिलक; V.17 अनुष्टुभ् (श्लोक).

Summary : For genealogy, see the Kamauli plate of Govindachandra.—*Paramabhaṭṭāraka Mahārājādhirāja Parameśvara Paramamāheśvara* GOVINDACHANDRA, who was another Vāchaspati and was the lord of three kings (or army-commanders, or possessed the three royal titles), viz. *Aśvapati*, *Gajapati* and *Narapati*, made a grant of the villages of BIHĀRA, Paṭṭanā, Upalauṇḍā and Vavvahalī in the *pattalā* (district) of VĀḌĀ-CHATURAŚĪTI, Mosāḍī attached to MEYĪ and Payāsi attached to Poṭhivāra together with water and dry land, mines of iron and salt, repositories of fish and fields of betel vines, pits, and deserts, gardens of *madhūka* and mango trees, parks, bushes, grass and pasture to Buddha-bhaṭṭāraka and the community (Saṅgha) of Buddhist monks residing in the great convent of JETAVANA.—The grant was made at the request of the *Saugata-parivrājaka Mahāpaṇḍita* ŚĀKYARAKSHITA and his disciple the *Saugata-parivrājaka Mahāpaṇḍita* VĀGĪŚVARARAKSHITA, a resident of the CHOḌA country.—The taxes specified as due to the donees included *bhāga-bhoga-kara*, *pravaṇikara* and *turushka-daṇḍa*. — The offer of the grant was conveyed to the inhabitants of the said villages as well as to the kings, queens, *Yuvarājas*, ministers, priests, chamberlains, generals, *Bhāṇḍāgarikas*, record-keepers,

physicians, astrologers, harem-guards, messengers and officers who were in charge of elephants, horses, towns, mines and *gokulas*.—The grant was made in [VIKRAMA] SAṀVAT 1186 ĀSHĀḌHA-SUDI 15, MONDAY. The date seems to be Monday, the 23RD JUNE, 1130 A. D., the correct Vikrama year being 1187.

TEXT[1]

1. ॰[2] स्वस्ति ।
अकुण्ठोत्कण्ठ-वैकुण्ठ-कण्ठ-पीठ-लुठत्करः ।
संरंभः सुरतारंभे स श्रियः श्रेयसे(ऽ*)स्तु वः ॥ 1
आसीदशीत-द्युति-वंश-जात-
क्ष्मा-पाल-माला-
2. सु दिवं गतासु ।
साक्षाद्विवस्वानिव भूरि-धाम्ना
नाम्ना यशोविग्रह इत्युदारः ॥ 2
तत्सुतो(ऽ*)भून्महो[चं]द्रश्चन्द्र-धाम-निभं नि[जं](जम्) (।*)
येनापारमकूपार-
3. पारे व्यापारितं यशः ॥ 3
तस्याभूत्तनयो नयैक-रसिक[:] क्रान्त-द्विषन्मण्डलो
विध्वस्तोद्धत-वैरि-योध-तिमिरः श्री-चंद्रदेवो नृपः ।
येनोदारतर-प्रताप-शमिताशेष-प्र-
4. जोपद्रवं
श्रीमद्गाधिपुराधिरा[ज्य]मसमं दोर्व्विक्रमेणार्ज्जितं(तम्) ॥ 4
तीर्थानि काशि-कुशिकोत्तरकोसलेंद्र-
स्थानीयकानि परिपालयताधिगम्य ।
हेमात्म-तुल्यम-
5. निशं ददता द्विजेभ्यो
येनाङ्किता वसुमती शतशस्तुलाभिः ॥ 5
तस्यात्मजो मदनपाल इति क्षितीन्द्र-
चूडामणिर्व्विजयते [नि]ज-गोत्र-चंद्रः ।
य[स्या]भिषेक-कलशो[ल्ल]सितैः पयोभिः
प्रा-[3]

6. क्षालितं कलि-रजः- पटलं धरित्र्याः ।। 6
यस्यासीद्विजय-प्रयाण-समये तुङ्गा[4]चलोच्चैश्चल-
न्माद्यत्कुंभि-पद-क्रमासम-भर-भ्रश्यन्महो[मं]डलः ।
चूडारत्न-विभिन्न-तालु-
7. गलित-स्त्यानासृगुद्भासितः ।
शेषः पेष-वशादिव क्षणमभूत्क्रोडे निलीनाननः ।। 7
तस्मादजायत निजायत-वा(बा)[5]हु-वल्लि-
व(ब)द्धावरुद्ध-नव-रा[ज्य]-गजो नरेन्द्रः ।
सांद्रा-
8. मृत-द्रव-मुचां प्रभवो गवां यो
गोविंदचद्र इति चंद्र इव[ां]वु(बु)राशेः ।। 8
न कथमप्यलभंन्त[6] रण-क्षमा[ॱ]-
स्तिसृषु दिक्षु गजानथ वज्रिनः ।
ककुभि व(ब) भ्रमुर[भ्र]मु-वल्लभ-
प्रति-
9. भटा इव यस्य घटा-गजाः ।। 9
सो(ऽ*)यं समस्त-राज-चक्र-संसेवित-चरणः परमभट्टारक-महाराजा-
धिराज- परमेश्वर- परममाहेश्वर- निजभुजोपार्ज्जित-कान्यकुब्जा(ब्जा)
धिप-
10. त्य-श्रीम[च्चं]द्रदेव-पादानुध्यात-परमभट्टारक-महाराजाधिराज- परमेश्वर-
परममाहेश्वर - श्रीमा(म)(न्*)- मदनपालदेव - पा[दा]नुध्यात - परम
भट्टारक-महाराजाधिराज-पर-
11. मेश्वर- परममाहेश्वराश्वपति- गजपति-नरपति- राजत्रयाधिपति-विविध-
विद्या-विचार-वाचस्पतिः श्रीमद्गो[वि]न्दचंन्द्रदेवो विजयी ।।[7] [Symbol]
12. वाडा-चतुरशीति-पत्तलायां विहार । पट्टना ।[8] उपलउण्डा । वव्वहली । मेयी-
संव(ब)द्ध-मोसाडी-पोठिवार-सं[व(ब)]द्ध-पयासि-ग्राम-निवासिनो
13. निखिल-जनपदानुपगतानपि (च*) राज-राज्ञी-युवराज-मंत्रि-पुरोहित-
प्र[ती]हार - सेनापति- भाण्डागारिकाक्षपटलिक-भिषग्नैमित्तिकान्तःपुरिक-
दूत-
14. करि-तुरग-पत्तनाकरस्थान-गोकुलाधिकारिणश्च पुरुषानाज्ञापयति वो-
(बो)धयत्यादिशति च यथा । विदितमस्तु भवतां यथोपरिलिखित-ग्रामाः
15. स-जल-स्थलाः स-लोह-लवणाकराः स-मत्स्याकराः स-पर्ण्णाकराः[9] स-गर्त्तोष-
[रा]: स-मधूकाम्र-वन-वाटिका-विटप-तृण-यूति[10]-गोचर-पर्यन्ताः सोद्ध्वीध-
श्चतुराघाट-विशु-

16. द्ध-स्व-सीमापर्यन्ताः । संवत्सरे षडशीत्यधिकैकादश-शते[11] आषाढे मा[से] सोमवारे पूर्व्वाषाढा-नक्षत्रे पूर्णिमायां तिथौ अङ्कतो(ऽ*)पि संवत् ११८६ आषाढ-

17. सु-दि १५ सोमे । अद्येह श्री-वाराणस्यां गंगायां [स्न]ात्वा मन्त्र-देव-मुनि-मनुज-भूत-पितृ-गणांस्तर्प्पयित्वा तिमि[र]-पटल-पाटन-पटु-महसमुष्ण-रोचिषं[13] मुपस्थायौ-

18. षधिपति-शकल-शेखरं समभ्यर्च्च्य त्रिभुवन-त्रातुर्वासुदेवस्य पूजां विधाय प्रचुर-पायसेन हविषा हविर्भुजं हुत्वा मातापित्रोरात्मनश्च-पुण्य-यशो(ऽ*)-भिवृद्धये गो-

19. कर्ण्ण-कुशलता-पूत-करतलोदक-पूर्व्वम् । उत्कल-देशीय-सौगत-परिव्राजक-शाक्यरक्षित-तच्छिष्य-चोड-देशीय-सौगत-परिव्राजक-महापण्डि-

20. त-वागीश्वररक्षिताभ्यां परितोषितैरस्माभिः श्रीमज्जेतवन-महाविहार-वास्तव्य-वु(बु)द्धभट्टारक-प्रमुख-परमार्य-[शा]क्य-भिक्षुसंघाय विहारा-न्तर-मर्याद-

21. या परिभोगार्थं महता चित्तप्रसादेनाचंद्रार्क्कं पुनरपि शासनीकृत्य ग्रा[म]ा इमे षडपि दत्ता(इति*)मत्वा यथा-दीयमान-भाग-भोग-कर-प्रवनि(णि)कर-तु(रु*)ष्कदण्ड[14]-प्र-

22. भृति-सर्व्वादायानाज्ञा-[श्र]वण-विधेयीभूय दास्यथेति ॥
भवन्ति चात्र [श्लो]काः ।
भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति ।
उभौ तौ पुण्य-कर्म्माणौ नियतौ[15] स्व[र्ग]-गामि-

23. नौ ।(।*) 10
शखं [भ]द्रासन[16] [छ]त्रं वराश्वा वर-वारणाः ।
भूमि-दानस्य चि[ह्ना]नि फलमेतत्पुरंदर ॥ 11
व(ब)हुभिर्व्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य

24. तस्य तदा [फलं](लम्) ॥ 12
सर्व्वानेतान् भाविनः पार्थिवेन्द्रान्
भूयो भूयो याचते राम[भ]द्रः ।
सामान्यो(ऽ*)यं धर्म्म-सेतुर्न्नराणां
काले काले पालनीयो भवद्भिः ॥ 13
षष्टि-व-

25. षं-सहस्राणि स्व[ग]वसति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥ 14
स्व-दत्तां पर-दत्तां वा यो हरेत वसुंधराम् ।
स विष्ठायां कृमिर्भूत्वा
26. पि[तृभि]: सह मज्जवि[17] ॥ 15
वाताभ्र-विभ्रममिदं वसुधाधिपत्य-
मापातमात्र-मधुरा [वि]षयोपभोगाः ।
प्र[ा]णा[स्तृ]णाग्र-जल-विंदु-समा नराणां
धर्म्मः सखा परमहो पर-लोक-याने ॥ 16
27. श्रीमद्गोविंदचंद्रस्य भूपतेराज्ञयालिखत् ।
ताम्रमेतत्सुरादित्यः कायस्थः सर्व्व-शास्त्र-वित् ॥ 17
[Symbol]॥ ॥[18] मंगलं महा-श्रीः ॥ ॥

1. From the facsimile in *Ep. Ind.*, XI.
2. Symbol for *siddhaṁ, Oṁ siddhiḥ* or *siddhir=astu.*
3. Read *prakshā°*.
4. Read *tuṅgā°*.
5. The letter *b* is denoted by the sign for *v* throughout the record.
6. Read *°labhanta*.
7. These *daṇḍas* and those in the following lines are unnecessary. The butterfly-like symbol and the four *daṇḍas* are meant for filling up the space.
8. A *daṇḍa* was engraved close to *ṇā*; but it seems to have been cancelled.
9. Sahni reads *sa-pallīkarāḥ*; but Venkayya rightly suggests *sa-parṇṇ-ākarāḥ* and refers to *Ep. Ind.*, IV, p. 101, text line 17.
10. In many grants, this word occurs and is read *pūti* or *yūti*.
11. The correction *śata Āshā* is unnecessary.
12. The correction *tithāv=aṅka°* is not required.
13. Read *rochisham=upa°*.
14. I do not find *ra* (or *ru*) on the plate: but Sahni says that there is *ra* engraved below its proper place.
15. Read *niyataṁ*.
16. The letter *bha* is engraved below its proper place.
17. Read *majjati*.
18. The butterfly-like symbol and the *daṇḍa* signs are employed to fill up the space.

No. 20 Sārnāth Stone Inscription of Kuma(mā)radevī, Queen of Govindachandra (c. 1114-55 A.D.)

Sārnāth, near Vārāṇasī, Varanasi District, U.P.
Sten Konow, *Ep. Ind.*, IX, pp. 323ff.; cf. D.C. Sircar, *Journ. Anc. Ind. Hist.*, VIII, pp. 303 ff.

Language : Sanskrit.
Script : Early Nāgarī.

Metres : V.1 मालिनी; V.2 स्रग्धरा; V.3 शार्दूलविक्रीडित; V.4 वसन्ततिलक; Vv.5-7 शार्दूलविक्रीडित; Vv.8-9 अनुष्टुभ्(श्लोक); V.10 मालिनी; Vv.11-13 शार्दूलविक्रीडित; Vv.14-15 मालिनी; V.16 वसन्ततिलक; Vv.17-19 शार्दूलविक्रीडित; V.20 मालिनी; V.21 शार्दूलविक्रीडित; V.22 वसन्ततिलक; Vv.23-25 शार्दूलविक्रीडित; V.26 अनुष्टुभ् (श्लोक).

Summary : The inscription begins with an adoration to the Buddhist goddess ĀRYA-VASUDHĀRĀ. Then it introduces the husband of the water-lilies (the Moon-god) as the progenitor of the CHHIKKORA family of Kannaḍa origin, to which VALLABHARĀJA, the lord of PĪṬHIKĀ (i.e. the Vajrāsana-pītha or Bodhgayā), and *Pīṭhipati* DEVARAKSHITA belonged. Devarakshita defeated the GAJAPATI. The Kshatriya MAHANA of Kannaḍa origin, who was a unique warrior of the GAUḌA country and was the governor of AṄGA, was the maternal uncle of several PĀLA kings. He defeated DEVARAKSHITA on behalf of the Pāla king RĀMAPĀLA who was his nephew. Mahana's daughter ŚAṄKARADEVĪ was given in marriage to *Pīṭhipati* Devarakshita and gave birth to KUMA(MĀ)RADEVĪ who became the queen of king GOVINDACHANDRA, son of MADANACHANDRA and grandson of CHANDRADEVA of the KSHATRIYA family of the GAHAḌAVĀLAS. Govindachandra is said to have been Hari's incarnation for the purpose of protecting VĀRĀṆASĪ from the TURUSHKA (Turkish Muhammadan general).—The Buddhist queen KUMARADEVĪ built a *vihāra* (monastery) in which an image of VASUDHĀRĀ was

installed. She also set up a new image of the JINA (Buddha) and installed it in a *vihāra*. The eulogy was composed by the poet KUNDA who was a friend of the king of VAṄGA; it was engraved by Vāmana. Kunda aws proficient in eight languages.

TEXT[1]

1. १[2] नमो भगवत्ये आर्यवसुधाराय ॥
समवतु वसुधारा धर्म-पीयूष-धारा-
प्रशमित-व[3](ब)हु-विश्वोद्दाम-दुःखोरु-धारा ।
धन-कनक-समृद्धि भूर्भुवः श्वः[4] किरन्ती
तद-

2. खिल-जन-दैन्यान्याजयन्ती[5] जगन्ति ॥
नेत्रैरुत्कण्ठितानां क्षरणमुपनयंश्चारु-चन्द्रोपलाना-
म्मान-ग्रन्थिम्वि(म्बि)भिन्दन् सह कुमुदवनी-मुद्रया मानिनीनाम् ।
दग्धन्दुग्धाश्व(श्म)नामा[मृ]-

3. त-निकर-करैर्जीवयन् कामदेवं
कान्तो(ऽ*)यं कौमुदीनां स जयति जगदालोक-दीप्र-प्रदीपः ॥ 2
वंशे तस्य नमस्य-पौरुष-जुषि प्रस्फार-कीर्त्ति-त्विषि
द्राक् शौचेन सु[राप]-

4. गा-मद-मुषि प्रत्यर्थि-लक्ष्मीरुषि ।
वीरो वल्लभराज-नाम-विदितो मान्यः स भूमी-भुजां
जेतासीत्पृथु-पीठिका-पतिरति-प्रौढ-प्रतापोदयः ॥ 3
छिक्कोर-वंश-कुमुदोदय-पूर्ण-

5. चन्द्रः
श्री-देवरक्षित इति प्रथितः पृथिव्याम् ।
पीठी-पतिर्गजपतेरपि राज्य-लक्ष्मीं
लक्ष्म्या जिगाय जगदेक-मनोहर-श्रीः ॥ 4
तस्मादास पयोनिधेरिव विधु-

6. र्ल्लावण्य-लक्ष्मी-विधु-
र्नेत्रानन्द-समुद्र-वर्द्धन-विधुः कीर्त्ति-द्युति-श्री-विधुः ।
सौजन्यैक-निधिः स्फुरद्गुण-निधिर्गाम्भीर्य्य-वाराान्निधि-
र्हम्मा[6]द्वैत-निधिः स च[ण्ड]म-

7. निधिः शस्त्रैक-विद्या-निधिः ॥ 5
दीनानामभिवाञ्छितैक-फलदः प्रत्यक्ष-कल्पद्रुमो
दृप्यद्वैरि-गिरीन्द्र-भेदन-विधौ दुर्वार-वज्रश्च यः ।
कान्तान(ा*)म्मद-

8. न-ज्वरोपशमने सिद्धौषधी-पल्लवो
वा(बा)हुर्यस्य व(ब)भूव भूतल-भुजामन्तश्चमत्कारिणः ॥ 6
गौडे(ऽ*)द्वैत-भटः स-काण्डपटिकः क्षत्रैक-चूडामणिः
प्रख्यातो[7]

9. महनाङ्गपः क्षिति-भुजाम्मान्यो(ऽ*)भवन्मातुलः ।
त(·*) जित्वा युधि देवरक्षितमधात्(च्) श्री-रामपालस्य यो
लक्ष्मीं निर्जित-वैरि-रोधनतया देदीप्यमानोदयाम् ॥ 7
कन्या महन-

10. देवस्य तस्य कन्येव भूभृतः ।
सा पीठी-पतिना तेन तेनोवोढा स्वयम्भूवा[8] ॥ 8
ख्याता शङ्करदेवीति तारेव करुणाशया ।
व्यजेष्ट कल्पवृक्षाणां लता दानोद्यमेन या ॥ 9
श्र-

11. जनि कुमर[9]देवी हन्त देवीव ताभ्यां
शरदमल-सुधाङ्शो[10]श्चारु-लेखेव रम्या ।
दुरित-जलधि-मध्याल्लोकमुद्धर्त्तु कामा
स्वयमिह करुणार्त्ता तारिणीवावतीर्ण्णा ॥ 10

12. याम्वे[11]धाः प्रविधाय शिल्परचना-चात्तुर्य्य-दर्प्पं व्यधा-
द्यद्वक्त्रेण जितस्तुषारकिरणो ह्रीणः स स्वस्थो(ऽ*)भवत् ।
रात्रावुद्गममातनोति मलिनो जातः कलङ्की तत-
स्त-

13. स्याः सुदरिमा[12] स विष्मय[13]करो वाच्यः किमष्मादृशैः[14] ॥ 11
चित्रञ्चञ्चल-दृक्कुरङ्गम-वधू-व(ब)न्ध-स्फुरद्वागुराम्

14. विभ्राणा[15] तनु-सम्पदम्प्रविलसत्कान्त्याभिकान्त-श्रिया ।
खेलत्क्षीरसमुद्र-सान्द्र-लहरी-लावण्य-लक्ष्मी-मुषं
मोषं शैलसुतामदस्य दधती सौभाग्य-गर्वेण सा ॥ 12
धर्माद्वैत-मतिर्गुणाहित-रतिः प्रारब्ध(ब्ध)-पुण्याचिति-

15. र्दानोदार-धृतिर्मतङ्गज-गतिर्नेत्रा[16]भिरामाकृतिः ।
शास्तृ-न्यस्त-नति[17] जनोदित-नुतिः कारुण्य-केलि-स्थिति-
नित्य[18]-श्री-वसतिः कृताघ-विहृतिः स्फायद्गुणाहंकृ-

16. तिः ॥ 13
जगति गहडवाले क्षत्र-व(ं*)शे प्रसिद्धे-
(ऽ*)जनि नरपति-चन्द्रश्चन्द्रमा[19]नामा नरेन्द्रः ।
यदसहन-नृपाणाङ्कामिनी-वाष्पवाहैः[20]
शिततरमिदमासीद्यामुन(ं*) तून[21]मम्भः ॥ 14
नृ-

17. पति-मदनचन्द्रश्चण्ड-भूपाल-चूडा-
मणिरजनि स तस्माद्वि(द्वि)भ्रदेकातपत्र(म्*) ।
धरणि-तलमनल्प-प्रौढतेडो[22](ऽ*)नल-श्रीः
श्रियमपि च मघोनः स्व-श्रियाधो दधानः ॥ 15
वाराण-

18. सीं भुवन-रक्षण-दक्ष एको
दुष्टान्तु[23]रुष्क-सुभटादवितुं हरेण ।
उक्तो हरिस्स पुनरत्र व(ब)भूव तस्मा-
द्गोविन्द चन्द्र इति प्रथिताभिधानः ॥ 16
वत्साः कामदुहां कणा-

19. नपि पयःपूरस्य पातु(ं*) न ते
चित्रं प्रागलभन्त याचक-मनः-सन्तोषमित्यव्ययात् ।
त्यागैर्यस्य महीभूजः[24] प्रमुदिते तद्याचकानाञ्चये
स्वच्छन्दाहित-नित्य-निर्भर-पयः-

20. पानोत्सवैरासते ॥ 17
यद्विद्वेषि-महीभुजां पुरवरे प्रभ्रष्ट-हारावली-
र्व्याधास्तन्मृग-पाश-व(ब)न्ध-मनसा गृह्णन्ति नैव भ्रमात् ।
व्यधाः त्रस्त-सुवर्ण्ण-कुण्डलमहि-भ्रान्त्या

21. तदत्यायतै-
र्दण्डैर्द्रागपसारयन्ति च भय-प्रोत्कम्पि-हस्त-स्रजः ॥ 18
यस्योत्सन्न-विरोधि-भूपति-पुर-प्रासाद-पृष्ठोपरि
प्रत्यग्र-स्फुरदुग्र-शष्प-कवल-व्यालोल-वाजि-

22. व्रजः ।
आदित्यस्त्वभवत्स मन्थर-रथश्चन्द्रो(ऽ*)पि म दो(ऽ*)भवत्[25]
घास-ग्रास-विरुद[26]-लोभ-हरिण(*)रक्षन् पतन्तस्ततः ॥ 19
अहह कुमरदेवी तेन र(ा*)ज्ञा प्रसिद्धा
त्रि[27]-जगति
23. परिगी(णी)ता श्रीरिवेहाच्युतेन ।
प्रविलसदवरोधे तस्य राज्ञो(ऽ*)ङ्गनानां
नियतममृतरश्मेर्लेखिका तारकासु ॥ 20
वीहारो[28] नव-खण्ड-मण्डल-मही-हारः कृतो(ऽ*)यन्तया
24. तारिण्या वसुधारया ननु वपुर्वि(र्बि)भ्राणयालंकृतः ।
यं दृष्ट्वा प्रविचित्र-शिल्प-रचना-चातुर्य्य-सीमाश्रयं
गीर्वाणैः सुदृश[श्च] विस्मयमगाद्द्राग्विश्वकर्मापि सः ।(।*) 21
श्री-धर्मचक्र-जि-
25. न-शासन-सन्निव(ब)द्धं
सा(या)जम्वु(म्बु)की सकल-पत्तलिवाग्रभूता[29] ।
तत्ताम्र-शासन-वर(ं*) प्रविधाय तस्यै
दत्त्वा(त्तं) तया शशि-रवी भुवि यावदास्ताम् ॥ 22
धर्माशोक-नराधिपस्य समये श्री-ध-
26. म[30]-चक्रो जिनो
यादृक् तन्नय-रक्षितः पुनरयञ्चक्रे ततो(ऽ*)प्यद्भुतम् ।
वीहारः स्थविरस्य तस्य च तया यत्नादयङ्कारित-
स्तस्मिन्नेव समर्पितश्च वसतादाचन्द्र-चण्डद्युति ॥ 23
तत्कीर्त्तिम्प-
27. रिपालयिष्यति जनो यः कश्चिदुर्वीतले
सा तस्याङ्घ्रि-युग-प्रणाम-परमा यूयं जिनाः साक्षिणः ।
तस्याः कश्चिदनिश्चितो यदि यशो-व्यालोपकारी खलः[31]
तं पापीयसमा-
28. शु शासति पुनस्ते लोकपालाः क्रुधा ॥ 24
एकस्तीर्थिक-वादि-वारण-घटा-सङ्घट्ट-कण्ठीरवः
साहित्योज्वल[32]-रत्न-रोहणगिरिर्यो ह्यष्ट-भाषा-कविः
ख्यातो वङ्ग-महीभजः[33]
29. प्रणय-भूः श्री-कुन्द-नामा कृती
तस्याः सुन्दर-वर्ण्ण-गुम्फ-रचना-रम्यां प्रशस्ति व्यधात् ॥ 25

एषा प्रशस्तिरुत्कीर्ण्णा वामनेन तु शिल्पिना ।
राजावर्त्तस्य सापत्न्यन्दधाने प्रस्तरोत्तमे ॥ 26

1. From the facsimile in *Ep. Ind*, IX.
2. Symbol for *siddham*, *siddhir=astu* or *Oṁ siddhiḥ*.
3. *V* is used for *b* throughout the record.
4. Read *svaḥ*.
5. Venkayya suggests *°t=tyājayantī* which may have been intended; but *ntyā* is clear; cf. *dushṭān=Turu°* for *dushṭāt=Turu°* in l. 18.
6. Read *°dharm-ādvaita*.
7. Read *prakhyāto*.
8. Read *svayambhuvā*.
9. The name *Kumāradevī* may have been made *Kumaradevī* owing to the requirement of the metre. Cf. *api māshaṁ mashaṁ kuryāch=chhando-bhaṅgaṁ tyajed=girām*. But more probably this is due to her Southern origin because *Kumāra* becomes *Kumara* in South Indian pronunciation. The queen was compared to the goddess Tāriṇī for her dark complexion.
10. Read *sudhāṁśo°*.
11. Read *yāṁ Vedhāḥ*.
12. Read *sundarimā*.
13. Read *vismaya°*.
14. Read *°m=asmādṛiśaiḥ*.
15. Read *bibhrāṇā*.
16. Read *°r=netrā°*.
17. Read *natir=jano°*.
18. Read *sthitir=nitya°*.
19. Read *°ś=Chandra-nāmā*.
20. Read *vāhaiḥ*.
21. Read *nūna°*.
22. Read *tejo*.
23. Read *dushṭāt-Turu.°*
24. Read *°bhujaḥ*.
25. Read *°bhavad=ghāsa*.
26. Read *virūḍha*.
27. Read *tri-jagati*.
28. *Vīhāra* is an alternative form of *vihāra*. Jambukī was a *Pattalikā*, i.e. officer in charge of the *pattalas* or documents.
29. Read *Pattalik-ā°*.
30. Read *dharma°*.
31. Read *khalas=taṁ*.
32. Read *°jjvala°*.
33. Read *mahībhujah*.

No. 21 Machhlīshahr Copper-plate Inscription of Hariśchandra, [Vikrama] year 1253 (1196 A.D.)

Kotwā, Machhlīshahr Tahsil, Jaunpur District, U.P.
Hirananda Sastri, *Ep. Ind.*, X, pp. 95 ff.

Language : Sanskrit.
Script : Early Nāgarī.

Metres: V.1 अनुष्टुभ्; V.2 इन्द्रवज्रा; V.3 अनुष्टुभ्; V.4 शार्दूलविक्रीडित; Vv.5-6 वसन्ततिलक; V.7 शार्दूलविक्रीडित; V.8 वसन्ततिलक; V.9 द्रुतविलम्बित; V.10 मालिनी; V.11 वसन्ततिलक; V.12 शार्दूलविक्रीडित; V.13 स्रग्धरा; V.14 वसन्ततिलक; V.15 स्रग्धरा; V.16 वसन्ततिलक; Vv.17-25 अनुष्टुभ्; V.26 शालिनी; V.27 इन्द्रवज्रा; V.28 वसन्ततिलक.

Summary : There was the illustrious YAŚOVIGRAHA. His son was MAHĪCHANDRA. His son, the illustrious *Paramabhaṭṭāraka Mahārājādhirāja Parameśvara* CHANDRADEVA, obtained the sovereignty of GĀDHIPURA or KANYAKUBJA by virtue of his own prowess. Meditating on his feet was *P.M.P.* MADANAPĀLA; meditating on his feet was *Aśvapati-Gajapati-Narapati-Rājatrayādhipati P.M.P.* GOVINDACHANDRA; meditating on his feet was *P.M.P.* etc. VIJAYACHANDRA; meditating on his feet was *P.M.P.* etc. JAYACHCHANDRA; meditating on his feet was *P.M.P.* etc. HARIŚCHANDRA. While residing at DHANAṀVAKRA, HARŚICHANDRA granted, after having bathed in the GANGES at the bathing Ghāṭ called CHYAVANEŚVARA, the village of PAMAHAI together with some other hamlets to one RĀHĪHĪYAKA, son of *Ṭhakkura* MADANŪ of the Kāśyapa-gotra.—The charter was written by the *Mahākshapaṭalika Ṭhakkura* BHOGĀDITYA. The date of the grant is given as SUNDAY THE 15TH TITHI OF THE BRIGHT HALF OF THE MONTH OF PAUSHA in [Vikrama] SAṀVAT 1253 (5TH JANUARY, 1197 A.D.). About this time, the Turkish Muslims appear to have been in occupation of the cities of the Gāhaḍavala kingdom, though the Gāhaḍavala king's rule must have been acknowledged in the rural areas.

TEXT[1]

1. १[3] अकुंठोत्कंठ-वैकुंठ-कंठपीठ-लुठत्करः ।
[संरं]भ[:] [सु]र[तारं]भे स [श्रि]यः श्रेयसे(ऽ*)स्तु वः ॥ 1
आसीदशीव(त)द्युति-वंस[4]-जातः
क्ष्मापाल-मालासु दिवं गतासु ।
सा[क्षा]द्विवस्वानि(व*) भूरि-धा[म्ना]
2. नाम्ना यसो[5][वि]ग्रह इत्युदारः ॥ 2
तत्सुतो(ऽ*)भून्महीचंद्र[:](द्रश्)चंद्रधाम-निभं निजं(जम्) ।
येनापारमकूपार-पारे व्यापारितं यशः ॥ 8
तस्याभूत्तनयो नयैकरसिक(:*) क्रांत-द्विषन्मण्डलो
3. वि[ध्वस्तो]द्धत-वीर-योध-तिमिरः श्री-चन्द्रदेवो नृपः ।
येनोदारतर-प्रताप-समिताशेष[6]-प्रजोप[द्र]वं
श्रीमद्गाधिपुराधिराज्यमसमं दोर्व्विक्रमेणार्जितं(तम्) ॥ 4
तीर्थानि कासि-कुसिको-[7]
4. [त्त]रकोसलेंद्र-
स्थानीयकानि परिपालयताधिगम्य ।
हेमात्म-तुल्यमनिशं ददता द्विजे[भ्यो]
येनांकिता वसुम[ती] शत(श*)स्तुलाभिः ॥ 5
तस्यात्मजो मदनपाल इति क्षितीं[द्र]-
श्चूडामणिर्व्विजयते निज-गो-
5. त्र-चंद्रः ।
यस्याभिषेक-कलसोल्लसितैः पयोभिः
प्रक्षालितं [कलि]-रजः-पटलं धरित्र्याः ॥ 6
यस्यासीद्विजय-प्रयाण-समये तुंगाचलोच्चैश्चल-
न्माद्यत्कुंभि-पदक्रमासम-भर-भ्रस्य-[9]
6. न्मही-मंडले ।
चूडारत्न-विभिन्न-तालु-गलित-स्त्यानाश्रृ[10]गुद्भासितः
शेषः पेष-वसा[11]दिव क्षणे[12]मसौ क्रोडे विलीनाननः ॥ 7
तस्मादजायत निजायत-वा(बा)हु[13]-वल्लि-
वद्धा-[14]
7. वरुद्ध-[न]व-वाज्य[15]-गजो नरद्रः[16] ।
[सां]द्रामृत-द्रव-मुचां प्रभवो गवां यो

गोविंदचंद्र इति चंद्र इवाम्बुरासे.[17] ।। 8
न कथमप्यलभन्त रणक्षमां-
स्तिसृषु दिक्षु गजानथ वज्रिणः ।
क-

8. कुभि पत्र[18]मुरभ्रमु-वल्लभ-
प्रतिभटा [इव] यस्य य[19]टा-गजाः । 9
अजनि विजयचंद्रो नाम तस्मान्नरे(रें)द्रः
सुरपतिरिव भ[20]भृत्पक्ष-विच्छेद-दक्ष(:*) ।
भुवन-दलन-हेला-हर्म्म(र्म्य)-हृस्वीर[21]-ना-

9. री-
नय(न)-जलद-धारा-धौत-भूलोक-तापः ।। 10
लोक-त्रयाक्रमण-केलि-विशृंखलानि
[प्रख्या]त-कीर्त्ति-कवि-वर्ण्णित-वैभवानि ।
यस्य त्रिविक्रम-पद-क्रम-भांजि भान्ति
प्रो[ज्जृं]भय[न्ति] व(ब)लि-

10. राज-भयं यसांसि[22] ।। 11
तस्मादद्भुत-विक्रमादथ जयच्चंद्राभिधानः पति-
र्भूपानामवतीर्ण्ण एष भुवनो[द्ध]ा[र]ाय नारायणः ।
द्वैधीभावमपास्य विग्रह-रुचिं धिक्कत्य[23] सान्तासयाः[24]
सेवन्ते यमुदग्र-

11. व(ब)न्धन-भय-ध्वंसार्थिनः पार्थिवाः ।। 12
ग[च्छे]न्मू[र्च्छाम]तु[च्छां] न य[दि] [क]वलयेत्कू[र्म]-पृष्ठाभिघात-
प्रत्यावृत्त[25]-श्रमार्त्तो नमदखिल-फणास्वाम[26]-वात्या-सह[श्रं][27] ।
उद्योगे यस्य धावद्धरणिधर-धुनी-निर्झ-

12. र-स्फार-धारा-
erected on the said piece of land. For the maintenance of this Masjid, for the lamps, oil and water required for the daily worship, and for the appointment of a preacher, a crier to prayers, and a monthly reader of the Qur'ān, and for the payment of the expenses of the Barātiśabi (Shab-i-Barāt) and Khatamarātri (reading the entire Qur'ān in one night) festivals according to the custom of the [Muslim] sailors, and for the annual white-washing and repairs of rents and defects, Fīrūz donated the following: (1) the whole *palladikā* (free holding) belonging to the temple of Śrī-Vakuleśvara in Śrī-Somanāthadevanagara, which he had bought from Tripurāntaka, priest of the god Navaghaneśvara, and Ratneśvara, priest of the god Vināyaka-bhaṭṭāraka; (2) another *palladikā*; (3) one oil-mill together with its *dāna* (tax) which was one *Pala* (four *Tolās*) of oil per measure of oil produced; (4) two shops in front of the Masjid, which he had bought from the following persons:—Nirmālya, Chhaḍā and Kīlhaṇadeva (son of the householder Soḍhala), Lūṇasīha, Dharaṇi and Māsumā (sons of *Ṭhakkura* Sohaṇa), and *Rāṇaka* Āśādhara (a resident of Balyarthakareṇa), and others.—After meeting the requirements of the Masjid, the surplus that would remain was to be sent to Makkā and Madinā.—The congregation of the ship-owners, that of the oilmen of the town (together with their preachers), that of the [Muslim] Chūrṇakāras (lime-washers) and that of the Musalmans among the *Patrapatis* (probably, Taṅgāwālās) and others were requested to protect the grant.—The inscription offers an instance of the amity between the Hindus and Arab Muslims in Gujarat before the Muslim occupation of the country.

TEXT[1]

1. १[2] ॥ ओं नमः श्री-विश्वनाथाय ॥
नमस्त(स्ते) विश्वनाथाय विश्वरूप नमो(ऽ*)स्तु ते ।
नमस्ते सू[3]न्य-रूपाय
2. लक्षालक्ष[4] नमो(ऽ*)स्तु ते ॥ 1
श्री-विश्वनाथ-प्रतिव(ब)[5]द्ध-लौ[6]जनानां वो(बो)धक-रसूल[7]-
महंमद-संवत् ६६२ त-

3. था श्री-नृप-[वि]क्रम-स(सं)१३२० तथा श्रीमद्वलभी-सं ९४५ तथा श्री-
सिंह-सं १५१ वर्षे आषाढ-वदि १३ र-

4. [वा*]वद्येह श्रीमदणहिल्लपाटकाधिष्ठित[8] - समस्त - राजावली-
समलंकृत-परमेश्वर-परमभट्टारक-

5. श्री-उमापति[9]-वर-लब्ध-प्रौढ-प्रताप-निःशंकमल्ल[10]-अरि-राय-हृदय-शल्य -
श्री-चौलुक्यचक्रवर्त्ति-म-

6. हाराजाधिराज-श्रीमत्-[11] अर्ज्जुनदेव-प्रवर्द्धमान-कल्याण-विजय-राज्ये
तत्पादपद्मोपजीविनि

7. महामात्य-राणक-श्री-मालदेवे श्रीश्री-करणादि[12]-समस्त-मुद्रा-व्यापारान्
परिपंथयतीत्येवं का-

8. ले प्रवर्त्तमाने[13] इह श्री-सोमनात्त(थ)देव-प[त्त]ने परमपाशुपता-
चार्य-महापंडित-महत्तर-धर्म्ममूर्ति-

9. गंड-श्री- पर-वीरभद्र[14] - पारि°[15]-महं°[16] श्री[17]- अभयसीह-प्रभृति-
पंचकुल-[17a]प्रतिपत्तौ तथा हुर्मुज[18]-वेला-

10. कूले अमीर-श्री-रुकनदीन(ने)[19] राज्ये(ज्यं) परिपंथयति सति कार्य-
वशात्[20] श्री-सोमनाथदेवनगरं स-

11. मायात-[हु]र्मुजदेशीय-खोजा-नौ°-[21] अबू(बू)-ब्रा(ब्रा)हिम-सुत-नाखू°-[22]
नोरदीन[23]-पीरोजेन श्री-

12. सोमनाथदेव - द्रोणी-प्रतिबद्ध-महायणान्तः[24]पाति-प्रत्यय - बृहत्पुरुष-ठ°-[25]
श्री-पलुगिदेव-

13. वृ(बृ)हत्पुरुष-राणक-श्री-सोमेश्वरदेव - बृह[त्पु]रुष-ठ°-श्री-रामदेव-वृह-
त्पुरुष-ठ°-श्री-भीम-

14. सीह - वृ(बृ)हत्पुरुष - राज°[26]-श्री-छाडा-प्रभृति-समस्त महण(हाजन)-
लोक-प्रत्यक्षं तथा समस्त जमा-[27]

15. थ-प्रत्यक्षं च राज°[26]-श्री-नानसीह-सुत - वृ(बृ)ह°-राज°[26]-श्री-छा[डा]-
प्रभृतीनां पार्श्वात्[29] श्री-सोमनाथ-

16. देवनगर-वा(बा)ह्ये सीकोत्तर्यां महायण(जन)पाल्यां संतिष्ट(ष्ठ)मान-
भूषंड[30] नव-निधान-सहि-

17. तं यथेष्ट-काम(कर्म्म)-करणीयत्वेन स्पर्शन-न्यायेन समुपात्तं(त्तम्) ॥
ततः नाखू°-[22] पोरोजे-

18. न स्व-धर्म्म-शास्त्राभिप्रायेण परम-धार्म्मिकेण भूत्वा आ-चन्द्रार्क्क-स्था-
यिनो[31]-कीर्त्ति-प्र-

19. सिद्ध्यर्थं[32] ग्रात्मन: श्रयोऽर्थं (च*) उपर्यालापित-भूषंडस्य[33] स्थाने पूर्वाभिमुख-मिजिमिति-

20. धर्म्मस्थानं वृ(बृ)ह°-राज°-श्री-छाडा-सखा(हा)यत्वेन धर्म्म-बांधवेन कारितं-(तम्) । नाखू°-पीरोजेन[35]

21. ग्रस्य मिजिगिति-धर्म्मस्थानस्य वर्त्तापनार्थं[35a] प्रतिदिनं पूजा-दीप-तैल-पानीय(ार्थं*) तथा मा-

22. लिम-मोदिन[36]-मास-पाठक(कार्थं) तथा नौ-वित्तकानां समाचारेण बरातिरा(श)बि[37]-खतमराति(त्रि)-

23. विशेषपूजा-महोत्सव-काराप(कर)णार्थं तथा प्रतिवर्षं छोह्-चूना-भग्न-विशीर्ण्णं-समारच-

24. नार्थं च श्री-नवघणे(ने)श्वरदेवीय - स्थानपति-श्री-पर-त्रिपुरांतक-तथा-[37a] विनायकभट्टारक-

25. पर-रतनेश्वर-प्रभृतीनां पार्श्वात्[38] उपात्त(त्ता) श्री-[सो]मनाथदेवनगर-मध्ये श्रीवउ(कु)लेश्व-

26. रदेवीय-समग्र-पल्लडिका[39] नानामुख-तृणछाद्य-कवेलुकाछा(च्छा)दित-गृहैरुपेता (।*) तथा उत्त-

27. राभिमुख-द्विभौम-[40]मठ-समेतापरं[41] ग्रस्या मध्ये सूत्र°-[42] कार्ह्नग्रा-सक्त(क्त)-पूर्वाभिमुख-गृहै-

28. क(कं) बाह्यं चतुराघाटेषु ग्रव्यग्र(ङ्ग)-प्राकारोपेता उत्तराभिमुख-प्रतोली-प्रवेश-निर्गमोपे-

29. ता यथावस्थित-चतुराघाटन -विशुद्धा यथा-प्रसिद्ध-परिभोगा (।*) तथा घाणी[43] १ स.क्त(तत्सत्कं) दान(नंतैल-) पलं (च ।*)

30. तथा ग्रस्या मिजिगिति(त्याः) ग्रग्रतः प्रत्यय°- निम्र्माल्य-छडा-सोढलसुत-कील्हणदेव-तथा[43a] -ठ-

31. सोहणसुत-लूणसीह-धरणि-[म]सू[मा][44] - तथा[43a] - [बाल्यर्थं]-करेणाधिष्ठित-राण°[45]-ग्रासधर-प्रभृ-

32. तीनां पार्श्वात् स्पर्शनेनोपात्तं हट्ट-द्वयं(यम् ।) एवमेतत्[46] उदकेन प्रदत्तं-(त्तम्) ।। ग्रनेन ग्रा(य*)पदेन[47]

33. ग्रा-चंद्र-ग्रह-तारकं यावत्[48] नौ-पीरोज-सक्त(त्क)-मिजिगिति-धर्म्मस्थान-मिदं नौ-पीरो-

34. ज-श्रेयोऽर्थं प्रतिपालनीयं,वर्त्ताप(वर्त्त)नीयं भग्नविशीर्णं समारचनीयं च ।। ग्रनेन ग्राय-

35. पदेन धर्म्मस्थानमिदं वर्त्ताप(वर्त्त)यतां प्रतिपालयतां तथा विशेष-
महोत्सव-पर्व-व्यये[49]

36. कुर्वतां च(।*)यत्किंचित्[50] शेष-द्रव्यमुद्ग(द्गि)रति तत्सर्वं द्रव्यं
मषा-[51]-मदीना-धर्म्मस्थाने प्रस्थाप-

37. नीय(म्*) ।। अस्य धर्म्मस्थानस्य आयपदं सदैव जमाथ-मध्ये नाखुया-[52]
नोरिक-जमाथ(:*) त-

38. था खतीब[53]- सहित-समस्त- शहर[54]- सक्त(त्क) -घं(घां)चिकानां[54a]
जमाथ(:*) तथा चूण(र्ण)कर-जमाथ(:*) तथा पा(प)-[55]

39. त्रपतीनां मध्ये मुशलमान-जमाथ-प्रभृतिभिः समस्तैरपि मिलित्वा आय-
पदमि-

40. दं पालाप(पाल)नीयं धर्म्मस्थानमिदं वर्त्ताप(वर्त्त)नीयं च ।।
दाता च प्रेरकश्चैव ये धर्म्म-प्रति-

41. पालकाः । 2
ते सर्वे पुण्य-कर्म्माणो नियतं स्वर्ग-गामिनः ।।
य×कोऽपि धर्म्मस्थानमि-

42. दं तथा आयपदं[56] च लोपयति लोपापयति[57] स पापात्मा पञ्च-
महापातक-दोषेण लि-

43. प्य[ते] नरक-गामी (च*) भवति ।।

1. From impressions.
2. This is the symbol read as *siddham*, *Oṁ siddhiḥ* or *siddhir=astu*.
3. Read *śūnya*.
4. Read *lakshy-ālakshya*.
5. *B* and *v* have been rarely discriminated, the latter being generally used to indicate the former.
6. Read *nau°*.
7. I.e. the prophet Muḥammad.
8. Read *°sthita*.
9. Correctly, *°śry-Umā°*.
10. Correctly, *°mall-āri°*.
11. Correctly, *°mad-Arjjuna°*.
12. Literally, the making of *śrī-śrī* (at the beginning of documents). It therefore means 'drawing up of documents'.
13. One may prefer *manā iha*, though *sandhi* is not compulsory in prose.
14. Hultzsch takes it as *Gaṇḍa-śrī-paravīrabhadra*.
15. I. e. *pārikshaka*, 'money-changer'.
16. I. e. *mahattara*.
17. Correctly, *śry-Abhaya°*.

17a. According to Bühler *pañchakula* (i.e. board of five clans) is preserved in the modern name Pancholī which is borne by many distinguished Kāyastha families. It is the same as *Pañchāyat*; cf. *ashṭa-kul-ādhikaraṇa* of some old Bengal records and Tamil *añj-ashṭa-sabhai* (assembly of five or eight members).

18. The Hurmuz coast may indicate the island of Ormuz (Arabic *Hurmūz* or *Hurmuz*) or the neighbouring Persian coast.

19. Arabic *Ruknud-dīn.*

20. One may prefer °*vaśāch=chhrī*°; but *sandhi* is not compulsory in prose composition.

21. The *akshara nau* stands for *nauvāha*, i.e. *nākhudā.*

22. I. e. *nākhudā.*

23. I. e. Arabic *Nūrud-dīn Fīrūz.*

24. Hultzsch takes it to be the same as *mahājana.*

25. I. e *ṭhakkura.*

26. I. e. *rājakula.*

27. I. e. *jamāyet.*

28. I. e. *bṛihatpurusha* like *mahājana.*

29. One may prefer *pārśvāch=chhrī*, though *sandhi* is not compulsory in prose.

30. I. e. *khaṁḍaṁ. Sh* has been used in the record in several places to indicate *kh.*

31. Correctly. *sthāyi*°.

32. Correctly, *siddhy-artham=ātmanaḥ.*

33. Read °*khaṇḍasya.*

34. I. e. *masjid.*

35. One may prefer °*jen=āsya*; but *sandhi* is not compulsory in prose composition.

35a. Read *varttan-ārthaṁ.*

36. Arabic *mālim* and *mūdin.*

37. The reference here is to the great Muslim festival of Shab-i-barāt and to the custom of reading out the entire *Qurān* in a single night. *Chhoha*= Gujarāti *chho*, mortar; *chūnā*=Sanskrit *chūrṇa*, lime.

37a. The word *tathā* is redundant.

38. One may prefer *sandhi* here as *pārśvād=upātta.*

39. This word is found also in other Chaulukya inscriptions.

40. Better *dvi-bhūma.*

41. Read °*parā | asyā.*

42. I. e. *sūtradhara.*

43. I. e. oilmill.

43a. The word *tathā* is superfluous.

44. *Masūmā* may also be read *Gasūnā.*

45. I. e. *Rāṇaka*. Read *Āśādhara.*

46. Better read *etat sarvam.*

47. For this word, see lines 34, 37, 39 and 42 below.

48. Correctly *yāvan=nau*°; *nau* stands for *nauvāha* or *nākhudā.*

49. The author has used neuter accusative dual.

50. One may prefer *sandhi* here as °*tkiñchich=chhesha*°.

51. I. e. *Makhā* i.e. Makkā (Mecca). *Madīnā* is Madinah.

52. The first word may be *nākhudā* and the second a mistake for *nāvika*.

53. Arabic *Khaṭīb*.

54. Hultzsch read *śahaḍa* and regarded it as Arabic *śahīd* or 'martyr'.

54a. Hultzsch reads *ghaṭṭika*, translates 'wharf-people' and connects the word with *ghaṭṭa*, a landing place; but it is Gujarāti for 'oilmen'.

55. The word *patrapati* may mean a *ṭaṅgāwālā*.

56. Read *āyapadam=idaṁ*.

57. The correct form of the word is *lopayati*.

CHAPTER IV

NORTH-WESTERN INDIA AND PAKISTAN

A—The Chāhamānas

No. 37—Delhi-Siwālik Stone Pillar Inscription of Vīsala or Vigraha IV, [Vikrama] year 1220 (1163 A.D.)[1]

R. Śarmā, *As. Res.*, I, pp. 379ff.; H. T. Colebrooke, *ibid.*, VII, pp. 179ff.; IX, p. 445; Wilford, *ibid.*, IX, pp. 188f.; Prinsep's *Essays*, I, p. 325; Kielhorn, *Ind. Ant.*, XIX, p. 218.

Language: Sanskrit.
Script: Early Nāgarī.
Metres: Vv. 12 शार्दूलविक्रीडित; V. 3 स्रग्धरा; V. 4 शार्दूलविक्रीडित.
Summary: The inscription contains three records, two of which bear the date — VIKRAMA-SAṀVAT 1220 VAIŚĀKHA-ŚUDI 15, THURSDAY (9TH APRIL, OR 7TH MAY, 1164 A.D.). It is a eulogy of the CHĀHAMĀNA king VIGRAHARĀJA IV or VĪSALA who was the son of ANALLA (Arṇo or Ānāka) and is called 'the lord of ŚĀKAMBHARĪ'. He is stated to have made ĀRYĀVARTA (lying between the Vindhya and Himādri) completely free from the MLECHCHHAS (Muhammadans) and levied taxes from the said area.—The eulogy was composed or written on the stone by ŚRĪPATI, son of Māhava (Mādhava) of the GAUḌA-KĀYASTHA community, in the presence of the astrologer TILAKARĀJA, under orders from the king.—At the time, the *Mahāmantrin* was Prince SALLAKSHAṆAPĀLA.

TEXT[2]

A

1. ٩[3] संवत् १२२० वैशाख-शुति[4] १५ (॥*)
2. शाकंभरी-भूपति-श्रीमदवेल्लदे-
3. वात्मज[6]-श्रीमद्वीसलदेवस्य ॥

B

1. ٩[3] अंभो नाम रिपु-प्रिया-नयनयोः प्रत्यर्थि-दंतान्तरे
प्रत्यक्षाणि तृणानि वैभव-मिलत्काष्ठं यशस्तावकं(कम्) ।

2. मार्ग्गो लोक-विरुद्ध एव विजन : शून्यं मनो विद्विषां
श्रीमद्विग्रहराजदेव भवतः प्राप्ते प्रयाणोत्सवे ॥ 1
3. लीला-मंदिर-सोदरेषु भवतु स्वांतेषु वामभ्रुवां
शत्रूणां तु न विग्रह-क्षितिपते न्याय्यो(ऽ*)त्र वासस्तव ।
4. शंका वा पुरुषोत्तमस्य भवतो नास्त्येव वारांनिधे-
र्न्निर्म्मंथ्यापहृत-श्रियः किमु भवान्क्रोडे न निद्रायितः ॥ 2

C

1. ॰[3] आ विंध्यादा हिमाद्रेर्व्विरचित-विजय[6]स्तीर्थयात्रा-प्रसंगा-
दुद्ग्रीवेषु प्रहर्त्ता नृपतिषु विनस(म)त्कन्धरेषु प्रसन्नः ।
2. आर्यावर्त्तं यथार्थं पुनरपि कृतवान्म्लेच्छ-विच्छेदनाभि-
र्द्देवः शाकंभरीन्द्रो जगति विजयते वीसल-क्षोणिपालः ॥ 3
3. ब्रूते[6a] संप्रति चाहमान-तिलकः शाकंभरी-भूपतिः
श्रीमद्विग्रहराज एष विजयी संतानजानात्मनः ।
4. अस्माभिः करदं व्यधायि हिमवद्विंध्यांतरालं भुवः
शेष-स्वीकरणाय मास्तु भवतामुद्योग-शून्यं मनः ॥ 4
5. संवत् श्री-विक्रमादित्ये[7] १२२० वैशाख-शु-ति १५ गुरौ (॥*)
लिखितमिदं राजादेशात्[8] ज्योतिषिक-श्री-तिलकराज-
प्रत्यक्षं गौडान्वय-कायस्थ-माहव-पुत्र-श्रीपतिना ।
6. अत्र समये महामंत्री राजपुत्र-श्री-सल्लक्षणपालः ॥

1. It is said that the original site of the pillar was near Khizrābād, west of the Jamunā, at the feet of the Siwālik mountains, whence it was brought to Delhi by Sulṭān Firūz Shāh (1351-88 A.D.). It is now at Delhi and is known as Firūz Shāh's Lāṭ or the Siwālik pillar. It contains one version of the pillar edicts of Aśoka.

2. From the facsimile in *Ind. Ant.*, XIX.

3. Symbol for *siddham* or *Oṁ siddhiḥ* or *siddhir=astu*.

4. Often written *śu°-di°* which is a contraction of *śuddha* (or *śukla*)-*paksha-divasa.*

5. A *visarga* had been engraved between *ja* and *śrī,* but was afterwards cancelled. Read *Śrīmad-Ānalladev-ātmaja.*

6. *Vijayaḥ* had been at first engraved; but the *visarga* was struck out afterwards. The claim concerning the whole of North India is conventional.

6a. *B* has been indicated by the sign for *v*. Read *brūte.*

7. Properly *Vaikramâditye.* Cf. *saṁvatsare=smin Vaikramāditye saṁvat* 1337 in the Pālam Bāoli stone inscription (*J.A.S.B,* XLIII, Pt. I, p. 108, Pl. x, l. 21).

8. One may prefer *sandhi* here as ° *deśāj=jyo*°.

9. Gauḍa, which signifies the Gauḍa country, does not appear to be a Sanskritised form of Goṇḍ.

No. 38—Inscription on some Silver Coins of Pṛithvīrāja III (c. 1175-93 A.D.)

D.C. Sircar, *Stud. Ind. Coins*, p. 384, No. XVI/11.
The coin is of the 32-Rati Kārshāpaṇa standard and has the size of .6 inch and the weight of 52 grains.

First Side

Crude representation of a horseman.
Legend—**श्री-पृथ्वीराजदेव**

Second Side

Crude representation of a bull.
Legend—**आशावरी-श्री-सामन्तदेव**, 'The illustrious vassal of the [Goddess] Āśāvarī (Āśāpūrī)'.
This reverse type was imitated from earlier coins.

B—The Trigartas

No. 39—Baijnāth Stone Inscription of the time of Jayachchandra, [Laukika] year 80, Śaka [1126] expired (1204 A.D.)

Śiva-Vaidyanātha (Baijnāth) temple, Kīrgāon (Kīragrāma) or Baijnāth, Kangra District, Himachal Pradesh.

Cunningham, *Arch. S. Rep.*, V, pp 180f.; Bühler, *Ep. Ind.*, I, pp. 104ff.; II, pp. 482 f.; cf. Kielhorn, *Ind. Ant.*, XX, p. 154; Bhandarkar's List, No. 1438.

Language : Sanskrit.

Script : Early Nāgarī.

Metres: V. 1 वसन्ततिलक; Vv. 2-3 शार्दूलविक्रीडित; V. अनुष्टुभ् (श्लोक); V.5 उपजाति; V.6 वंशस्थ; V.7 उपजाति; V.8 अनुष्टुभ् (श्लोक); V.9 मञ्जुभाषिणी; V.10 आर्या; Vv. 11-17 अनुष्टुभ् (श्लोक); Vv. 18-19 आर्या; V.20 रथोद्धता; Vv.21-22 उपजाति; V.23 उपेन्द्रवज्रा; V.24 उपजाति; V.25 वंशस्थ; V.26 उपजाति; Vv.27-28 इन्द्रवज्रा; V.29 उपजाति; V.30 शार्दूलविक्रीडित; V.31 आर्या; Vv.32-33 अनुष्टुभ् (श्लोक); Vv.34-37 रथोद्धता; V.38 अनुष्टुभ् (श्लोक); V.39 उपजाति.

Summary : The inscription, belonging to *Rājānaka* LAKSHMAṆA-CHANDRA OF KĪRAGRĀMA (Kangra) and his overlord JAYACH-CHANDRA of TRIGARTA (Jālandhara), begins with adoration to the GAṆAPA (Gaṇeśa) COUPLE and at first quotes a small poem entitled *Gaurīśvarastotra*. The latter part of the epigraph introduces the chief Lakshmaṇachandra who visited KEDĀRA on pilgrimage. It records the construction of a ŚIVA TEMPLE by the merchant brothers MANYUKA and ĀHUKA who were the sons of Siddha and also the gift of land made by the Brāhmaṇas RALHAṆA and GAṆEŚVARA and the merchant JĪVAKA. The temple was built by *Sūtradhara* NĀYAKA and ṬHOḌHUKA of

SUŚARMAPURA.—The eulogy was composed by the poet RĀMA in the [LAUKIKA] YEAR 80 and apparently the Śaka year 1126, JYESHṬHA ŚU-DI 1 (2ND MAY, 1204 A.D.).

TEXT[1]

1. [१[2]] [स्वस्ति] (।*) [ओं] न[मो] [ग]णपयो:[3] ।
यद्यप्यहं पशुपते कुमति[द्र] एव
पर्याप्त-भक्ति-विव[शे]न मया त[था]पि ।
अस्यां स्तुतौ [श्र]वण-ले[ह्य-र]सांश-भाजि
गौ-
2. [र्यं]ा सहैव परमेश निमन्त्रितो(ऽ*)सि ॥ 1
पा[श-च्छेद]न-[क]र्त्तरि प्र[ण]मतां मोहान्धकूप-ब्रुड-
[ल्लोक]-प्रोद्धरण-[क्षमे] नि[रु]पमानन्दैक-[सं]दायिनि ।
दुर्गे द्वार U–U
3. हारिणि हरि-ब्र[ह्म]ादि-देव-स्तुते
भक्ति क्षेम-विधायिनि त्रिनयने त्वय्येव न[स्स्वा]मिनि ॥ 2
व्यापद्वल्लि-[समू]ल-[पा]टन-[क]री त्वं गीयसे स[र्वदा]
[मा]-
4. ता [त्वं] जगतस्तवास्ति न मिति[स्स्वे]षां [महि]म्नामिह ।
उक्ति × केवलमेव [शो]भत इयं नो देव-[मा]तेति ते
संसर्ग⁀पि[तृ]-काननैरु[पचि]तै[रा]श्रीयते च [त्वया] ॥ 3
5. यस्य[ा] हिमालयो[त्कर्ष]-पोषिणी [मूर्त्ति]रुत्तमा ।
तस्यानमन्ति चरणौ धन्या × केचन जन्तवः ॥ 4
धन्यै[र्न]रैरु[प्र]वधूस्सदैव
[त्व]मुद्यसे [भ]क्ति-
6. भराभिरामैः ।
क्लेशापहारीति मनोहराभि-
र्वा[ग्भि] × क[वीना]मुपगीय[से] च ॥ 5
आसन्न-मृत्युत्व-दशामुपेयुषा[ं]
सुरेषु नास्याममरेषु कु-
7. र्वताम् ।
सत्यं भवानी-शरणाभिलाषिणां
मनोरथं पूरयितुं प्रगल्भते ॥ 6

मुहुस्समुद्रासिन एव यु[द्ध]-
क्री[ड]ा-निकृत्तासुरस[र्म]प[स्य] ।
8 सत्यं हरेरप्युपरि त्वमेव
सन्तिष्ठसे नि[ष्ठु]र-वीर्य-धाम्नः ॥ 7
[म]लादि-हृदयाह्लादि-द[र्श]नतो दिने दिने ।
बहुदेहान्तर-[स्था]णु[स्त्व]मेव किल कथ्यसे ॥ 8
9. प्रसरन्मरीचि-चय-चन्द्र-चारुणा
वदनेन राजसितरामतिश्रिणा ।
बहु-शोणिमादि-गुण-सम्पदालयौ
परिपूजयन्ति चरणौ तवामराः ॥ 9
10. त्रैलोक्य-जनन्यां त्वयि करुणावति युज्यते नृणां भक्तिः ।
त्रैलो[क्या]न्तर्निलयं त्वं हि [ज]नं नयसि परम-पदम् ॥ 10
गिरिजेशाधिखिन्नो(ऽ*)[स्मि]
11. त्वं गतिर्भव साम्प्रतम् [।]
संसार-सागराच्चेतो भीरु मे नीयतां शमम् ॥ 11
शिवायैकविनन्तव्य-पुण्य-पादाग्र-पांसवे ।
तुभ्यं [क्षुभ्य]द्रिपु-ध्वंस-म-
12. हाशक्तिमते नमः ॥ 12
चन्च[4]च्चापल-सद्दृष्टिर्विषमेषु प्रयोजक(: ।*)
त्रैलो[क्य]-स्त्रीजनो यो(ऽ*)त्र तस्य त्वमधिदैवतम् (॥*) 13
[शोभि]ता[नां] त्रिभिर्नेत्रैर्पृ[डा]नि-
13. शरणर्षिणाम् (।*)
वपुश्श्री-मद-विध्वंसं विधातुं प्रजगल्भिषे ॥ 14
श्रापत्कलापमेलाप-परिताप-प्रलापिनम् (।*)
गौरीशास्ति विमोहात्कं [कस्त्रा]तुम-
14. परः क्षमः ॥ 15
शर्वाणि मानं त्वद्भक्ता यान्ति सर्वातिशायिनम् ।
प्रसीद मातस्संसाराच्छीघ्रमेव विमोचय ॥ 16
गाढा गजानने प्रीतिस्स[र्व-मोहि व-
15. पुस्सदा ।
उद्दीपित-स्मरा दृष्टिर्यस्यास्ते तत्पदं नुमः ॥ 17
इति रामेण निरामय सममुमया यन्मया स्तुतो(ऽ*)सि विभो (।*)
श्रुत्वा तममोघीकुरु परिश्रमं

16. परमकारुणिक ।। 18
एकोक्त्या स्तोत्रमिदं गौरीश्वरयोः पठन्ति ये भक्त्या ।
तेषामप्यभिलाषस्सिध्यतु शिवयोᳶप्रसादेन ।। 19
इति गौरीश्वर-स्तोत्रम् ।।

17. अस्ति शीतलगभस्तिशेखर
त्वत्प्रशस्ति-करणे कुतो(ऽ*)र्हता ।
किन्तु पावकमयाक्ष तावको[5]
भक्तिरेव जडतां भनक्ति नः ।। 20
अद्यापि विस्मापयिता-

18. र एते
विद्यन्त एवेश्वर-भक्तिमन्तः (।*)
विचित्र-चारित्र-निधिर्यथैष
राजानको लक्ष्मणचन्द्र-नामा ।। 21
केदार-यात्रां विरचय्य येन
विशोधनीं प्राक्त-

19. न-दुष्कृतस्य
इतᳶपरं सर्व-पर-स्त्रियो मे
स्वसार इत्येव कृता प्रतिज्ञा ।। 22
किमेतदाश्चर्यमवार्य-वीर्य-
र्यदेष योधैर्युधि दुष्प्रध[र्ष]ः (।*)
धनु-

20. र्धराणां धुरि यो मनोभू-
र्बभूव तस्याप्यविधेय एव ।। 23
अद्येश्वरा मन्द-पराक्रमत्वं
मत्वा विपक्षैरवधारिताज्ञाः (।*)
[व]ास्तव्य-नारी-हठ-स[ङ्ग]मेन

21. पुराधिपत्यं सफलं विदन्ति ।। 24
नवं वयो रूपमधि[श्रि] दातृता
पुराधिपत्यं बहवᳶप्रियङ्कराः (।*)
तथापि चेतᳶपर-दार-वर्जि चे-
त्किमस्ति दुस्साधमतᳶप-

22. रं तपः ॥ 25
राजानकस्य प्रविशुद्ध-बुद्धे⌒-
पाणि कृपाण-ग्रहण-प्रवीणः (।*)
विव[र्ज]यामास विगर्हितानि
तस्य[ा]न्य-नारी-स्तन-मर्दनानि ॥ 26
तस्यास्ति
23. देशे[6] (ऽ*)त्र वणिक्प्रसिद्ध-
स्सिद्धात्मजो मन्यक-नामधेयः (।*)
छिन्नेत्यविच्छिन्न-महेश-भक्ते-
र्मातावदात-चरितस्य य[स्य] ॥ 27
यस्याहु[का]श्यो (ऽ*)स्त्यविभक्त-वित्तो
24. भ्राता कनिष्ठस्सुकृतैकनिष्ठः (।*)
व्यग्रा समग्रातिथि-पूजनाय
गुल्हेति गर्हा रहिता च भ[ार्या] ॥ 28
भक्ति-[वुटल्लो]ऽम-मल्लेन ते[न]
स-भ्रातृकेन त्रिपु-
25. रान्तकस्य ।
द्वारस्थ-गङ्गा -यमुनादि-मूर्ति -
कृता पुरीयं सह मण्डपेन ॥ 29
भस्त्रा-गर्भ-गृहीत-सर्व-विभवा नेदिष्ठ-देशे क्वचि-
द्ये कुर्व्वन्ति गतागता-
26. नि वणिजो गण्या वराका × क्व ते ।
धन्यो मन्यक-नामधेय इह हि श्रीकण्ठ-रज्यन्मन⌒-
पोतप्रोत-विवेक-वेतन-धनो मोहार्णवं तीर्णवान् ॥ 30
देव-द्विज-गु-
27. रु-भक्तस्सौजन्यनिधिर्गुणि-प्रियो दाता ।
ग्रामुक-सुतो(ऽ*)स्ति विप्रो रल्हण-नामा सुशर्मपुरे 31
तेन दैवज्ञ-धुर्येण धान्य-द्रोण-द्वयं शिवे
वहमान-[स्व]-भू-पृ-
28. ष्ठान्नवग्रामात्समर्पितम् ॥ 32
इतस्त्येन नवग्रामाद्दत्ता चा[व] ह[लार्ध]-भूः (।*)
गणेश्वरेण गोविन्द-द्विज-पुत्रेण धीमता ॥ 33
दीपिकाङ्क-जनितेन मन्हिका-

29. सूनना[8] वितत-वित्त -शालिना ।
जीवकेन वणिजा निजा च भू⁀-
प्राङ्गणाय पुरतश्शिवे(ऽ*)र्पिता ॥ 34
[या]वदे[9][ष] भगवा[न्भुवाम्प]ति-
र्व्योम कोम[ल-रु]चिश्च ग[ाह]-

30. ते ।
मन्युकाहु[क-कृत]शिवालय-
स्तावदस्तु सम[11]मन्य-सासनः[12] ॥ 35[12a]
आसिकात्मज उ[दा]र-धी[वं]स-
न्सूत्रधार-धुरि नायकाभिधः
श्री-सुश[र्म]-

31. नगरादिहाययौ
[सम्म]नस्य[13] तनयश्च ठोढुकः ॥ 36
तेन तेन च सहैव टङ्किता
प्रोन्नता शिवपुरी स-मण्डपा
[शा]स्त्र-दृष्टिमनुसृत्य नि[र्मि]-

32. ता
यत्र भान्ति गण-वर्ग-मू[र्त्तयः] [॥] 37
श्रृङ्गारा-भृङ्गकौ यस्य पितरौ पुण्य-

33. शालिनौ ।
स प्रशस्तिमिमां चक्रे राम-नामा क[वी]श्वरः[14][॥] 38
संवत्सरे-

34. (ऽ*)शीतितमे [प्र]स[न्ने][15]
[ज्यैष्ठ[15]]स्य शुक्ल-प्रतिपत्तिथौ च ।
[श्री]म[ज्ज]यच्चन्द्र-नरेन्द्र-राज्ये
रवे[र्दि]ने राम-कृता प्रशस्तिः ॥ 39
॥ ओं नमश्शिवाय ॥

35. [शक-काल-गताब्दाः][16]

1. Prepared from the transcript in *Ep. Ind.*, I.
2. The symbol is read as *Oṁ siddhiḥ*, *siddhir=astu* or *siddham*.
3. Bühler accepts the reading above and translates the passage as, "obeisance to the two rulers of the Gaṇas" (i.e. Śiva and Pārvatī). But

it is better to regard it as referring to Gaṇeśa and his *Śakti*, sometimes called Gaṇeśānī. See *JAIH*, II, pp. 112ff.; cf. *ibid.*, IV. p. 181.

4. Read *chañcha°*.

5. *Tāvikī* was originally engraved.

6. Read *deśe°*.

7. The reading is due to Kielhorn.

8. Read *sūnunā*.

9. Possibly *sa* is wrongly engraved in place of *sha*.

10. This may possibly be read as *bhuvaspati*.

11. An *akshara* had possibly been engraved and then scratched out between the two *mas* of *samamanya*.

12. Read *śāsanaiḥ*.

12a. After this verse there is the rude representation of a lotus.

13. This may also be read as *Masmanasya* or *Sasmanasya*.

14. Read *kavīśvaraḥ*.

15. This may also be *prasindhe*, a mistake for *prasiddhe*.

15a. Possibly *Jyeshṭhasya*.

16. The date is apparently Śaka 1126 as in the other grant. See Kielhorn's Northern List, No. 9, note.

No. 40—Baijnāth Stone Inscription of the time of Jayachchandra, Śaka year 1126 (1204 A.D)

Baijnāth or Kīrgāon, Kangra District, Himachal Pradesh.

Cunningham, *Arch. Rep.*, V., pp. 180 f; Bühler, *Ep. Ind.*, I, pp. 112ff.; II, pp. 482f.; Bhandarkar's List, No. 1084.

Language : Sanskrit.

Script : Early Nāgarī.

Metres: V.1 स्रग्धरा; V.2 अनुष्टुभ् (श्लोक); V.3-4 शार्दूलविक्रीडित; V.16 अपरवक्त्र; V.17 उपजाति; V.18 आर्या; V.19 गीति; Vv.20-21 अनुष्टुभ् (श्लोक); Vv.22-31 आर्या; V.32 रथोद्धता; Vv.33-37 आर्या.

Summary : The inscription, beginning with adoration to the god ŚIVA, belongs to the rule of *Rājānaka* LAKSHMAṆA or LAKSHMAṆACHANDRA of KĪRAGRĀMA (Kangra) and his overlord king JAYACHCHANDRA of JĀLANDHARA or TRIGARTA. Lakshmaṇa, who married MAYATALLĀ and was the younger brother of RĀMA, was the son of BILHAṆA by LAKSHAṆIKĀ or LAKSHAṆĀ (daughter of king HṚIDAYACHANDRA of TRIGARTA). Bilhaṇa's father was Kunthana or Kalhaṇa; his father Bhuvana; his father Ḍombaka; his father Brahman; his father Vigraha; his father Buddha; and his father Kunda.—The inscription records the construction of a temple and *maṇḍapa* by Manyuka and Āhuka, sons of Siddha, for the god (Śivaliṅga) called VAIDYANĀTHA.—LAKSHMAṆACHANDRA made a grant of 6 *drammas* per day in favour of the temple out of collections of the customs houses while the queen mother LAKSHAṆĀ gave one *hala* of land at the village of PRALAMBA. MANYUKA and ĀHUKA gave to the god their oilpressing machine at KĪRAGRĀMA and 4 *halas* of land at NAVAGRĀMA.—The eulogy was composed by the youngman RĀMA, son of Bhṛiṅgaka. It was engraved by GUHAKA.—The date of the inscription is the EXPIRED ŚAKA YEAR 1126 (1204 A.D.).

TEXT[1]

1. १[2] स्व[स्ति] (।*) [ओं] नमश्श[र्वा]य ।
[आशास्यं वो[3] गजास्यो] वितरतु हरता[त्तार]कारिर्विकारं
नन्दी सानन्द[नो](ऽ*)यं भवतु स [च] महाकाल-शूलस्य [ध]र्ता ।
—

2. — —ीना U— —[रच]यतु कु[शलं][4] वीरभद्रो हि [भ]द्रं
सर्वं वो(ऽ*)खर्व-गर्वा विदधतु कुशलं किङ्कराश्शङ्करस्य ॥
स पातु वो [म]हादेवो [ब्रह्मा]- 1

3. [द्या*] भक्तिमास्थिताः[5] (।*)
आत्मानं मु[हु]रीक्षन्ते यत्पाद-नख-दर्पणे ॥ 2
काष्ठोद्दीपन-क[र्म]ठा जगति या या निर्निमेषेक्षणै-
स्सत्पक्षै-

4. रुपजीव्यते द्विज-जनं या बिभ्रती शस्य[ते](।*)
देवस्याहुति-लम्पटस्य परमा पुष्टिर्यतो [जा]यते
ताभिर्मूर्तिभिरष्टभिर्भवतु वो भूत्यै भवानी-वि-

5. [भु]: ॥ 3
एतेनै[व] शरत्वमभ्युपगतं प्लोषाय पूर्वं पुरा
संप्राप्त[ा] धनुषश्श्रियं तनुरियं संप्रत्यमुष्यैव च ।
व्यानम्रे हसतीव य[त्सु]र-

6. रिपावित्थंमुहुर्विस्मया-
द्भस्म-स्मेरमुपास्महे स्मरजित⁀पाद-द्वयं [त]द्वयम् ॥ 4
यद्यप्यचेतनत्वाद्वक्तुमशक्तस्सुरालयस्तदपि ।
अ-

7. थ केन [कृ]तो(ऽ*)हमिति प्रशस्ति-पृथु-जिह्वया वदति ॥ 5
ज[ा]लन्धराधिराजो जयति गुणानां निधिर्जयच्चन्द्रः ।
ईदृशि यस्य राज्ये देवायतना-

8. नि जातानि ॥ 6
वित्तं शिवे प्रयुक्तं येषां कालेन भवति कोटि-गुणम् ।
ग[ण्यास्तत्रै]व वणिजश्शेषै ‹ किं स्तोक-वा[र्धु]षिकैः ॥ 7
अनेन वक्ष्यमाणेन सुकृतेन महा-

9. नयौ ।
गण्यौ गणेषु भ्रातरौ भूयास्तां मन्युकाहुकौ ।। 8
तौ भ्रातरौ कृतार्थौ याभ्यां शम-दम-[प]योधर-युतायाः ।
शि[व]-भक्ति-जनन्या [अ]पि रस-

10 स्समास्वादितस्सार्धम् ।। 9
शैलस्याङ्कच्चलित्वा रुचिर-नव-वया×खेलतीयं स-हेलं
कुल्या कन्येव यत्र स्फुरदुरु-लहरी कन्दुकाविन्दुकाख्या ।
की-

11. र-ग्रामो(ऽ*)भिरामो गुण-गण-निलयो वर्त्तते(ऽ*)धित्रिगर्तं
सो(ऽ*)यं राजानकेन प्रबल-भुज-यु[जा] [रक्षि]तो लक्ष्मणेन ।। 10
अतुल-कुल-बकुल-पा[दप]-कन्द⌣प-

12. रिपन्थिभित्पुरास्कन्दः(।*)
राजानको(ऽ*)त्र कन्द⌣ प्रथ[म]भू[द्दु]र्यमस्कन्दः ।। 11
बुद्धो विशुद्ध-बुद्धिस्तस्य सुतो(ऽ*)जनयद्दुद्धुरं तनयम् ।
विग्रह

13. इति कृत-विरहश्शत्रु-वधूनां ततो जज्ञे ।। 12
विग्रह-विग्रह-जातो ब्रह्मेति वभूव भू-वधू-दयितः (।*)
विग्रह-निग्रह करणे शक्तिर्यस्य[ाभ]वद्रि-

14. पुषु ।। 13
हस्तालम्बकमुन्नताद्विलुठतामाराधित-त्र्यम्बकं
शत्रु-श्री-परिचुम्बकं परतिमि-स्वीकार-चिन्तांधकम्[6] (।*)
क्रान्तग्राम-कदम्बकं नृपतिभिस्सद्बन्धु-

15. [कौ]टुम्बकं
[स्वा]कार[7]-प्रतिबिम्बकं स च कृती लेभे सुतं डोम्बकम् ।। 14
नारी-मोहन-यौवनं नव-नव-त्यागोर्मिभि⌣[पा]वनं
भू-भर्तु×कृत-सेवनं निजभुवस्सम्यक्प्रकृप्ता-[8]

16. वनम्(।*)
[उद्दा]म-द्विषदालयीकृत-वनं युद्धोग्र-सिंह-स्वनं
पुत्रं सो(ऽ*)पि समाससाद भुवनं शम्भौ बृहत्सावनम् ।। 15
गुण-मणि-निकुरम्ब रोहणं
प्रव-

17. ह्णमापदगाध-वारिधौ ।
कृत-सुभट-शिरोधिरोहणं
[स]मजनयत्तनयं स कुन्थनम् ॥ 16
[जा]लन्धराधीश्वर-पाद-पद्म-
निश्छद्म-भक्ति॒प्रचुरात्मशक्तिः ।

18. बलोल्वणो बिल्हण-ना[म]धेय-
स्तस्यात्मजो(ऽ*)जायत सद्विधेयः ॥ 17
तनयायां सनयस्य त्रिगर्त्त-भूभ[र्तृ]-हृदयचन्द्रस्य (।*)
[स] च राम-लक्ष्मणाख्यौ

19. लक्षणिकायां सुतौ लेभे ॥ 18
ज्येष्ठे गुणैर्गरिष्ठे बिम्बौष्ठीभिस्समं द्युपुरि गोष्ठीम् ।
अधितिष्ठति निष्ठुरधी[स्तस्य] कनिष्ठो(ऽ*)त्र सुप्रतिष्ठो(ऽ*)भूत् ॥ 19
त्रिगर्त-नृपतीनां या

20. पादपद्मोपजीविभिः (।*)
कन्दादि[भिरा]सन्दारि-सन्दारिभिरभुज्यत ॥ 20
परिपालित-वास्तव्य-स्तव्य-निर्मल-कर्मणा ।
साधुना साधुना भूमिर्लक्ष्मणेनोपभुज्यते ॥ 21

21. यस्य प्रेयस्यभवन्मयतल्ले[त्य]तुल-रूपभृद्रमणी ।
तस्मिन्कीरग्रामं लक्ष्मणचन्द्रे(ऽ*)नुपालयति ॥ 22
सिद्धाख्य-वणिक्पुत्रौ धर्म-प्रवणाविह

22 स्थितौ कृतिनौ ।
[ज्येष्ठो मन्युक-नामा कनिष्ठमप्याहुकं प्राहुः ॥ 23
भव-तरु-कुठार-धारा प्रविषमतम-जन्मभरुमरुल्ल[हरी] ।
प्ररुरोह मोह-

23. [हं]त्री [मन]सि तयोश्शाम्भवी भक्तिः ॥ 24
ताभ्यां शिवलिङ्गमिदं निरालयं वीक्ष्य वैद्यनाथाख्यम् (।*)
पुर्या सहितं विहितं पुरतो(ऽ*)स्य च मण्डपो रचित(ः ॥*) 25

24. इति मन्यु[का]हुकाभ्यामुदरे स्थित्वा पुरा किलैकत्र ।
पुनरुदर-सम्प्रवेश-प्रतिषेध-विधि[स्स] सह विहितः ॥ 26
यद्यपि पितेव कुरुते करुणां

25. शम्भुस्तथापि पितुरधिकः (।*)
जन्म-निमित्तं हि पिता शशिमौलिरजन्मनो हेतुः ॥ 27
शाहिल-पाहिल-[क]ाहिल-सिद्धास्स्वर्लोक-गामिनस्सन्तु ।

26. पूर्वे पुरुषा × क्रमशश्चत्वारो मन्युकाहुकयोः ॥ 28
किम्बहुना[प्यु]र्ष्देषा[9] पुरुषाणामे[व] विंशतिर्यातु ।
[सुकृ]तेनानेन दिवं स्वयं च परमास्तु
27. गतिरनयोः ॥ 29
राजानकेन चास्मै लक्ष्मणचन्द्रेन वैद्यनाथाय ।
मण्डपिकोत्पत्तिधनाद्द[त्ताष्ष]ट्प्रत्यहं द्रम्माः ॥ 30
ग्रामात्प्रलम्ब-ना[म्नो]
28. मात्रा राजानकस्य लक्षणया ।
एक-हल-वाहनीया दत्ता भूमिर्महेशाय ॥ 31
लक्ष्मणस्य सुकृतं सुकृती य‿पालयिष्यति तदन्वय-धर्ता ।
तस्य पु-
29. ण्यमुपयातु विवृद्धि यो हरिष्यति स गच्छतु चाधः ॥ 32
तैलोत्पीडनयन्त्रं कीरग्रामे(ऽ*)स्ति मन्युकाहुकयोः ।
ताभ्यां तदपि शिवाय
30. प्रदीप-निष्पत्तये दत्तम् ॥ 33
एका च पण्यशाला ताभ्यां स्वीया शिवस्य भोगार्थम् ।
भूमिश्च हल-चतुष्टयं योग्या दत्ता नवग्रामात् ॥ 34
इति ये-
31. न येन यद्यत्सुकृतं विहितं शिवं समुद्दिश्य (।*)
इह तस्य तस्य तत्तत्तिष्ठतु यावद्धरित्रीयम् ॥ 35
यस्याविस्मृत-[ज]ननी-स्तन्य-समास्वादनस्य वदना-
32. ब्जे ।
परिशुद्ध-कवित्व-फला सरस्वती भगवती न्यवसत् ॥ 36
श्री-भृङ्गकस्य च सुत [× काश्म]ीर-नृप-प्रमातुरनघस्य (।*)
प्रथम-वयास्सर[लार्थां] व्यधत्त राम‿प्रशस्तिमिमा[म् ॥*] 37
33. चबेढ-क्षेत्रात्[10]हर......क्षेत्रात्[11] व वत्रण[दे]वाद[ग्र]-
भूमि [च्छ] ॥ ॥ गुहकेन [प्र]शस्तिरु[त्की[12]]र्णा ॥ ॥
शक-काल-गताब्दाः ११[13]२६ (॥*)

1. Prepared from the transcript in *Ep. Ind.*, I.
2. This is the symbol which stands for *siddham*, *Oṁ siddhiḥ* or *siddhir=astu*.
3. The reading *Gajāsyo* is not certain.
4. The reading *kurutāṁ* is doubtful.

5. The reading is due to Kielhorn.
6. Read *chint-āndhakam.*
7. Fleet read *prākāra.*
8. Read *praklipta°.*
9. Read *°py=uchchheshā.*
10. *Sandhi* is ignored, and the reading seems to be doubtful.
11. *Sandhi* is ignored.
12. This probable reading is suggested by Hultzsch. Bühler read *ya*(?) *śasi bhadī*(?) *nā.*
13. Bühler read 7[26]. See, however, *ASIAR*, 1905-06, pp. 19f., and Bhandarkar's List, No. 1084, note 4.

C—The Kings of Chanpakā

No. 41—Suṅgal Copper-plate Inscription of Vidagdha (11th Century A.D.)—Regnal year 4

Suṅgal, Chamba District, Himachal Pradesh.
J. Ph. Vogel, *ASI*, *An. Rep.*, 1902-03, pp. 251 ff.; *Antiquities of Chamba State*, Pt. I, pp. 166 ff.

Language : Sanskrit.

Script : Early Sāradā.

Metres : Vv. 1-2 अनुष्टुभ्; V. 3 इन्द्रवज्रा.

Summary : In the house of MOSHAṆA, belonging to the SOLAR RACE, was born king YUGĀKARAVARMADEVA. His son, by his wife BHOGAMATĪDEVĪ, was *Paramamāheśvara* VIDAGDHADEVA. The latter from his residence at CHAṆPAKĀ (Chambā) informed the *Rājan*, *Rājānaka*, *Rājaputra*, *Rājāmātya*, *Rājasthāniya*, *Pramātāra*, *Sarobhaṅga*, *Kumārāmātya*, *Uparika*, *Vishayapati*, *Nihelapati*, *Kshatrapa* (probably *Kshetrapa*), *Prāntapāla*, *Hastyaśvoshṭra-bala-vyāpṛitaka*, *Dūta*, *Gamāgamika*, *Abhitvaramāṇa*, *Khasa*, *Kulika*, *Śaulkika*, *Gaulmika*, *Khaṇḍaraksha*, *Tarapatika*, *Chhatrachchhāyika*, *Veṭakila*, *Vīrayātrika*, *Chauroddharaṇika*, *Dāṇḍika*, *Daṇḍavāsika*, *Bhogapati*, *Viniyuktaka*, *Bhāgika*, *Bhogika*, *Chāṭa*, *Bhaṭa* and others, from the Brāhmaṇas at the head of the eighteen kinds of subjects, down to the Medas, Andhrakas, Dhīvaras and Chaṇḍālas, that in the village of SUMAṄGALA belonging to the TĀVASAKA district, one *bhū* of land, called Serī, and half a *bhū* of land called Lavāla, were granted as an *agrahāra* to NANDUKA the son and grandson respectively of Devanna and Dedduka. The grant was made together with *ṭrina*, *goyūthī* (i.e. *go-yūti*), *gochara*, fruit trees, water of the water-courses and channels, with ingress and egress, with fallow lands and with the income derived from fines for *daś-āparādha*. The gift land was made uncurtailable, unopposed, free from the entry of the officers called *Chāṭa* and their subordinates called *Bhaṭa*, free from taxes

and inalienable.—The grant was made in the king's FOURTH REGNAL YEAR.

TEXT[1]

1. १ॅ स्वस्ति ॥ श्री-चण्पका-वासकात्परमभट्टारक - महाराजाधिराज-परमेश्वर-श्रीमद्युगाकरवर्मदेव-पादानुध्यात (:*) परमब्र-
2. ह्मण्यो निखिल-सच्छासनाभिप्रवृत्त-गुरुवृत्त-देवतानुवृत्त-समधिगत-शास्त्र-कुशलतया समाराधित-विद्वज्जन-
3. हृदयो नयानुगत-पौरुष-प्रयोगावाप्त-त्रिवर्ग-सिद्धिः संय (सम्य) गर्जिताभिकामिकगुण-सहिततया फलित इव
4. मार्ग-तरु(:*)। सर्व-सत्वाश्रयनी (णी) यो मोषनाम्ना (णान्व)-यादित्यवङ्शो (वंशो) द्भव-परममाहेश्वरो (रः) श्री-भोगमतीदेव्याः समुत्पन्न (:*) प-
5. रमभट्टारक-महाराजाधिराज-परमेश्वर-श्रीमद्विदग्धदेवः कुशली स्व-शास्यमान-गव्दिकहरण-संव (ब) द्ध-ताव-
6. सक-मण्डल-प्रतिव (ब) द्ध-सुमङ्गलग्रामे समुपागता (न्*) सर्वानेव राज-राजानक-राजपुत्र-राजामात्य-राजस्थानीय-
7. प्रमातृ - सरोभंग-कुमारामात्योपरिक-बिषयपति-निहेलपति-क्षत्रप-प्रान्त-पाल-हस्त्यश्वोष्ट्रव (ब) ल-व्यावृ (पृ) तक-दूत-ग-
8. मागमिकाभित्वरमाण-खष (श) - कुलिक-शौल्किक - गौल्मिक-खण्डरक्ष-तरपतिक-छत्रच्छायिक-वेटकिल-वीरयात्रिक-
9. चौरोद्धरणिक-दण्डिक-दण्डवासिक-भोगपति-विनियुक्तक- भागिक-भोगिक-चाट-भट-सेवकादीं (दीन्) सर्वानेव कीर्तिता-
10. कीर्तिता (न्*) राजपाद-प्रसादोपजीविनो (नः) कुटुम्वि (म्बि)-जनपदा-(दां)श्च ब्राह्मणोत्तरा (न्*) साष्टादशप्रकृत्याधिष्वा (ष्ठा) नीयो (यान्) मेदान्ध्रक-
11. धीवर- चण्डाल-पर्यन्ता (न्*) सर्व-स (सं) वासां (सान्) समाज्ञापयत्यस्तु वस्संविदितं यथोपरि-लिखित-सुमङ्गल-ग्रामे सेरी-ना-
12. म-भूरेका यस्यामाघाटान्यमी भवन्ति/पूर्व-दिग्भागे पाटलीयाग्रहारिक-भू-सीमा दक्षिण-दिग्भागे वृ (वृ) ह (द्*) वीडा- नाम-
13. सीमा पश्चिम-दिग्भागे खनिबग्गवीडा सीमा उत्तर-दिग्भागे प्राहबग्ग-नाम-सीमा एवं चतुराघाटोपेता उपरिस्थित-गृ-

14. हृ-शाक-वाटिका-समेता भूरेका (॥*) तथान्यास्मिन्नेव ग्रामे लवाल-
नामार्ध-भूमी/यस्यामाघाटानि भवन्ति । पूर्वदिग्भागे खड्डा । द-

15. क्षिण-दिग्भागे बहत्पाषाणं पश्चिम-दिग्भागे मज्वलिका(?)-नाम-
कुप्पटो(ट) उत्तर-दिग्भागे गोचर-पुष्करी-पथ-सीमा ॥ एवं चतुराघाट-
(टो)-

16. पेतं भूम्यर्धं(र्धम्) उपरिलिखितभूम्या सह सार्धा भूः (।*) स्व-सीमा-
तृण-गोयूथी-गोचर-पर्यन्ता स-वा(व)नस्पत्युदक-सीहार-कुल्लक-
पाणी(नी)य-

17. समेता सागम-निर्गम-प्रवेशा स-खिल-पोलाच्य(च्या) स-दशापराधा पुत्र-
पौत्राद्यन्वयोपभोग्या अनाच्छेद्या अ-परिपन्थ्या अ-चाट-भ-

18. ट-प्रवेशा अ-किंचित्करा अनाहारा आ-चन्द्रार्कार्णव-क्षिति-स्थिति-
समकालीना मया मातापित्रोरात्मरश्च पुण्य-हेतवे यशो(ऽ*)भिवृ-

19. द्धये / परलोकसंश्रेयो(ऽ*)र्थं सङ्सा(संसा)रार्णव-तारणार्थं च/
कुरुक्षेत्र-तीर्थाश्रम-विनिर्गत-व्रा(ब्रा)ह्मण-देवन्न-पौत्राय देद्दुक-पुत्राय श्री-
नन्दुका-

20. य काश्यप-गोत्राय व्र(ब्र)ह्मचारिणे त्रि-प्रवराय वाजि(ज)से(स)-
नेयाय पुण्ये(ऽ*)हन्युत्तरायण-सङ्क्रान्त्यामुदक-पूर्वक-प्रतिग्रहेणाग्रहारत्वे-

21. न प्रतिपादितं(तम्)/विदित्वास्मदीयाग्रहार-शासन-प्रामाण्या(द्*)यथेष्टं
भुंजतु भुंजापयतु[3] (।*) भुंजमानस्य प्रतिवासि-जनपदैः आ-

22. ज्ञा-श्रवण-विधेयैर्भूत्वा यथा-समुचित-भाग-भोग-कर-हिरण्यादि-सर्व-राज-
भाव्य-प्रत्यायमस्योपदेयं(यम्)/अस्य चास्मदीय-चा-

23. ट-भटान्यतरादिना गृहावतरण-हरित-पक्व- सस्येक्षु-चारण-लवण(नो)-
पमर्दन-रोचिक-चिटोला-ग्रहण-गोक्षीर-ग्रहण-पीठक-पीठि-

24. का-खट्वापहरण-काष्ठेन्धन-घास-वुसादिकं न केनचित्प्रग्राह्यं(ह्यम् ।)
स्वल्पमपि पीडोपद्रवं न कर्त्तव्यं(व्यम्)/एतदाशृ(श्रि)त-हालिक-गोपाल-

25. दासी-दासादि-समस्त-जन-समेतस्य च/अतो(ऽ*)न्यथा शासनातिक्रमे
धर्महानि-निग्रहो(हः)स्यात्/आगन्तु-राजभिरस्मद्वङ्शे(द्वंश)जैश्च

26. सामान्यं भू-दान-फलमवेक्ष्यायं व्र(ब्र)ह्मदायो(ऽ*)नुमन्तव्यः परिषा-
(पा)लनीयश्च/उक्तं भगवता वेदव्यासेन/
व(ब)हुभिर्वसुधा भुक्ता राजभि-

27. स्सगरादिभिः (।*)
यस्य यस्य यदा भूमि(स्*)तस्य तस्य तदा फलं(लम्) ।(।*) 1
सुवर्णमेक(कं) गौरे(गामे)कां भूमि(मे)रप्येकमङ्गुलं(लम्) (।*)
हरे(र)न्नरकमाप्नोति यावश्च(च्च)-
28. न्द्र-दिवाकरौ ।(।*) 2

दत्तानि दानानि पुरा नरेन्द्रै-
र्यांण्य(न्य)त्र धर्मार्थयशस्कराणि ।
निर्माल्यवन्तत्[1] प्रतिमाणि(नि) तानि
को णा(ना)म साधु पुनरादधीतः(दीत) ॥ 3
29. प्रवर्धमाण(न)-कल्याण-विजय-राज्य-संवत्सरे चतुर्थे संवत् ४ माघ-शु-
ति[5]-प्रतिपद(दि) ॥ दूतो(ऽ*)त्र श्री-[4]
आदित्यवर्धन(:*) ॥ लिखित(तं) मया सुखराजेन ॥
श्रीमद्विदग्धदेव-स्वहस्त(:*) ॥ श्रीमद्विदग्धदेव(:*) ॥

1. From the facsimile in *ASI*, *An. Rep.*, 1902-03.
2. *Veṭakīla* may be intended.
3. Read *bhojayatu.*
4. Read *vanti.*
5. *Ti=tithi.*
4. *Sandhi* has been ignored here.

D—The Śāhis

No. 42—Dewai Stone Inscription of Bhīma (C. 9th Century A.D.)

Dewai, Gadun territory, Pakistan

D. R. Sahni, *Ep. Ind.*, XXI, p. 299.

Language : Sanskrit.

Script : Early Sāradā.

Summary : Mentions *Paramabhaṭṭāraka Mahārājādhirāja Paramesvara* Śāhi Śrī-BHĪMADEVA, son of the illustrious KA(KU ?)-LAKA[MA]LAVARMAN.

TEXT[1]

1. [श्री[2]]-कल[क][म]ल[3]वर्मो[4]द्भव-
2. [ग*]दाहस्त-परमभटा(ट्टा)र-
3. क-म[हा]राजाधिराज-पर-
4. [मे]श्वर-शाहि[5]-श्री-[भी]म[देवः*][6] (॥*)

1. From the facsimile in *Ep. Ind.*, XXI.
2. The *i*-sign is different from those in l. 4.
3. The expression may be *Kulakamalavarm-odbhava*.
4. The intended reading is probably not *vaṁś-o*°.
5. Sahni reads *Sāhi*; but the first consonant is possibly *śa* as the upper side of the letter is not open as in *sa*.
6. Only traces of *da* remain.

No. 43—Barīkoṭ Stone Inscription of Jayapāla (C. 965-1001 A.D.)

Barīkoṭ in the Upper Swat Valley, Pakistan.
D.R. Sahni, *Ep. Ind.*, XXI, p. 301.

Language : Sanskrit.

Script : Early Sāradā.

Summary : When *Paramabhaṭṭāraka Mahārājādhirāja Parameśvara* Śrī-Jayapāla was reigning three persons founded something at Vajīrasthāna (modern Waziristān).

TEXT[1]

1. श्रों स्वस्ति १००[2] परमभट्टारक-महाराजाधिराज-पर-
2. मेश्वर-श्री-जयपालदेव-राज्ये श्री-वजीरस्थाने[3]
3. भट्टपुत्र-श्री-पोष्यमित्र-देवकुलप्रभ-प्रार्थिते......
4. ....
5. ....एभिस्त्रिभि[:*]......
6. ....कर्म-
7. ....प्रभव उद-
8. कर्म............प्रतिष्ठा
9. तस्य.........रथ प्रतिष्ठित......क......रापित:
10. एभिस्त्रिभि [:*]...............
11. ....

1. From the facsimile in *Ep. Ind.*, XXI. The inscription is fragmentary.
2. The year seems to belong to an era started from the foundation of the Brāhmaṇa Śāhi dynasty by Lalliya-Kallār whose reign is assigned roughly to 850-70 A.D.
3. I.e. in Waziristān.

Chapter V

NEPAL

A—The Ṭhākurīs

No. 44—Inscription on Some Copper Coins of Aṁśuvarman (1st half of the 7th century A.D.)

D.C. Sircar, *Stud. Ind. Coins,* p. 383; plate XVI/2.

First Side

Winged horse to left; border of thick dots; legend above—

श्र्यंशुवर्मा

Second Side

Cow to left; border of thick dots; legend above—

कामदेही

B—The Later Lichchhavis

No. 45—Kāṭhmaṇḍū Inscription of Jayadeva II Parachakrakāma, year 159 (C. 737-38 A.D.)

Bhagwanlal Indraji and Bühler, *Ind. Ant.*, IX, pp. 178 ff. (No. XV) ; R. Gnoli, *Nepalese Insrciptions in Gupta Characters*, Part I, pp. 115 ff. (No. LXXXI). D. Vajracharya, *Lichchhavikālkā Abhilekh*, pp. 548ff. (No. 148).

Language : Sanskrit.

Script : Siddhamātṛikā.

Metres : Verses 1, 3, 5, 19-20, 22-23, 30, 32 स्रग्धरा; Verses 2, 4, 6-7, 12-15, 17, 21, 25-29, 33-34 शार्दूलविक्रीडित; Verses 8, 11, 16 वसन्ततिलक; Verses 9, 24, 31 उपजाति (इन्द्रवज्रा+उपेन्द्रवज्रा); Verses 10, 18 अनुष्टुभ् (श्लोक).

Summary : In the IKSHVĀKU lineage, after EIGHT kings from DAŚARATHA, was born the illustrious LICHCHHAVI. After several successors of Lichchhavi had passed away, there came Supushpa born at PUSHPAPURA (Pāṭaliputra). He was followed by twenty-three kings in succession, and there was another king named JAYADEVA. After him eleven kings passed away and then came VṚISHADEVA, a follower of the SUGATA (Buddha). From him was born ŚAṄKARADEVA, from whom DHARMADEVA sprang. After him came his son, king MĀNADEVA, and thereafter his son MAHĪDEVA became king. From him descended VASANTADEVA. Afterwards came thirteen rulers, sprung from his son, king UDAYADEVA, and then NARENDRADEVA flourished; next ŚIVADEVA became king. His queen VATSADEVĪ was the daughter of BHOGAVARMAN of the Maukhari race and the granddaughter of ĀDITYASENA, the lord of Magadha. Their son JAYADEVA married RĀJYAMATĪ, who was born in BHAGADATTA's FAMILY and was the daughter of ŚRĪ-HARSHADEVA, lord of GAUḌA, OḌRA, KALIṄGA, KOŚALA and other lands. — The queen mother VATSADEVĪ dedicated a precious SILVER LOTUS together with ordinary lotuses in favour of Hara's *liṅga*.—The eulogy with the exception of five verses, which the KING himself composed, was written by

BUDDHAKĪRTI. — The record was issued on the 9th day of the BRIGHT HALF of KĀRTTIKA in SAṀVAT 159. The Nepalese era, to which the date should be referred, seems to have started from Śaka 500, made year 1, with the omission of hundreds, by Aṁśuvarman, i.e. from 578 A.D., so that year 159 would correspond to c. 737-38 A.D.

TEXT[1]

1. १ॅ व्यक्षस्त्र्यध्यध्ययात्मा त्रिसमय-सदृशस्त्रिप्रतीतस्त्रिलोकी-
त्राता त्रेतादि-हेतुस्त्रिगुणमयतया त्र्यादिभिर्व्वर्ण्णितो(ऽ*)लं(लम्) ।
त्रिस्रोतो-धौत-मूर्द्धा त्रिपुरजिदजितो निर्व्विबन्ध-त्रिवर्ग्गो
य[स्योत्तुङ्ग]-
2. स्त्रिशूलस्त्रिदशपति-नुत[स्तादरि]-त्रोटनो नः ॥ 1
राजद्रावण-मूर्ध-पङ्क्ति-शिखर-व्यासक्त-चूडामणि-
श्रेणी-सङ्गति-निश्चलात्मकतया लङ्काम्पुनानाः पुरीं(रीम्) ।
— —द्व[न्व्यपराक्रमा]UU
3. U— — —U —सङ्गताः
श्री-बाणासुर-शेखराः पशुपतेः पादाणवः पान्तु वः ॥ 2
सूर्याद्ब्रह्मप्रपौत्रान्मनुरथ भगवाञ्जन्म लेभे ततो(ऽ*)भू-
दिक्ष्वाकुश्चक्रव[र्त्ती] नृपतिरपि ततः श्री-विकुक्षि[र्ब्बभूव] ।
4. जातस्तस्मात्ककुत्स्थः पृथुरिति विदितो भूमिपः सार्व्वभौमो
भूतो(ऽ*)स्माद्विश्वगश्वः प्रबल-निजबल-व्याप्त-विश्वान्तरालः।(।*) 3
राजाष्टोत्तरविङश(विंश)ति-क्षितिभुजस्तस्माद्व्यतीत्य क्रमा-
त्सम्भूतः सगरः पतिः U
5. UU— —[साग]रायाः क्षितेः ।
जातो(ऽ*)स्मादसमञ्जसो नरपतिस्तस्मादभूदङ्शु(दंशु)मा-
न्स श्रीमन्तमजीजनन्नरवरो भूपन्दिलीपाह्वयं(यम्) ।(।*) 4
भेजे जन्म ततो भगीरथ इति ख्यातो नृपो(ऽ*)त्रान्तरे
भूपालाUU—U
6. —UU[रघुर्जातो] रघोरप्यजः (।*)
श्रीमत्तुङ्गरथस्ततो दशरथः पुत्रैश्च पौत्रैस्समं
राज्ञो(ऽ*)ष्टावपरान्विहाय परतः श्रीमानभूल्लिच्छविः ॥ 5
अस्त्येव क्षितिमण्डलैक-तिलको लोक-प्रतीतो महा-
ना[दित्य]-

7. [प्रभवः] प्रभाव-महताम्मान्यः सुराणामपि ।
स्वच्छं लिच्छवि-नाम बिभ्रदपरो वङ्शः(वंशः) प्रवृत्तोदयः
श्रीमच्चन्द्र-कला-कलाप-धवलो गङ्गा-प्रवाहोपमः ॥ 6
तस्माल्लिच्छवितः परेण नृपतीन्हित्वा प-
8. [रान्द्वाद]श
श्रीमान्पुष्पशराकृतिः क्षितिपतिर्ज्जातः सुपुष्पस्ततः ।
सार्धं भूपतिभिस्त्रिभिः क्षितिभृतां त्यक्त्वान्तरे विङ्श(विंश)ति
ख्यातः श्री-जयदेव-नाम-नृपतिः प्रादुर्ब्बभूवापरः ॥ 7
एकादशक्षिति-
9. पतीनपरञ्च भूपं
[हि]त्वान्तरे विजयिनो जयदेव-नाम्नः ।
श्रीमान्बभूव वृषदेव इति प्रतीतो
राजोत्तमः सुगत-शासन-पक्षपाती ॥ 8
अभूत्ततः शंङ्करदेव-नामा
श्री-धर्मदेवो(ऽ*)प्युदपादि तस्मात् ।
10. श्री-मानदेवो नृपतिस्ततो (ऽ*)भू-
त्ततो महीदेव इति प्रसिद्धः ॥ 9
वसन्त इव लोकस्य कान्तः शान्तारि-विग्रहः ।
आसीद्वसन्तदेवो(ऽ*)स्मादान्त-सामन्त-वन्दितः ॥ 10
अस्यान्तरे(ऽ*)प्युदयदेव इति क्षितीशा-
ज्जातस्त्रयो-
11. दश [इत]श्च नरेन्द्रदेवः ।
मानोन्नतो नत-समस्त-नरेन्द्र-मौलि-
माला-रजो-निकर-पांशुल-पादपीठः ॥ 11
दाता सद्द्रविणस्य भूरि-विभवो जेता द्विषत्संहतेः
कर्त्ता बान्धव-तोषणस्य
12. [विधि]वत्पाता प्रजानामलं(लम्) ।
हर्त्ता संश्रित-साधु-वर्ग्ग-विपदां सत्यस्य वक्ता ततो
जातः श्री-शिवदेव इत्यभिमतो लोकस्य भर्त्ता भुवः ॥ 12
देवी बाहुबलाढ्य-मौखरि-कुल-श्री-वर्म्म-
13. चूडामणि-
ख्याति-ह्रेपित-वैरि-भूपति-गण-श्री-भोगवर्म्मोद्भवा ।

दौहित्री मगधाधिपस्य महतः श्र्यादित्यसेनस्य या
व्यूढा श्रीरिव तेन सा क्षितिभुजा श्री-वत्सदेव्यादरात् ॥ 13

14. तस्माद्भूमिभुजो (ऽ*)भ्यजायत जितारातेरजय्यः परं
राजा श्रीजयदेव इत्यवगतः श्री-वत्सदेव्यात्मजः ।
त्यागी मान-धनो विशाल-नयनः सौजन्य-रत्नाकरो
विद्वा[न्स त्कवि]राश्रयो

15. गुणवतां पीनोरु-वक्षःस्थलः ॥ 14
माद्यद्दन्ति-समूह-दन्त-मुसल-क्षुण्णारि-भूभृच्छिरो-
गौडोड्रादि-कलिङ्ग-कोसलपति-श्रीहर्षदेवात्मजा ।
देवी राज्यमती कुलोचित-गुणैर्युक्ता प्रभूता

16. कुलै-
र्येनोढा भगदत्तराज-कुलजा लक्ष्मीरिव क्ष्माभुजा ॥ 15
अङ्ग-श्रिया परिगतो जित-कामरूपः
काञ्चीगुणाढ्य-वनिताभिरुपास्यमानः (।*)
कुर्व्वन्सुराष्ट्र-परिपालन-कार्य-चिन्तां
यः सार्व्व-

17. भौम-चरितं प्रकटीकरोति ॥ 16
राज्यं प्राज्य-सुखोर्ज्जित-द्विज-जन-प्रत्यर्प्पिताज्याहुति-
ज्योतिर्ज्जात-शिखा-विजृम्भण-जिताशेष-प्रजापद्रजं (जम्) ।
बिभ्रत्कण्टक-वर्ज्जितन्निज-भुजावष्टम्भ-विस्फूर्ज्जितं

18. शूरत्वात्परचक्रकाम इति यो नाम्ना परेणान्वितः ॥ 17
स श्रीमाञ्जयदेवाख्यो विशुद्ध-बृहदन्वयः ।
लब्ध-प्रतापः सम्प्राप्त-बहु-पुण्य-समन्वयः ॥ 18
मूर्त्तीरष्टाभिरष्टौ महयितुमतुलैः

19. स्वैर्द्दलैरष्टमूर्त्तेः
पातालादुत्थितं किं कमलमभिनवं पद्मनाभस्य नाभेः ।
देवस्यास्यासनायोपगतमिह चतुर्व्वक्त्र-सादृश्य-मोहा-
द्विस्तीर्ण्णं विष्टरं किं प्रविकसित-सिताम्भोजमम्भोज-

20. योनेः ॥ 19
कीर्ण्णा किम्भूतिरेखा सपदि पशुपतेर्न्नृत्यतो (ऽ*)त्र प्रकामं
मौलीन्दोः किम्मयूखाः शरदमभिनवां प्राप्य शोभामुपेताः ।
भक्त्या कैलास-शैलाद्धिमनिचय-रुचः सानवः किं

21. समेता
दुग्धाब्धेरागतः किं गलगर-सहज-प्रीति-पीयूष-राशिः ॥ 20
देवं वन्दितुमुद्यतो राज्ञः द्युतिमतो विद्योतमान-द्युतिः
किं ज्योत्स्ना-धवला फणावलिरियं शेषस्य सन्दृश्यते ।

22. अन्तर्दूर-रसातलाश्रित-गतेर्द्देव-प्रभाव-श्रिया
किं क्षीर-स्नपनं विधातुमुदिताः क्षीरार्ण्णवस्योर्म्मयः ॥ 21
विष्णोः पाताल-मूले फणिपति-शयनाक्रान्ति-लीला-सुखस्था-
दाज्ञां प्राप्योत्प-

23. तन्त्यास्त्रिपुर-विजयिनो भक्तितो(ऽ*)भ्यर्च्चनाय ।
लक्ष्म्याः संलक्ष्यते प्राक्करतल-कलितोत्फुल्ल-लीला-सरोजं
किं वेतीत्थं वितर्क्कास्पदमतिरुचिरं मुग्ध-सिद्धाङ्गनानां(नाम्) ॥ 22
नाली-नालीकमेतन्न खलु समुदितो राजतो

24. राजतो(ऽ*)हं
पद्मा-पद्मासनाब्जे कथमनुहरतो मानवा मा नवाभे ।
पृथ्व्यां पृथ्व्यान्न मादृग्भवति हृतजगन्मानसे मानसे वा
भास्वान्भास्वान्विशेषं जनयति न हि मे वासरो वा सरो वा ॥ 23
इतीव

25. चामीकर-केसराली-सिन्दूर-रक्त-द्युति-दन्त-पङ्क्त्या
राजीव-राजीम्प्रति जीव-लोके सौन्दर्य-दर्प्पादिव स-प्रहासं(सम्) ॥ 24
एषा भाति कुलाचलैः परिवृता प्रालेयसंसर्ग्गिभि-
र्व्वेदी मेरुशिलेव काञ्चनमयी देव-

26. स्य विश्राम-भूः ।
शुभ्रैः प्रान्त-विकासि-पङ्कज-दलैरित्याकलय्य स्वयं
रौप्यं पद्ममचीकरत्पशुपतेः पूजार्थमत्युज्ज्वलम् ॥ 25
राज्ञः ॥
यं स्तौति प्रकट-प्रभाव-महिमा ब्रह्मा चर्तुभिर्म्मुखै-
र्यञ्च श्लाघ-

27. यति प्रणम्य चरणे षड्भिर्म्मुखैः षण्मुखः ।
यन्तुष्टाव दशाननो(ऽ*)पि दशभिर्व्वक्त्रैः स्फुरत्कन्धरः
सेवां यस्य करोति वासुकिरलं जिह्वा-सहस्रैः स्तुवन् ॥ 26
ख्यात्या यः परमेश्वरो(ऽ*)पि वहते वासो

28. दिशाम्मण्डलं
व्यापी सूक्ष्मतरश्च शङ्करतया ज्ञातो(ऽ*)पि संहारकः ।
एको(ऽ*)प्यष्ट-तनुः सुरासुर-गुरुर्व्वीतत्रपो नृत्यति
स्थाणुः पूज्यतमो विराजति गुणैरेवं विरुद्धैरपि ॥ 27
राज्ञः ॥
तस्येदं प्रमथा-
29. धिपस्य विपुलं ब्रह्माब्ज-तुल्यं शुभं
राजद्राजत-पङ्कजं प्रविततं प्रान्त-प्रकीर्ण्णर्द्दलैः ।
पूजार्थम्प्रविधाप्य तत्पशुपतेर्यत्प्रापि पुण्यम्मया
भक्त्या तत्प्रतिपाद्य मातरि पुनः संप्राप्नुयां निर्वृ ति(तिम्) ॥ 28
30. राज्ञः ॥
किं शम्भोरुपरि स्थितं स-सलिलं मन्दाकिनी-पङ्कजं
सर्ग्गोद्भिन्न-नवांबुजेक्षण-धिया सम्प्राप्तमम्भोरुहं(हम्) ।
देवानां किमियं शुभा सुकृतिनां रम्या विमानावली
पद्मं किं करुणाकरस्य करतो
31. लोकेश्वरस्यागतं(तम्) ॥ 29
राज्ञः ॥
स्रोतः स्वर्ग्गापगायाः किमिदमवतरल्लोल-कल्लोल-रम्यं
किं ब्रह्मोत्पत्ति-पद्मं तल-कमल-वर-प्रेक्षणायोपयातं(तम्) ।
संप्राप्तञ्चन्द्रमौलेरमल-निज-शिरश्चन्द्रबिम्बं किमत्रे-
त्येवं
32. यद्वीक्ष्य शङ्कां वहति भुवि जनो विस्मयोत्फुल्ल-नेत्रः ॥ 30
श्री-वत्सदेव्या नृपतेर्ज्जनन्या
समं समन्तात्परिवार-पद्मैः ।
रौप्यं हरस्योपरि पुण्डरीकं
तदादरैः कारितमत्युदारं(रम्) ॥ 31
पुण्यं पुत्रेण दत्तं शशिकर-विमलं
33. कारयित्वाब्ज-मुख्यं
प्राप्तं शुभ्रं शुभञ्च स्वयमपि रजतैः पद्म-पूजां विधाय ।
सर्व्वं श्री-वत्सदेवी निजकुल-धवलाञ्चित्त-वृत्तिन्दधाना
प्रादात्कल्याण-हेतोश्चिरमवनिभुजे स्वामिने स्वर्गताय ॥ 32
कः कुर्या-

34. त्कुलजः पुमान्निज-गुण-श्लाघामिति ह्रीच्छया
राज्ञा सत्कविनापि नो विरचितं काव्यं स्ववङ्शा(वंशा)श्रयं(यम्) ।
श्लोकान्पञ्च विहाय साधु-रचितान्प्राज्ञेन राज्ञा स्वयं
स्नेहाद्भूभुजि वु(बु)द्धकीर्त्तिरकरोत्पूर्व्वामपूर्व्वामिमां(माम्) ॥ 33
योगक्षेम-विधान-बन्धुर-
35. भुजस्संवर्द्धयन्वा(न्बा)न्धवा-
न्स्निह्यत्पुत्र-कलत्र-भृत्य-सहितो लब्ध-प्रतापो नृपः ।
दीर्घायुर्न्नितरान्निरामय-वपुर्न्नित्य-प्रमोदान्वितः
पृथ्वीम्पालयतु प्रकाम-विभव-स्फीतानुरक्त-प्रजाम् ॥ 34
संवत् १००(+*)५०(+*)६[2] कार्त्तिक-शुक्ल-नवम्याम् ॥

1. From the facsimile in Gnoli's work. *B* has sometimes been indicated by the sign for *v*.

2. Bhagwanlal reads the date as year 153 and Vajracharya as 157.

BOOK III

THE DECCAN AND ITS NEIGHBOURHOOD

(From the Sixth to the Seventeenth Century A.D.)

Chapter I

The Chālukyas of Bādāmi

No. 1 Aihole Stone Inscription of Pulakeśin II, Kali 3735 and Śaka 556 (634 A.D.)

Aihole, Hungund Tāluk, Bijapur District, Karnataka. Fleet, *Ind. Ant.*, V, pp. 67ff.; VIII, pp. 237ff.; *Arch. Surv. W. Ind.*, II, pp. 129ff.; Kielhorn. *Ep. Ind*, VI, pp. 4ff.

Language : Sanskrit.

Script : Early Telugu-Kannaḍa.

Metres: Vv. 1-4 आर्या; V. 5 शार्दूलविक्रीडित; V. 6 उपजाति; V. 7 आर्या; V. 8 रथोद्धता; V. 9 औपच्छन्दसिक; V. 10 द्रुतविलम्बित V. 11 वसन्ततिलक; V. 12 मालिनी; V. 13 वंशस्थ; V. 14 वसन्ततिलक; V. 15 मालिनी; V. 16 स्रग्धरा; V. 17 मन्दाक्रान्ता; V. 18 मत्तेभविक्रीडित; V. 19 इन्द्रवज्रा; V. 20 श्लोक (अनुष्टुभ्); V. 21 हरिणी; V. 22 श्लोक (अनुष्टुभ्); V. 23-25 मालिनी; V. 26 औपच्छन्दसिक; V. 27 श्लोक (अनुष्टुभ्); V. 28 वसन्ततिलक; V. 29 शार्दूलविक्रीडित; V. 30 प्रहर्षिणी; V. 31 श्लोक (अनुष्टुभ्); V. 32 शार्दूलविक्रीडित; Vv. 33-34 श्लोक (अनुष्टुभ्); V. 35 वसन्ततिलक; V. 36 श्लोक (अनुष्टुभ्); V. 37 आर्यागीति.

Summary : In the CHALUKYA family was born JAYASIṀHA-VALLABHA. To him was born RAṆARĀGA. His son PULAKEŚIN (I) established himself at Vātāpipurī and performed the HORSE-SACRIFICE. His son KĪRTIVARMAN, the night of death to the NALAS, MAURYAS and KADAMBAS, broke up the confederacy of the KADAMBAS. His younger brother MAṄGALEŚA who had succeeded him, vanquished the MATAṄGAS and the KAḶACHCHHURIS (Kalachuris) and captured the island of REVATĪ-DVĪPA (Reddi promontory). When Maṅgaleśa was attempting to secure the sovereignty for his own son, his elder brother's son PULAKEŚIN (II) *alias* SATYĀŚRAYA killed his uncle. During the CIVIL WAR

between Maṅgaleśa and Pulakeśin II, the whole world was enveloped in the darkness that was the enemies, and the Chalukya empire collapsed. GOVINDA and ĀPPĀYIKA attacked Pulakeśin II and advanced as far as the northern bank of the BHĪMArathī. The Chalukya king succeeded in winning over Govinda and in driving out Āppāyika. Next he conquered VANAVĀSĪ on the VARADĀ and also the GAṄGA and ĀLŪPA kings. The Chalukya army ejected the MAURYAS from the KOṄKAṆA and beseiged their capital city (PURĪ) which was the goddess of fortune of the Western Ocean. The Chalukya king then subdued the LĀṬAS, MĀLAVAS and GŪRJARAS in South Gujarat, and caused the joy of HARSHA (Harshavardhana of Thanesar and Kanauj) to have melted away through fear. By his conquests, Pulakeśin acquired the sovereignty of the THREE MAHĀRASHṬRAKAS which contained ninety-nine thousand villages. The KALIṄGAS and KOSALAS manifested signs of fear at the appearance of his army. He reduced the fortress of PISHṬAPURA and another fort in the KUṆĀLA waters (Kollair Lake). He also caused the PALLAVA king, who aimed at the eminence of his own power, to hide his prowess behind the ramparts of the city of KĀÑCHĪPURA. Pulakeśin then made friendship with the CHOLAS, KERALAS and PĀṆḌYAS. After the *digvijaya*, Pulakeśin returned to VĀTĀPINAGARĪ which was his capital.—3735 YEARS having elapsed since the BHĀRATA WAR in the Kali age, 556 years of the ŚAKA KINGS having also elapsed (i.e. in 634-35 A.D.), a stone temple of the JINENDRA was constructed by RAVIKĪRTI who composed the *praśasti* and whose poetical genius was equal to that of KĀLIDĀSA and BHĀRAVI.

TEXT[1]

1. जयति भगवान्जिनेन्द्रो[2] [वी[त-ज[रा]-[म]रण-जन्मनो यस्य (।*)
ज्ञान-समुद्रा[3]न्तर्ग्गं[त]मखिलञ्जगदन्तरीपमिव । (।*) 1
3. पः ॥ तथा राजगृहांतर्व्वर्त्ति-मकर-तोरणे । मं[ड]-
4. [ल]सिद्धि-विनायक-मंडि[त]-यक्ष-द्वारे । प्रधा[न]-
5. राजविलासिनी-पाटक-सन्निहित-कामदेवा[य]-
6. तन-पुरोभागे । कलि-काले(ऽ*)पि सकल-लोक-प्र-
7. त्यक्ष-दिव्य-शक्तेर्भगवतः श्री-कालप्रियस्य प्राङ्गणे ।
8. [प्र]तीते च सर्व्वलोकाश्रय-मंडपे । इति पंचसु [स्था]-
9. नेषु ग्रीष्म-संताप-निरसन-क्षमाः धर्म्म-नरपति-
10. विलासकायमान-महिम-स्पृशः प्रपाः । त-
11. था मंडलसिद्धि-प्रांगणे सर्वलोकाश्रय-मंडपे ।
12. कालप्रिय-समीप-प्रदेश-द्वये । जगत्तुंग-समु[द्र]-
13. स्य [पा]ली-प्रतिष्ठिता(त)-सगवे(वें)श्वर-पुरोभागे । उदीच्य-
14. दिग्वर्त्ति-वं(बं)केश्वर-समीपे । इति पंचसु स्थानेषु प्रल-
15. य-महाप्लवायमान-हेमंव(त)-काल-प्रालेय-विलसि[ते]-
16. [ष्व]नाथ-जन-परिरक्षणार्थमग्नि-स्थितिका(:*) । तथा
17. [गू]र्ज्जरापण-वीरनारायण-श्रीकृष्णेश्वर-क्षेत्र[पा]-
18. ल-क्षुण्ण-हट्टिकासु[15] पंचसु स्थानेषु गवां सच्छंद-पा-
19. नाहार-निमित्तं ज[ल]-द्रोण्यो गोग्रासाश्च तत्प्रतिकर-
20. णाय[16] प्रतिदिनं द्रम्माः पञ्चाशत् द्र ५० तथा वं(बं)के-
21. श्वर-च्छल्लेश्वर-गोज्जिगसोमनाथ-तुम्वे(म्बे)श्वर-तुडिगेश्वरे-
22. [षु] पंचायतनेषु पंचोपचार-सहितं पञ्चामृत-[स्नानो]-
23. [प]योगि-दधि-दुग्ध-कुसुमार्चन-निमित्तं मासा[नुमासं]
24. [च] द्रम्माणां पञ्चशतानि द्र ५०० खंडस्यैका[ढकं]
25. पलानि पञ्च-पञ्चाशत् प ५५ श्रीखण्डस्य-पलानि [चतु]-
26. [रधिकानि] शतान्येकादश ११०४ प्रतिदिनं
27. ....

1. From impressions.
2. Expressed symbolically.
3. Read °*kas=trai*°.
4. The other texts have °*āvatāram=akarot.*
5. The Deoli text has *Sātyaki-vargga-bhājas*°.
6. This half of the stanza is found in the other grants as *Tasmād=arāti-vanitā-kucha-chāru-hāra-nīhāra-bhānur=udagād=iha Dantidurggaḥ.*
7. The reading of the lost letters can be restored from the other grants as °*lāsa-śaila-nichit=eva chiraṁ vibhāti.*

8. The original may have been *chatushkālaṁ.*

9. The word lost here may have been *lakshmī.*

10. The verb *adhyās* has been used here in the sense of 'to preside over, influence, rule', so that *Godāvarī-taṭ-ādhyāsin* would mean 'dominating over the Godāvarī valley', or 'predominant in the Godāvarī valley'.

11. The *daṇḍa* is unnecessary.

12. The lost *akshara* at the end of the line may have been *grā.*

13. The word is obviously *khaṇḍikā.*

14. These two letters appear to stand for a word like *kṛitaṁ.*

15. The word *iti* seems to be understood here.

16. The word *pratikaraṇa* means 'repaying', 'compensation', etc. But here it has been used in the sense of 'meeting the expense'.

CHAPTER III

The Eastern Chālukyas of Veṅgī

No. 9—Yelivarru Copper-plate Inscription of Amma II Vijayāditya (945-70 A.D.)[1]

Yelivarru, Repalle Tāluk, Guṇṭūr District, Andhra Pradesh.
J. F. Fleet, *Ind. Ant.*, XII, 1883, pp. 91ff.

Language : Sanskrit.

Script : Telugu-Kannaḍa.

Metres : V.1 *Āryā*; Vv.2-3 *Āryāgiti*; Vv.4-6 *Indravajrā*: V.7 *Anushṭubh* (*Śloka*); V.8 *Upendravajrā*; Vv.9-10 *Gīti*; Vv. 11-13 *Āryā*; V.14 *Upendravajrā*; Vv.15-16 *Anushṭubh* (*Śloka*).

Summary : KUBJA VISHṆUVARDHANA, brother of SATYĀŚRAYA VALLABHENDRA (Pulakeśin II) of the CHĀLUKYA family, ruled over VEṄGĪ for 18 years. His son JAYASIṀHA (I) ruled for 33 years; his son MĀṄGI-YUVARĀJA for 25 years; his son JAYASIṀHA II for 13 years; his younger brother KOKKILI for 6 months. Kokkili was expelled by his elder brother VISHṆUVARDHANA who ruled for 37 years. His son VIJAYĀDITYA-BHAṬṬĀRAKA ruled for 18 years; his son VIJAYĀDITYA-NARENDRAMṚIGARĀJA for 48 years; his son KALI-VISHṆUVARDHANA for 1½ years; his son GUṆAGA-VIJAYĀDITYA for 44 years; his successor BHĪMA, the son of his younger brother VIKRAMĀDITYA, for 30 years; his son KOLLABHIGAṆḌA-VIJAYĀDITYA, for 6 months; his son AMMA (I) for 7 years; having expelled his son, the child VIJAYĀDITYA, TĀLAPA ruled for one month; having subdued him, VIKRAMĀDITYA, son of BHĪMA, ruled for 11 months; then YUDDHAMALLA, son of Tālapa, ruled for 7 years; then BHĪMA, the son of Kollabhigaṇḍa-Vijayāditya, reigned for 12 years. His son, by his wife LOKAMAHĀDEVĪ, was AMMA II VIJAYĀDITYA. —Amma II addressed the *Kuṭumbins*, headed by the *Rāshṭrakūṭas*, who inhabited the district of VELANĀṆḌU, and informed them of

the grant of the village of ELAVAṞṞU, with the relinquishment of all taxes, to the SUVARṆA-BHĀṆḌĀGĀRA-ŚRĪKARAṆA-MUKHYA (head clerk of the treasury) KORAMIYA.—The *ājñapti* of the grant was KAṬAKARĀJA, the composer POTANA-BHAṬṬA and the writer JONTĀCHĀRYA.

TEXT[2]

SEAL

श्री-त्रिभुवनांकुश (।।*)

First Plate

1. स्वस्ति (।।*) श्रीमतां सकल-भुवन-स (सं) स्तूयमान-मानव्यासगोत्राणां[3] हा-
2. रीति-पुत्राणां कौशिकी-वर-प्रसाद-लब्ध-राज्यानां मातृगण-परिपालि-
3. तानां स्वा (मि*)-महासेन-पादानुध्यातानां भगवन्नारायण-प्रस (सा) द-
4. समासादित-वर-वराह-ला (ञ्छ*) नेक्षण-क्षण-वशीकृता[रा][4]ति-म-
5. ण्डलानां[5]मश्वमेधावभृत[6]-स्नान-पवित्रीकृत-वपुषां चा-[7]
6. लुक्यानां कुलमलंकरिष्णोः सत्याश्रय-वल्लभेन्द्रस्य भ्राता कु-
7. ब्ज-विष्णुवर्द्धनो (ऽ*) ष्टादश-वर्षाणि वेंगीदेशमपालयत् ।। तदात्म-

Second Plate : First Side

8. जो जयसिंहस्त्रयस्त्रिंशतं । तदनुजेन्द्रराज-नन्दनो विष्णुव-
9. र्द्धनो नव । तत्सूनुम्मंगि-युवराजः पंच-विंशतिं । तत्पुत्रो
10. जयसिंहस्त्रयोदश । तदवरजः कोक्किलिः षण्मा-
11. षा (सा) न् । तस्य ज्येष्ठो भ्राता विष्णुवर्द्धनस्तमुच्चाट्य सप्त-
12. त्रिंशतं । तत्पुत्रो विजयादित्य-भट्टारको (ऽ*) ष्टादश । तत्सु-
13. तो विष्णुवर्द्धनः[8] षट्त्रिंशतं । तत्सुतो विजयादित्य-नरेन्द्रमृग-
14. राजश्चाष्टचत्वारिंशतं । तत्सुतः कलि-(विष्णु*) वर्द्धनो (ऽ*) द्ध्यर्द्ध-वर्षं[9] ।

Second Plate : Second Side

15. तत्सुतो गुणगांक-विजयादित्यश्चतुश्चत्वारिंशतं । तदनु-
16. ज-विक्रमादित्य-भूपातेः[10] सूनुश्चालुक्य-भीम-भूपालस्त्रि-
17. ंशतं । तत्पुत्रः कोल्लभिगण्ड-विजयादित्यः ष-
18. ण्मासान्(।*)तत्सूनुरम्मराजः सप्र-वर्ष(ा*)णि । तत्सुतं
19. विजयादित्यं ब(ा*)लमुच्चाट्य तालपो मासा[11]मेकं(।*)
20. तं जित्वा श्चलुक्य[12]-भि(भी)म-तनयो विक्रमादित्य एकादश-मा-
21. सान् ततस्तालपराजस्य सुतो युद्धमल्लः सप्त वर्ष(ा*)-

Third Plate : First Side

22. णि । तत्पुत्रः[13] कोल्लभिगण्ड-विजयादित्य-सुतो भीम-रा-
23. जो द्वादश वर्षाणि ॥
तस्य माहेश्वर-मूर्त्तेरुमा-समा-
24. नाकृतेः कुमाराभः(।*)
लोकमहादेव्या(:*) खलु य-
25. स्समभवदम्मराजाख्यः ॥ 1
जलजातपत्र-चा-
26. मर-कलशांकुश-लक्षणांक-कर-चरण-त-
ल(:।*)
27. लसदाजान्ववल(ं*)बित-भुजयुग-परिघो गिरी-
28. न्द्र-सानूरस्कः ॥ 2
यो रूपेण मनोजं विभवेन म-

Third Plate : Second Side

29. हेन्द्रमहिमकरमुरु-महसा ।
हरमरिपुर-दहनेन न्यक्कुर्व्वन्भा-
30. ति विदित-दिगवनि-कीर्त्तिः[14] ॥ 3
स सकल-रिपु-नृपति-मकुट-तट-घटित-मणि-
31. गण-मधुकर-निकर-परिचुंबित-चरण-सरसिरुह-युगलो
32. युगलोवन-पद-कमल-विलसद्द्विरेपायमानो[15] मानोन्न-
33. तोनतोद्धत-[16]समस्त-लोकः समस्तभुवनाश्रय-श्री-विजया-
34. दित्य-महाराजाधिर(ा*)जः परमेश्वरः परमभट्टारकः परमब्रह्मण्यः
वेल-

35. नाण्डु-विषय-निवासिनो राष्ट्रकूट-[17]प्रमुखान्कुटुंबिन(:*) समाहूयेत्य-
माज्ञापय-

Fourth Plate : First Side

36. ति ॥
विद्वत्कवीन्द्र-प्रभवं प्रसिद्धं
पूज्योदयं भूरि-गुणाधिवासं(सम् ।)
धर्म्मिष्ठ-भूमि-[18]

37. नियम-स्वधाम
पात्रं परं काश्यप-गोत्रमासीत् ॥ 4
तत्र भूसुर-यथोचि-

38. त-विद्या-
कर्म्म-षट्क-विधि-निर्म्मल-देहः (।*)
वेदविद्विदित-शास्त्र-समु-[19]

39. हो
विद्मय्य इति विश्रुत-कीर्त्तिः ॥ 5
भूदेव-वंशा(ं*)बुवि-[20]शीतरश्मि-[21]

40. र्व्विद्वत्सरोज(।*)कर-भानु-भानुः(।*)
तत्सूनुरंभोजभवोपमानो

41. विद्यामयो विद्मियः प्रसिद्धः ॥ 6
अरुन्धत्या विशिष्टस्य वशिष्ठस्योपमाम-[22]

42. यात् (।*)
पतिव्रतात्मया धर्म्मपत्न्या यश्चानमव्वया ।(।*) 7
कुल-क्रमायातमुदार-भा-

Fourth Plate : Second Side

43. व-
मनन्यदृष्टाश्रुतपूर्व्व-रूपं(पम् ।)
दवद्धराधारि-[23]धरोपमानः[24]
तयोस्सुतः कोरमिया-

44. मिधानः ॥ 8
श्री-लोकमहादेव्या समवर्द्धत यो (ऽ*) स्मदंबया प्रीत्या (।*)
चातुर्य्य-नागर-
45. कयोरावास-स्थानमिति मनोहरयोः ॥ 9
अपहसति वाग्मिता वाग्वनितां यत्र स्थि-
46. ता महाचतुरे (।*)
अ-सुजन-वरा[25] नागरक-जलजभव-बहुमुख-प्रियां
47. स (सं) ततं (तम्) ॥ 10
उत्पद्यते प्रसंगात्सुजनतया चात्म-सहजया यस्य
48. विभवः पति-प्रसंश्चित्रमिदं[26] साधुवाद इति । (।*) 11
रसिकानामति-रसिकश्चतुराणामधिक-
49. चतुर एवायं (यम् ।)
कोरमिय-नामधेयोः[27] विदुषामत्यन्त-विज्ञ (ा*) नी । (।*) 12
सेवित-समस्त-भू-
50. पति-हृदय-स्थिति-भाग्गुणोपपन्नो (ऽ*) मूल्यः[28] (।*)
मुक्ताफल-सच्चरितः कोरमिया[29] वस्तु-पु-

Fifth Plate : First Side

51. रुष इत्युपपन्नं । (न्नम् ॥) 13
अनागत-ज्ञ (ा*) न-विवेकिनी धी-
रनिन्द्य-चारित्र-परा हि चेष्टा (।*)
अशेष-भो-
52. गोपनतम्भनश्च
अहो महत्कोरमियस्य पुण्यं (ण्यम्) ॥ 14
तस्मै कोरमिय-नाम्ने सुवर्ण्ण-
53. भाण्डागार-श्रीकरण-मुख्याय एलवर् रु-नाम-ग्रामस्सर्व्वकर-
परिहारेणाग्रहारी-
54. कृत्योदक-पूर्व्वा[30]मुत्तरायण-निमित्ते (ऽ*) स्माभिर्द्दत्त इति विदितमस्तु वः ।
अस्यावधयः
5. पूर्व्वातः[31] गोमड्वु-सीमा । आग्नेयतः इग्गुंबरि् त-सीमा । दक्षिणतः
इष्ठूरि-सीमा । नैर्ऋ-
56. ति-पश्चिमाभ्यां प्रेंपरि् त-सीमा । वायव्यतः तुरिमिण्डि-सीमा ।
उत्तरेशानाभ्यां[32] अमुतुनूरि-सीमा (॥*)

57. अस्योपरि न केनचिद्बाधा कर्त्तव्या(।*)यः करोति स पंच-महापातको
भवति । तथोक्तं व्यासेन ।
बहु-

58. भिर्वसुधा दत्ता बहुभिश्चानुपालिता(।*)
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं।(लम्॥) 15
स्व-द-

Fifth Plate : Second Side

59. त्तां पर-दत्तां वा यो हरेत वसुन्धरां(राम्।)
षष्टि वर्ष-सहस्राणि विष्टाया(ष्ठायां) ज(ा*)यते कृमिः ॥ 16

60. आज्ञप्ति(:*) कटकराज:(।*) पोतनभट्ट-काव्यं जोन्ताचार्य्य-
लिखितं(तम्) ॥

1. The first year of Amma II Vijayāditya's reign falls in Śaka 867 (945-46 A.D.).
2. From the facsimile in *Ind. Ant.*, XII. Omit the *daṇḍa* after the final *m* changed to *anusvāra* before a consonant.
3. Read *Mānavya.*
4. *Ri* had been originally engraved and was afterwards made *rā.*
5. The *anusvāra* is superfluous.
6. Read °*bhṛitha.*
7. The form *Chalukya* often occurs in earlier records.
8. Read *varddhanaḥ.*
9. Read *varshaṁ.*
10. Read *bhūpateḥ.*
11. Read *māsam=ekaṁ.*
12. Read *Chalukya.*
13. In reality, Bhīma was the son of Kollabhigaṇḍa-Vijayāditya, who was in the same degree of descent as Yuddhamalla II.
14. Read *kīrttiḥ.*
15. Read °*rephāyamāṇo.*
16. Read °*t-ānat-oddhata.*
17. Read °*kūṭa.*
18. Read *bhūmir=nniyama.*
19. Read *samūho.*
20. Read °*budhi.*
21. Read °*raśmir=vvidva*°

22. Fleet reads *Vaśishṭa*°.
23. Read *dadhad-dharā*°.
24. Read °*mānas=tayo*°.
25. Fleet corrects *varā* to *dhārā*. Better read *dharā*.
26. Read *praśaṁsyaś=chitra*°.
27. Omit *visarga*.
28. Better read °*mūlyaḥ*.
29. Read °*miyo*.
30. Read °*pūrvvam=utta*°.
31. Read *pūrvvataḥ*.
32. Read °*bhyām*.

CHAPTER IV

The Chālukyas of Mānyakheṭa and Kalyāṇa

No. 10—Nīlgunda Copper-plate Inscription of Vikramāditya VI, Chālukya-Vikrama years 12 (Prabhava = 1087 A.D.) and 48 (Śobhakṛit = 1123 A.D.)

Nīlgunda, Bellary District, Karnataka.

L. D. Barnett, *Ep. Ind.*, XII, pp. 142 ff.

Language : Sanskrit.

Script : Southern Nāgarī.

Metres: V. 1, 18-23, 32, 49-52 अनुष्टुभ्; Vv. 2, 4, 9, 11-12, 26, 37 मालिनी; V.3 आर्यागीति; Vv. 5, 8, 15, 29, 414 3, 54 वसन्ततिलक; Vv. 7, 28, 44, 48 शार्दूलविक्रीडित; Vv. 6, 10, 24-25, 27, 30, 38 आर्या; Vv. 13-14, 45, 47 मन्दाक्रान्ता; V. 16 द्रुतविलम्बित; Vv. 17, 31, 33, 35, 39, 42 उपजाति; Vv. 34, 36 उपेन्द्रवज्रा; V. 40 स्रग्धरा; V. 46 प्रहर्षिणी; V. 53 शालिनी.

Summary : Fifty-nine kings of the family are said to have reigned in Ayodhyā and sixteen of them later ruled in the South. After a temporary obscuration, the family's fortunes were restored by JAYASIṀHA I who overcame RĀSHṬRAKŪṬA INDRA, son of KṚISHṆA. His son was RAṆARĀGA; his son PULAKEŚIN; his son KĪRTIVARMAN I; his younger brother MAṄGALĪŚA who ruled during the minority of his brother's son SATYĀŚRAYA (PULAKEŚIN II). Then came Satyāśraya's son NIḌAMARI (Neḍamari); his son ĀDITYAVARMAN; his son VIKRAMĀDITYA I; his son YUDDHAMALLA; his son VIJAYĀDITYA; his son VIKRAMĀDITYA II; his son KĪRTIVARMAN II under whom the family eclipsed. His brother (Bhīma); his son KĪRTIVARMAN III; his son TAILA I; his son VIKRAMĀDITYA III; his son BHĪMA II: his son AYYAṆA I who married a daughter of RĀSHṬRAKŪṬA KṚISHṆA III; his son VIKRAMĀDITYA IV who

married Chedi LAKSHMAṆA's daughter; his son TAILA II who conquered KARKARA (Kakka II) and RAṆASTAMBHA; his son SATYĀŚRAYA II; his younger brother DAŚAVARMAN (Yaśovarman) his son VIKRAMĀDITYA V; his younger brother JAYASIṀHA II; his son ĀHAVAMALLA (Someśvara I) who fought with the MĀLAVA, CHOLA and KANAUJ kings; his son BHUVANAIKAMALLA (Someśvara II); his younger brother VIKRAMĀDITYA VI TRIBHUVANAMALLA. — ŚRĪPṚITHVĪVALLABHA *M.P.P.* TRIBHUVANAMALLA addressed the *Rāshṭrapati, Vishayapati, Grāmakūṭaka, Āyuktaka. Niyuktaka, Ādhikārika, Mahattara* and others who may be associated with the gift land from time to time in respect of his grant of NIRAGUṀDA-GRĀMA (Nīlgunda) in VIKKIGA-70 within KOKALI-500 in favour of 300 learned Brāhmaṇas of Draviḍa-deśa. The grant was made from KALYĀṆAPURA at the request of Palata-pāṇḍya in the CHĀLUKYA-VIKRAMA YEAR 12 = PRABHAVA of Jupiter's cycle, PUSHYA-BADI 13, SATURDAY, UTTARĀYAṆA SAṄKRĀNTI. In the CHĀLUKYA-VIKRAMA YEAR 48, ŚOBHAKṚIT, BHĀDRAPADA-ŚUDI 12 (Śravaṇa-dvādaśī), MONDAY, the king again granted the village together with KṚISHṆAPALLIKĀ to the same Brāhmaṇas, whose number rose by now to 500, at the request of Palata-pāṇḍya's grandson Rāya-pāṇḍya, introduced by *Śrīkaraṇādhikārin Sarvādhyaksha* DRAVIḌĀDITYA when the king was camping at VAIJAYANTĪ (Banavāsi). The grant was made with the exemption of *śulka, kara* and *vādhā* (*vishṭi*), with all dues and *nidhi* and *nikshepa* and *tri-bhog-ābhyantara-siddhi* and making it a *sarva-namasya śāsana.* The hamlet called Ādityapallikā was granted to the god Bhīmeśvara worshipped in the locality. The record was written by *Dān-ādhikārin* BHAṭṭa MALLAYA-PAṆḌITA of KĀŚMĪRA, son of Bhaṭṭa Vilāsa *alias* Aryamasvāmin, with the permission of VIKRAMĀDITYA, son of Kālidāsa, the *Śāsan-ādhikārika, Akshapaṭalika* and *Mahāprachaṇḍa-Daṇḍanāyaka.*—Some of the statements regarding the early history of the family are imaginary and wrong; e.g. Pulakeśin II was actually the father of Vikramāditya I and obtained the throne after killing Maṅgalīśa.

TEXT[1]

First Plate

1. ओं[2] (॥*)
जयत्याविष्कृ[तं] विष्णोर्वाराहं क्षोभितार्ण्णवं(वम्) ।
दक्षिणोन्नत-[दं]ष्ट्राग्र-विश्रांत-भुवनं वपुः ।(॥) 1
श्रियमुपहरताद्वः श्रीपतिः क्रोड-रूपो
2. विकट-विशद-दंष्ट्रा-प्रान्त-विश्रांति-भाजं(जम्) ।
अवहृददय-दंष्ट्राकृष्ट-विस्पष्ट कांड-
प्रतनु-विस-जटाग्र-ग्रंथिवद्यो धरित्रीं(त्रीम्) ।(॥) 2
करि-मकर-म-
3. करिकांकित-जलनिधि-रशनां वशीकरोत्ववनि-वधूं(धूम् ।)
त्रिभुवनमल्ल-महीपतिरकलंक-यशो(ऽ*)वु(बु)-[3]राशि-वलयित-भुवनः॥ 3
ग[द्यं(द्यम्)]।
4. स्वस्ति समस्त - भुवन-संस्तूयमान-मानव्य - सगोत्रा[णां] हारीति-पुत्राणां
कौशिकी-वर-प्रसाद-लव्ध(ब्ध)-श्वेतातपत्रादि-राज्य-चिह्नानां स-
5. प्त-मातृका-परिरक्षितानां कार्त्तिकेय-वर-प्रसाद-लव्ध(ब्ध)-मयूर-पिच्छ-
कुंत-ध्वजानां भगवन्नारायण-प्रसादासादित-वर-वराह-लांछनेक्षण-
6. क्षण-वशीकृताराति राज-मण्डलानां समस्त-भुवनाश्रय-सर्व-लोकाश्रय-विष्णु-
वर्द्धन-विजयादित्यादि-विशेष-नाम्नां राज-रत्नानामुद्भव-भूमिः । वृत्तं-
(त्तम्) ।
7. कवलित-नल-लक्ष्मीर्दुर्जयौर्जित्य-हारी
विहत-पृथु-कडंवा(बा)डंव(ब)रो[4] मौर्य-निर्जित् ।
निज-भुज-व(ब)ल-भुग्नोत्पाटयन्राष्ट्रकूटा-
ह्निलित-कल-
8. चुरि-श्रीरस्ति चालुक्य-वंशः । (॥) 4
तज्जेषु राज्यमनुपाल्य गतेषु राज-
स्वेकान्नषष्टि-गणनेषु पुराघ्ययोध्यं(ध्यम्) ।
तद्वंशजास्तदनु षोडश भूमिपा-
9. लाः
क्ष्मां दक्षिणापथजुषं विभरां व(व)भूवुः ।(॥) 5
दुष्टावष्टब्धायां कतिपय-पुरु[षां]तरांतरितायां च(।*)

चालुक्य-कुल-संपदि भूयश्चालुक्य-वंश्य एव ।(॥)[5] 6
कंदः की-
10. र्त्ति-लतांकुरस्य कमलं लक्ष्मी-विलासास्पदं
वक्त्रं वैरि-महीतृ(भृ)तां प्रतिनिधिर्द्देवस्य दैत्य-द्रुहः ।
राजासीज्जयसिंह-वल्लभ इति ख्यातश्चरित्रै-
11. र्न्निजै-
र्यो रेजे चिरमादिराज-चरितोत्कंठाः प्रजानां हरन् ।(॥) 7
यो राष्ट्रकूट-कुलमिंद्र इति प्रसिद्धं
कृष्णाह्वयस्य सुतमष्ट-शतेभ-सैन्यं ॥ (न्यम् ।)
12. निर्जित्य दग्ध-नृप-पंच-शतो व(ब)भार
भूयश्चलुक्य-कुल-वल्लभराज-लक्ष्मीं ।(क्ष्मीम् ॥) 8
चटुल-रिपु-तुरग-पटु-भट-करटि-घटा-कोटि-घटि-
13. त-रणरागः ।
सुकृत-हर-चरण-रागस्तनयो(ऽ*)भूत्तस्य रणरागः ।(॥) 9
तत्तनयः ।[6] पुलकेशी केशि-निसूदन-समो(ऽ*)भवद्राजा ।
वा-
14. तापिपुरी-वर-पतिरकलित-खल-कलि-कलंक-कलः ।(॥) 10
वयमपि पुलकेशि-क्ष्मापतिं वर्ण्णयंतः
पुलक-कलित-देहा पश्यताद्या-
15. पि संतः ।
स हि तुरग-गजेन्द्र-ग्राम-सा[रं] सहस्र-
द्वय-परिमितमृत्विक्साच्चकराश्वमेधं ।(॥) 11
तत्तनयः ।
नल-निलय-विलोपी-मौर्य-निर्याण-हेतुः
प्रथित-
16. पृथु-कडंव(ब)-स्तंव(ब)-भेदी कुठारः ।
भुवन-भवन-भागापूरणारंभ-भार-
व्यवसित-सित-कीर्तिः कीर्तिवर्मा नृपो(ऽ*)भूत् ।(॥) 12
तदनु तस्यानुजः ।
सर्व्व-द्वीपाक्रम-
17. ण-महसो यस्य नौ-सेतु वं(बं)धै-
रुल्लंघ्याब्धि(ब्धि)र्व्यधित पृतना रेवती-द्वीप-लोपं(पम्) ।

राज्य-श्रीणां हठ-पतिरभूद्यश्च कालच्चुरीणां[7]
व(ब)न्ध्रे भूमि सह स सक-

18. लैमंगलैर्मंगलीशः ।(॥) 13
ज्येष्ठ-भ्रातुः सति सुत-वरे(ऽ*)प्यर्भकत्वादशक्ते-
र्यस्मिन्नात्मन्यकृत हि धुरं मंगलीशः पृथिव्याः ।
तस्मिन्प्रत्यार्पिपदथ महीं

19. यूनि सत्याश्रये(ऽ*)सौ
चालुक्यानां क इव(ह)हि पथो धर्म्यतः प्रच्यवेत ।(॥) 14
जेतुर्दिशां विजित-हर्ष-महानृपस्य
दातुर्मनोरथ-शताधिकमर्थयद्भ्यः ।
सत्यादि-

20. सर्व-गुण-रत्न-गणाकरस्य
सत्याश्रयत्वमुपलक्षणमेव यस्य ।(॥) 15
अडमरीकृत-दिग्वलयो(ऽ*)र्दित-
द्विडमरी-परिगीत-महायशाः ।
मृडमरिष्ट-भि[दं] म-

21. नसोद्वह- 16
न्निडमरिः क्षितिपो(ऽ*)जनि तत्सुतः ।(॥)
सुतस्तदीयो गुण-रत्न-माली
भू-वल्लभो(ऽ*)भूद्भुज-वीर्य-शाली ।
आदित्यवर्मार्जित-[पु]ण्य-कर्मा
तेजो-

22. भिरादित्य-समान-धर्मा ।(॥) 17
तत्सुतो विक्रमादित्यो विक्रमाक्रान्त-भूतलः ।
ततो(ऽ*)पि युद्धमल्लाख्यो युद्धे यम-समो नृपः ।(॥) 18
तज्जन्मा विजयादित्यो वीरा-

23. नेकांग-संगरे ।
चतुर्णां मंडलानामप्यजयद्विजयोपमः ।(॥) 19
तद्भवो विक्रमादित्यः कीर्तिवर्मा तदात्मजः ।
येन चालुक्य-राज्य-श्रीरंतरापिण्य-

24. भूद्भुवि ।(॥) 20
विक्रमादित्य-भूपाल-भ्राता भीम-पराक्रमः

तत्सूनुः कीर्तिवर्माभून्मृत्प्रासार्द्दित-दुर्जनः ।(॥) 21
तैल-भूपस्ततो जातो विक्रमादित्य-भूपतिः ।

Second Plate : First Side

25. तस्तूनुरभवत्तास्माद्भीमराजो(ऽ*)रि-भीकरः ।(॥) 22
अय्यणार्यस्ततो जज्ञे यद्वंशस्य श्रियं स्वकां(काम्) ।
प्रापयन्नि(न्नि)व वंशं स्वं स
26. वव्रे कृष्ण-नंदनां(नाम्) ।(॥) 23
अभवत्तयोस्तनूजो विभव-विभासी विरोधि-विध्वंसी(।*)
तेजो-विजितादित्यः सत्य-धनो विक्रमादि-
27. त्यः ।(॥) 24
चेदीश-वंश-तिलकां लक्ष्मणराजस्य[8] नंदनां नुत-शीलां(लाम् ।)
वोंथादेवीं विधिवत्परिणिन्ये विक्रमादित्यः ।(॥) 25
सु-
28. तमिव वसुदेवाद्देवकी वासुदेवं ।[9]
गुहमिव गिरि-जामिर्द्देवमर्द्धेन्दुमौलेः ।
अजनयदथ [वों]थादेव्यतस्तै-
29. ल-भूपं(पम्) ।[9]
विभव-विजित-शक्रं विक्रमादित्य-नाम्नः ।(॥) 26
अरि-कुंति(भि)-कुंभ-भेदन-रिपु-दुर्ग्ग-कवाट-भंजन-प्रभृतिः(।*)
सहज-
30. व(ब)लस्य हरेरिव वा(बा)ल-क्रीडाभवद्यस्य ।(॥) 27
किं च राष्ट्रकूट-कुल-संव(ब)द्धावुभौ ।
और्ज्जित्याच्चरणाविव प्रचलितौ साक्षा-
31. त्कलेः क्रामतः ।[9]
क्रूरौ व(ब)द्ध-शरीरकौ गुरु-जन-द्रोह-प्ररोहाविव ।
कालात्खंडित-राष्ट्रकूटक-कुल-श्री-वल्लि-जातांकु-
32. रौ ।[9]
लूनौ येन सुखेन कर्कर-रणस्तंभौ रण-प्रांगणे ।(॥) 28
इत्थं पुरा दितिसुतैरिव भूतधात्रीं
यो राष्ट्रकूट-कुटिलैर्ग्ग-
33. मितामधस्तात् ।
उद्धृत्य माधव इवादिवराह-रूपो

व(ब)भ्रे चलुक्य-कुल-वल्लभ-राजलक्ष्मीं ।(क्ष्मीम् ।।) 29
भम्मह-रट्टादभवद्भू पालाद्राष्ट्रकू-

34. ट-कुल-तिलकात् ।
लक्ष्मीरिव सलिलनिधेः श्री-जाकव्वाह्वया कन्या ।(।।) 30
चालुक्य-वंशांव(ब)र-भानु-माली-
श्री-तैल-

35. भूपाल उपायतैनां(नाम्) ।
तयोश्च लोकाभ्युदयाय योगः
स चन्द्रिका-चन्द्रमसोरिवासीत् ।(।।) 31
श्री-तैल-भूमिपाला-

36. त् ।[10] श्री-जाकव्वा समजीजनत् ।
श्रीमत्सत्याश्रयं स्कंदमंवि(बि)का त्र्यंव(ब)कादिव ।(।।) 32
तस्यानुजः श्री-दशवर्म-[11]नामा ।[9]
तद्वल्लभा भा-

37. ग्यवती च देवी ।
तयोरभूद्विक्रम-शील-शाली ।[19]
श्री-विक्रमादित्य-नृपस्तनूजः ।(।।) 33
असौ निज-ज्येष्ठ-पितुः परोक्षं
व(ब)भार वा-

38. राशि-वृतां धरित्रीं(त्रीम्) ।
भुजेन केयूर-लतामिवोच्चै-
र्व्विदारिताराति-कदंव(ब)केन ।(।।) 34
तदनु तस्यानुजः ।
यस्याखिल-व्यापि यशो(ऽ*)-

39. वदात-
मकांड-दुग्धांवु(बु)धि-वृद्धि-शंकां(काम्) ।
करोति मुग्धामर-सुन्दरीणा-
मभूत्स भूपो जगदेकमल्लः ।(।।) 35
सदावनस्थः[11] पटु-विक्रमा-

40. द्यो
मदांध-गंधेभ-घटा-विपाटी ।

धरोर्जित-प्रस्फुरित-प्रभासो
रराज यो(ऽ*)सौ जयसिंहराजः ।(।।) 36
अगमदखिल-धात्री येन रा-
41. न्वतीत्वं
निवसति नृप-लक्ष्मीर्यस्य शुभ्रातपत्रे ।
स सकल-नमितारि-क्षोणिभृन्मौलि-रत्न-
द्युति-शवलित-पादो गंडरु[लूगं]ड-
42. भूपः ।(।।) 37
विख्यात-कृष्णवर्ण्णे तैल-स्नेहोपलध्ध(ब्ध)-सरलत्वे(।*)
कुन्तल-विषये नितरां विराजते मल्लिकामोदः ।(।।) 38
ततः प्रताप-ज्वलन-
43. प्रभाव-
निर्मूल-निर्दग्ध-विरोधि-वंशः ।
तस्यात्मजः पालयिता धरायाः
श्रीमानभूदाहवमल्लदेवः ।(।।) 39
आत्मावस्थान-हेतोरभिलष-
44. ति सदा मंडपं[12] मालवेशो ।[9]
द्रो(दो)लत्तालो-वनांतान्यनुसरति सरिन्नाथ-कूलानि चोलः ।
कन्याकुब्जा(ब्जा)धिराजो भजति [च तर]-

Second Plate : Second Side

45. सा कंदरास्ता हिमाद्रे-
रुद्दामा यत्प्रताप-प्रसर-त(भ)र-भवोद्भीति-विभ्रांत-चित्ताः ।(।।) 40
अम्लान-ते(तै)ल-गुण-संग्रह-
46. ण-प्रवृद्ध-
तेजो-विशेष-दलित-द्विषदंधकारः ।
अन्वर्थतां समनुसृत्य कवि-प्रधानै-
र्यः प्रोच्यते ननु चलु-
47. क्य-कुल-प्रदीपः ।(।।) 41
औद्धत्य-युक्तांधकज-प्रभाव-
निर्मूलनोद्दाम-व(ब)लस्य यस्य ।
विराजते निर्ज्जित-मीनकेतो-
[र्द]-

48 वस्य चालुक्य-महेश्वरत्वं (त्वम् ।।) 42
तस्मादजायत जगज्जनित-प्रमोद-
शृंगार-वीर-रसिकः कवि-लोक-कांतः ।
कां-

49. ता-विलोल-नयनोत्पल-चारु-चन्द्र-
श्चालुक्य-वंश-तिलको भुवनैकमल्लः ।(।।) 43
यः पत्रं स्फुट-पुष्कराक्षर-धरं पा-

50. णौ कृपाण-च्छला-
दा-जन्म-प्रतिपन्न-दास्य-विजय-श्री-दत्तमुच्चैर्दधत् ।
साक्ष्यं ग्राहयितुं दिशां परिवृढान्सर्वानिव

51. प्राहिणो-
त्प्रत्याशं निज-कीर्त्तिमभ्र-तटिनी-स्पर्द्धानुवं (बं) धोद्यतां (ताम् ।।) 44
तदनु तस्यानुजः ।
आसीत्तेजः-कलित-कमलो-

52. ल्लासन-प्रौढ-पाद-
स्पर्शादुच्चैः श्रियमवनिभृच्छेखराणां दधानः ।
ध्वांत-भ्रांति दधदिव दृशोरंजनं वैरि-वीर-
[स्मे]-

53. राक्षीणां मुहुरपहरन्विक्रमादित्यदेवः ।(।।) 45
भू-भारं नमित-फणीश्व[रं] भुजाभ्यां
वि (बि) भ्राणः पटह-पलायित-क्षि-

54. तीशः (।*)
यश्चोच्चैरपहृत-नाकि-शाखि-लीलः
प्रख्यातस्त्रिभुवनमल्ल इत्युदारः ।(।।) 46
यतो (ऽ*) न्वेष्टुं जनक-जनितां

55. वल्लभोदार-लक्ष्मीं
भात्रा सार्द्धं हरि-व (ब) ल-युतः स्वां सुमित्रात्मजेन ।
तीरे सिन्धोर्व (र्ब) हुमुख-भयादेत्य वैभीषण-श्री-
धाम्ना

56. नेमे द्रविड-पतिना यश्च चालुक्य-रामः ।(।।) 47
सर्वाशा-विजय-प्रयाण-समय-ज्ञाताखिलोर्व्वी-पथ-
प्रस्थानेव महीमतीत्य वि-

57. मला यत्कीर्त्तिरब्धि(ब्धि)गता ।
प्रेक्ष्यस्ते विजय-श्रियापर-वशो दूरीकरोत्येष मा-
मित्याख्यातुमिवार्ण्णव-स्थिति-जुषः शौरेस्त्रिलो-
58. की-गुरोः ।(॥) 48
स तु श्री-पृथ्वी-वल्लभ-महाराजाधिराज-परमेश्वर-परमभट्टारक-सत्या-
श्रय-कुल-तिलक-चालुक्याभरण-श्रीमत्ति-
59. भुवनमल्ल-वल्लभनरेंद्रदेवः कुशली कुशलिनः सर्वानेव यथासंवध्य-
मानमानका[13]न्राष्ट्रपति-विषयपति-ग्रामकूट-
60. कायुक्तक-नियुक्तकाधिकारिक-महत्तरादीन्समादिशत्यस्तु वः संविदितं-
(तम्)। यथास्माभिश्चालुक्य-विक्रम-वर्षे द्वादशे
61. ग्रंकतो(ऽ*)पि ॥१२॥ प्रवर्त्तमान-काले प्रभव-संवत्सरे पुष्य-व(ब)हुल-
त्रयोदशि(शी)-वड्डवारोत्तरायण-संक्रांतौ व(ब)हूनि महादानानि दत्वा-
(त्त्वा) तद्द-
62. क्षिणा-काले कल्याणपुर-समावासित-निज-विजय-स्कंधावारे पलत-पांड्य-
विज्ञप्त्या द्रविड-देशागतेभ्यो नाना-गोत्रेभ्यो नाना-वेद-
63. शाखा-शास्त्र-पारगेभ्यस्त्रिशत-संख्याकेभ्यो व्रा(ब्रा)ह्मणेभ्यः श्रीमत्त्रिभुवन-
मल्लदेवेन कोकलि-पंचशत-देश-मध्य-स्थित-विक्किग-सप्तत्यन्तर्व्व-
64. र्त्ती ।[9] नीरुगुंद-नामा ग्रामः ।[9] धारा-पूर्वकमग्रहारीकृत्य दत्तः। पंच-
शतेभ्य एव व्रा(ब्रा)ह्मणेभ्यः चालुक्य-विक्रम-वर्षे अष्टाचत्वारिंशे
ग्रंकतो(ऽ*)-

Third Plate

65. पि ॥४८॥ प्रवर्त्तमान-काले शोभकृत्संवत्सरे भाद्रपद-शुद्ध-श्रवण-द्वादश्यां
सोम-वारे व(ब)हूनि महादानानि दत्वा(त्त्वा)तद्दक्षिणा-काले वैं-
66. जयन्तीपुर-समावासित-निज-विजय-स्कंधावारे
श्रीकरणाधिकारि-सर्व्वाध्यक्ष-द्रविडादित्य-प्रेरित-पलत-पांड्य-पौत्र-
राय-पांड्य-विज्ञ-
67. प्त्या श्रीमत्त्रिभुवनमल्लदेवेन स प(ए)व ग्रामः कृष्णपल्लिका-समेतः
तेभ्यः एव व्रा(ब्रा)ह्मणेभ्यः धारा-पूर्वकं शासनीकृत्य दत्तः। तैरेव
व्रा(ब्रा)ह्म-
68. णैः तद्देश-स्वामिने पिंडादान-स्वरूपेण सुवर्ण्ण-शत-चतुष्टयं देयं(यम्)।[13a]
स-शुल्क-कर-वाधा-परिहारः समस्तादेय-सहितो राजकी-
69. यानामनंगुलि-प्रेक्षणीयो निधि-निधान-समेतः सर्व्व-नमस्यः त्रिभोगाभ्यंतर-
सिध्या(द्ध्या) शाश(स)नीकृत्य दत्तः। तस्य ग्रामस्य सीमान्ता-

70. नि कथ्यंते । प्राच्यां दिशि गज-पाषाणः । ततो दक्षिणतः खल्वाट-
पर्व्वतश्च । आग्नेय्यां दिशि तलेवाग्यग्रामात्पश्चिमासन्न-प्रदेशे

71. स्रोतः । कमंडलुकार्पासग्रामात्पश्चिमासन्न-प्रदेशे स्रोतों(ऽ*)तरं च ।
दक्षिणस्यां दिशि तिलक-नाम-ग्रामादुत्तरासन्न-प्रदेशे स्रोतः ।

72. नैरृत्यां दिशि शैलः । तस्य चोत्तरतो लाक्षागेह-नाम-ग्रामात्पूर्व्वतो महिष-
पाषाणः । पश्चिमस्यां दिशि मधूक-वृक्ष-सरः । ततः पश्चिमो-

73. त्तरतः आयस-सार-तिंत्रिणीक-वृक्षश्च (।*) वायव्यां दिशि दीर्घतुंग-
पर्व्वतः । उत्तरस्यां दिशि स्वर्ण्ण-खदिर-वल्मीकः । ऐशान्यां दिश्यक्षर-
पाषाणः ।

74. इति सीमांत-प्रमाणानि । तत्रत्य-भीमेश्वरदेवाय गंध-पुष्प-धूप-दीप-
नैवेद्यार्च्चनार्थं खंड-स्फुटित-जीर्ण्णोद्धार-नव-सुधा-कर्मार्थं नृत्य-गी-

75. त-वाद्य-भोग-पादमूल-परिवारार्थं व्रा(ब्रा)ह्मण-तपस्वि-भोजनार्थं च ।
आदित्य-नाम-पल्लिका[14] स-शुल्क-कर-बाधा-परिहारः समस्तादेय-सहितो

76. राजकीयानामनंगुलि-प्रेक्षणीयो निधि-निधान-समेतः सर्व्व-नमस्यस्त्रि-
भोगाभ्यंतर-सिध्या(द्धया) धारा-पूर्व्वकं देव-भोगार्थं शाश(स)-

77. नीकृत्य दत्तः । तस्याः पल्लिकायाः सीमांतानि कथ्यंते । प्राच्यामाग्नेय्यां
दक्षिणस्यां नैर्ऋत्यां च नीरुगुंद-ग्रामोक्त-सीमेव सी-

78. मा । पश्चिमस्यां दिशि नागर-सरः-सेतुः । वायव्यामुत्तरस्यामैशान्यां च
चूत-ह्रद-स्रोतः । इति आदित्य-पल्लिकायाः सीमान्त-प्रमाणानि ।

79. एवं पूर्व्व-प्रसिद्ध-सीमा-समन्वितश्चतुराघाट-विशुद्धः स युष्माभिरागामि-
भिरस्मद्वंश्यैरन्यैश्च भूमिपालैः पालनीयः । तथा चो-

80. क्तं ।[9] भगवता वेदव्यासेन ।
व(ब)हुभिर्व्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं ।(लम्॥) 49
अपहरणे(ऽ*)पि

81. च दोषस्तेनैवोक्तः ।
स्व-दत्तां पर-दत्तां वा यो हरेत वसुन्धरां(राम्)।
षष्टि-वर्ष-सहस्राणि विष्ठायां जायते कृमिः ।(॥) 50
सुवर्ण्णमेकं गामेकां भू-

82. मेरप्येकमंगुलं(लम्)।
हरं(रन्) नरकमायाति यावदा-भूत-संप्लवं।(वम् ॥) 51
विध्याटवीष्वतोयासु शुष्क-कोटर-शायिनः।
कृष्णसर्पा हि जायंते व्र(ब्र)-

83. ह्म-देयापहारिणः।(॥) 52
रामभद्रेणाप्युक्तं(क्तम्)।
सामान्यो(ऽ*)यं धर्म-सेतुर्नृपाणां
काले काले पालनीयो-भवद्भिः।
सर्वानेतान्भाविनः पार्थि-

84. वेंद्रा-
न्भूयो भूयो याचते रामभद्रः।(॥) 53
मद्वंशजाः पर-महीपति-वंशजा वा
पापादपेत-मनसो भुवि भावि-भूपाः।
ये पालयन्ति मम

85. धर्ममिमं समस्तं
तेभ्यो मया विरचितों(ऽ*)जलिरेष मूर्द्धिन ॥ 54
मयेदं शासनाधिकारिकाक्षपटलिक-महाप्रचंडदंडनायक-कालिदा-

86. स-सुत-विक्रमादित्यानुमत्या।[9] वत्स-गोत्र-साम-वेदि-भट्ट-विलासोपमाना-[15]
यंमस्वामि-सूनुना काश्मीर-भट्ट-मल्लय-[पं]डितेन दा-

87. नाधिकारिणा लिखितमिदमिति[16] शुभम् ॥ श्री-शारदायै नमः ॥

1. From the facsimile in *Ep. Ind.*, Vol. XII.
2. This is written by *O* surmounted by *anusvāra*.
3. The letter *b* has been written by the sign for *v* here and elsewhere in the record.
4. The usual spelling of the name is *kadamba*. See also line 16 below.
5. The stanza is read as prose in Barnett's transcript.
6. The *daṇḍa* is redundant.
7. The usual form of the name is Kalachuri, sometimes written as Kaḷachchuri and Kalatsuri. It is supposed to be the Indian adaptation of Turkish *Kulchur*.
8. Read *Lakshmaṇarāja-naṁdanāṁ* for the metre's sake.
9. The mark of punctuation is superfluous.
10. Read °*ch-chrī-Jā*°.

11. As an epithet of the king, the expression does not appear to be very satisfactory.

12. Maṇḍapa (modern Mandu) was the capital of the Paramāras of Mālava.

13. Read °*saṁbadhyamānakā*°.

13a. Note that the rent-frce holding was created by the State on receipt of 400 gold coins from the donees.

14. The adjectives qualifying the word *pallikā* are wrongly given in the masculine.

15. Read °*opanām-Ā*°.

16. The word *idam* has been wrongly repeated.

Chapter V

The Sevuna Yādavas

No. 11—Gadag Stone Inscription of Bhillana V, Śaka year 1113 (1192 A.D.)

Trikūṭeśvara (Śiva) temple, Gadag, Dharwar District, Karnataka. Kielhorn, *Ep. Ind.*, III, pp. 219 f.

Language : Sanskrit.

Script : Southern Nāgarī.

Metres : V.1 *Āryā*: Vv.2-10 *Anushṭubh* (*Śloka*).

Summary : In the lineage of Vishṇu was born Sevanadeva. His son was the prince Mallugideva. From him sprang the prince Amaragaṅga. Meditating on his feet was his younger brother Karṇadeva (wrong Sanskritization of Kannaradeva-Kṛishṇadeva). Meditating on the latter's feet was his son Bhillamadeva.— His Majesty Bhillamadeva, the refuge of the whole world, the illustrious favourite of the earth, *Mahārājādhirāja Parameśvara Paramabhaṭṭāraka*, the ornament of Yadu's family, while encamped at Herūrā made at the request of his minister Jaitasiṁha a *sarva-namasya* (rent-free) grant of the village of Hiriya-Handigola in Beluvola-300 after having washed the feet of the holy ascetic *Siddhānti*-Chandrabhūshaṇa-paṇḍitadeva alias Satyavākya, the disciple of Vidyābharaṇadeva who himself was the disciple of Someśvaradeva, and the Superintendent (or chief priest) of the shrine of the god Svayambhū-Trikūṭeśvara at Kratuka. The grant was divided into two parts, one of which was meant for the god Trikūṭeśvara. It was made together with every kind of income in accordance with the *tribhoga* tenure (i.e. enjoying $\frac{1}{3}$ of the revenue income) and was exempted from tolls, taxes and molestation while the royal officials were forbidden even to point at the gift land with finger. The grant was executed on the occasion of a solar eclipse on Sunday the new moon *tithi* of Jyeshṭha of the year Virodhakṛit in Śaka 1113, i.e. the 23rd of June, 1191 A.D., the month being Amānta Nija-Jyeshṭha.

TEXT[1]

1. १॰[2] ओं स्वस्ति ॥
अवतु स वः कंसारिः कुमुद-रुचिर्भाति यत्करे शंखः ।
क्षीराब्धि-मथन-संभ्रम-संक्रान्तः

2. फेन-पुंज इव ॥ 1
अस्ति क्षत्रिय-सिंहस्य यदु-नाम्नः कुलं भुवि ।
लीला-कृतावतारेण हरिणा

3. यदलंकृतम् ॥ 2
तत्र सेवनदेवाख्यः प्रथितः पृथिवीपतिः ।
आसीदशेष-भूपाल-मौलि-लालित-शा-

4. सनः ॥ 3
तस्य मल्लुगिदेवाख्यो बभूव नृपतिः सुतः ।
यस्य न प्रतिमल्लोऽभून्नृपेषु क्षिति-मण्डले ॥ 4
तस्या-

5. प्यमरगंगाख्यस्तनयोऽभून्महीपतिः ।
प्रताप-पावक-प्लुष्ट-प्रत्यर्थि-नृप-काननः ॥ 5
ततस्तदनुजः

6. श्रीमान्कर्ण्णदेवो नृपोऽभवत् ।
शरदिंदु-प्रभा-शुभ्र-यशो-धवलिताखिलः ॥ 6
तस्य च ॥

7. जातो वृंदावन-क्रीडा-कौतुकी शंख-लांच्छनः[3] ।
राजा भिल्लमदेवाख्यः सुतः कृ-

8. ष्ण इवापरः ॥ 7
आक्रम्य विविधान्देशानर्जयित्वा धनं बहु ।
येन सेवन-भूपाल-

9. कुल-राज्यं विवर्धितम् ॥ 8
तस्यास्ति जैत-सिंहाख्यः शक्ति-त्रय-समन्वितः ।
अतर्क्य-विक्रमो मं-

10. त्री मंडलेश्वर-वृश्चिकः ॥ 9
तस्य विज्ञापनेन ॥[4] तेन च समस्त-भुवनाश्रय-श्रीपृथ्वीवल्लभ-
महाराजा-

11. धिराज - परमेश्वर - परमभट्टारक-यदुकुलतिलक-श्रीविष्णुवंशोद्भवेत्यादि-
समस्त-नामा-

12. वली-विराजमानेन श्रीमत्प्रतापचक्रवर्त्तिन[ा] [भिल्लम*]देवेन हेरूरा-
समावासित-विजयस्कंधा-

13. वारेण शक-नृप-कालातीत-संवत्सर-शतेषु त्रयोदशाधिकेष्वेकादशसु वर्त्त-
मान-विरोधकृत्संवत्स-

14. रांतर्गत-ज्येष्ठामावास्यायामादित्यवारे सूर्यग्रहणे श्रीमत्क्रतुकस्वयंभू-
त्रिकूटेश्वर-देवस्थानाचा-

15. र्यस्य सोमेश्वरदेव-शिष्य-विद्याभरणदेव-शिष्यस्य सत्यवाक्यापर-नामधे-
यस्य श्रीमत्परम-

16. तापसाचार्य-सिद्धांति-चंद्रभूषणपंडितदेवस्य पादप्रक्षालनं कृत्वा बेलुवोल-
त्रिशतांतर्गत-

17. हिरिय-हंदिगोल-नाम-ग्रामः स-शुल्क-कर-बाधा-परिहारः समस्तादेय-सहितः
पूर्व-प्रसिद्ध-

18. सीमा-समन्वितो राजकीयानामनंगुलि-प्रेक्षणीयस्त्रिभोग-युक्तः सर्वनमस्यी-
कृत्य द्वेधा

19. विभज्य धारा-पूर्वकं स-शासनो दत्तः ॥ तत्रैको भागस्तस्यैव भगवत-
स्त्रिकूटेश्वरदेवस्या

20. ....[5] धर्मस्तद्वंश्यैरन्यैश्च भूमिपालैः पालनीयः ।
उक्तं च पालने

21. ....[6]
[बहुभिर्वसुधादत्ता*] [रा*]जभिः सगरादिभिः ।
यस्य यस्य [यदा]

22. [भूमिस्तस्य तस्य तदा फलम् ॥][7] 10

1. Prepared from Kielhorn's transcript.
2. It is the symbol indicating *siddham*, *Oṁ siddhiḥ* or *siddhir=astu*.

3. Read *lāṁchhanaḥ* or better *lāñchhanaḥ*.

4. These *daṇḍas* are unnecessary.

5. Since each line of the record contains about 28 *aksharas*, some 11 or 12 *aksharas* are lost at the commencement of this line. The lost portion may conjecturally be restored as *devasy=ā[yatanasya bhagna-saṁskār-ārtham=esha]* *dharmas=tad=vaṁ°*.

6. Some 14 or 15 *aksharas* are lost at the commencement of this line. The beginning of it may be conjecturally restored as *dharma-gauravam=iti*.

7. This may be the end of the record, or there might have been another verse (*Shashṭiṁ varsha-sahasrāṇi*, etc.) after it.

CHAPTER VI

The Hoysala Yādavas

No. 12—Gadag Stone Inscription of Vīra-Ballāla II, Śaka year 1114 (1192 A.D.)

Trikūṭeśvara temple, Gadag, Dharwar District, Karnataka.
Fleet, *Ind. Ant.*, II, pp. 298 ff.; H. Lüders, *Ep. Ind.*, VI, pp. 94ff.

Language : Sanskrit.

Script : Kannaḍa.

Metres : Vv.1-2 *Anushṭubh* (*Śloka*); Vv.3-5 *Upajāti* (*Indravajrā* and *Upendvavajrā*); V.6 *Praharshiṇī*; Vv. 7-11 *Anushṭubh* (*Śloka*); V.12 *Āryā*; V.13 *Anushṭubh* (*Śloka*); Vv.14-16 *Āryā*; Vv.17-19 *Anushṭubh* (*Śloka*); V.20 *Indravajrā*; Vv. 21-28 *Āryā*; V.29 *Upajāti* (*Indıavajrā* and *Upendravajrā*); V. 30 *Vasantatilaka*; Vv. 31-35 *Śārdūlavikrīḍita*; V. 36 *Āryā*; V. 37 *Upajāti* (*Indravajrā* and *Upendravajrā*); V.38 *Āryā*; V.39 *Anushṭubh* (*Śloka*); Vv.40-45 *Āryā*; V.46 *Anushṭubh* (*Śloka*); V.47 *Āryā*; Vv.48-55 *Anushṭubh* (*Śloka*); V.56 *Śālinī*; V.57 *Vasantatilaka*; V.58 *Āryā*.

Summary : In the lineage of YADU, there was a king called SAḶA. Once there lived at ŚAŚAKAPURA an ascetic who, while engaged in performing his rites, was attacked by a tiger. He called Saḷa for assistance with the words : *Hoy Saḷa* (in Kannaḍa), 'Slay, O Saḷa'. Saḷa killed the tiger and thus acquired for himself and his descendants the name of Hoysaḷa, tiger being the emblem of their banner.— After some rulers, VINAYĀDITYA became king. His son was EṚEYAṄGA, who again had three sons, BALLĀḶA, Vishṇuvardhana and Udayāditya. After the elder of them, who attacked JAGADDEVA and took away the latter's sevenfold sovereignty, had ruled the kingdom, his younger brother, VISHṆUVARDHANA also reigned for a long time. Having given away in religious gifts, the whole of his own territory, in order to have a kingdom of his own, Vishṇuvardhana invaded UCHCHAṄGI and other territories belonging to

his enemies. After invading the whole country from his own abode to BEḶVOLA, he bathed his horses in the KṚISHṆAVERṆĀ. His overlord VIKRAMĀDITYA VI of the Chālukya house of KALYĀṆA was reminded again and again by his servants whenever they waited upon him : 'Know the Hoysala alone among all princes not to be conquerable by king PARAMARDIDEVA (Vikramāditya VI).'—Vishṇuvardhana's son and successor was NARASIṀHA whose wife was ECHALADEVĪ. Their son VĪRA-BALLĀLA (II) acquired the kingdom by worshipping VAJREŚVARA. The AṄGAS, KALIṄGAS, VAṄGAS, MAGADHAS, CHOLAS, MĀLAVAS, PĀṆḌYAS, KERAḶAS and GURJARAS were all in fear of him. By force, he defeated Brahman and deprived the general of his position, on account of an insult to his father, tearing off the royal fortune from the family of the KALACHURIS. And cutting off JAITRASIṀHA, who was, as it were, the right hand of Yādava BHILLAMA, he also acquired sovereignty over the KUNTALA country.— *Samastabhuvanāśraya Śrīpṛithvīvallabha Mahārājādhirāja Parameśvara Paramabhaṭṭāraka* VĪRA-BALLĀḶA-DEVA, the lord of the city of DVĀRĀVATĪ, from the victorious camp at LOKKIGUṆḌI—on the occasion of a LUNAR ECLIPSE on SATURDAY, the day of the FULL MOON in the month of MĀRGAŚĪRSHA of the year PARIDHĀVIN in the ŚAKA YEAR 1114 after having washed the feet of the *āchārya* Siddhānti-CHANDRA-BHŪSHAṆA-paṇḍitadeva, also called SATYAVĀKYA, who was the disciple of VIDYĀBHARAṆADEVA and the disciple's disciple of SOMEŚVARADEVA of the lineage of the KĀḶAMUKHA Āchāryas, granted the village of HOṀBĀḶALU in the BEḶVOLA-300 together with the right to hidden treasures, underground stores, water, stone, gardens, etc., together with *tribhoga* right, with the full proprietorship of *ashṭa-bhoga*, with the right of appropriating all things such as tolls and fines, for the sake of the *aṅga-bhoga* and *raṅga-bhoga* of the god SVAYAMBHŪ-TRIKŪṬEŚ-VARA at KRATUKA, whose *sthānāchārya* was SATYAVĀKYA, for the sake of repairing anything that might be broken, torn or worn out through age, etc., of providing for instruction, and of feeding etc., ascetics, Brāhmaṇas and others, making it a *Sarva-namasya* (tax-free) grant not to be pointed at with finger by the kings or the kings' officials.—By order of the king, the *śāsana* was composed by the learned AGNIŚARMAN.—

The DATE corresponds to the 21ST NOVEMBER, 1192 A.D., though the full moon (with lunar eclipse) occurred really on the previous day (Friday).

TEXT[1]

1. स्वस्ति । [Siddham Symbol.]

1. त्रैलोक्यं पाल्यते येन सदयं सत्व(त्त्व)-वृत्तिना ।
स देवो यदु-शार्द्दूलः श्रीपतिः श्रेयसेऽस्तु वः ।। 1

2. देवः समस्त-सामन्त-मस्तक-न्यस्त-शासनः ।
आ चन्द्रार्क्क नृपः पायाद्भुवमम्भोधि-मेखळां(लाम्) ।। 2

3. आसीत्क्षितौ क्षत्रिय-पुंगवानां
शिरोमणिः श्री-यदु-नामधेयः ।
यदन्ववाये स हरि[2]र्धरित्री-
भारावतारार्त्थमजो(ऽ*)पि जातः ।। 3
यदन्ववाये

4. बहवो बभूवु-
र्भु(र्भु)जोद्भवा विश्रुत-कीर्त्ति-भाजः ।
अद्यापि लोके चरिताद्भुतानि
येषां पुराणेषु पठंति संतः ।। 4
कालक्रमेणाथ बभूव कश्चि-
न्मही-

5. पतिस्तत्र सळाभिधानः
कुलस्य कृत्वा व्यपदेशमन्यं
विस्मारितो येन यदुस्तदाद्यः ।। 5
केनापि व्रति[3]-पतिना स्व-देवकार्य्ये
शार्द्दूलं ग्रसितुमुपागतं नि-

6. हन्तुम् ।
आदिष्टः शशकपुरे स होय्सळेति[4]
प्रापत्तां किळ विनिहत्य होय्सळाख्याम् ।। 6
ततः प्रभृति तद्वंशे प्रवृत्तां होय्सळाख्यया ।
शार्द्दूलश्च ध्वज-

7. स्यासीदंकः शत्रु-भयंकरः ॥ 7
अपरेषु च तद्राज्यं भुक्तवत्स्वथ राजसु ।
विनयादित्य इत्यासीत्क्रमशः पृथिवीपतिः ॥ 8
एरेयंगाभिधानोऽभून्नृपति-

8. स्तस्य चात्मजः ।
गुणैरनन्य-सामान्यैः प्रख्यातः पृथिवीतले ॥ 9
अथ तस्यापि बल्लाळ-विष्णुवर्द्धन-नामकौ
अभूतामात्मजन्मानावुदयादित्य-

9. पश्चिमौ ॥ 10
तेजस्मि(स्वि)नौ भूत-हित-प्रवृत्तौ लोक-पूजितौ ।
यावभासयतां विश्वं सूर्य्याचन्द्रमसाविव ॥ 11
रण-शिरसि येन बलिना गजपतिमाक्रम्य निज-तुरंगेन(।*)

10. विनिपात्य जगद्देवं सप्ता(ं*)गं तस्य चापहृतम् ॥ 12
तत्राग्रजे निजं राज्यमुपभुक्तवति क्रमात् ।
अनुजो(ऽ*)पि चिरं राज्यं बुभुजे विष्णुवर्ध्दनः[5] ॥ 13
यो देशमग्रहा-

11. रीकृत्य समस्तं निजं स्व-राज्यार्त्थम् ।
आचक्रामोच्चंगि-प्रभृतीनन्यान्द्विषद्देशान् ॥ 14
आरभ्य निजनिवासाद्बेळ्वोल-पर्य्यंतमखिलमपि विषयम् ।
आक्रम्य

12. येन धौतं तुरग-वपुः कृष्णवेर्ण्णायाम् ॥ 15
यः स्मार्य्यते नियुक्तैः प्रत्यपचारं नृपेष्वसाध्यतया ।
परमर्द्दिदेव-नृपतेर्होय्सळभव-

13. धारयते मुहुः ॥ 16
येनाग्रहाराः क्रतवो महादानानि षोडश ।
अन्यान्यपि च पुण्यानि पौनःपुन्येन चक्रिरे ॥ 17
नरसिंह इति ख्यातो जात-

14. स्तस्यात्मजो नृपः ।
यस्य वर्ण्णयितुं नैव शक्यन्ते मादृशैर्गुणाः ॥ 18
तस्य श्रीरिव दैत्यारेः शंकरस्येव पार्व्वती ।
आसीदेचलदेवीति महादेवी कुलोद्भूता ॥ 19

15. [Siddham Symbol.] तेनापि तस्यामतुल-प्रभावो
वज्रेश्वराराधन-लब्ध-राज्यः ।
जातः सुतो दोर्व्वल[6]-चक्रवर्त्ती
श्री-वीर-बल्लाळ इति प्रसिध्धः[7] ।। 20
माध्यस्थेनोन्नत्या कांचन-

16. विभवेन विबुध-सेव्यतया
यो जंगम इव मेरुर्म्महीभृतामग्रणीर्ज्जगति ।। 21
सीमातिक्रम-भीरोरतिगंभीरस्य विपुळ-सत्व(त्त्व)स्य ।
रत्ना-

17. करस्य यस्य च न को(ऽ*)पि लक्ष्मीवतोर्भ्भेदः[8] ।। 22
चरितं भरतादीनामपि भुवने तावदेव बोद्यमिह्[9] ।
लोकोत्तरा न यावद्दृश्यन्ते यस्य साधु-गु-

18. णाः ।। 23
विष्णौ निसर्ग्ग-सिध्धां[10] भक्ति[11] यस्याद्य पश्यतां पुंसाम् ।
प्रह्लादादि-कथा[12] अपि न विस्मयाय प्रकल्पन्ते ।। 24
तन्न तपस्तन्नेष्टं तन्न हुतं तन्न दानमस्तीह् ।
अ-

19. सकृन्न येन विहितं देशे काले च [पा]त्रे च ।। 25
स्त्रीष्व[13]र्भ्भकेषु शूद्रेष्वन्येष्वपि येषु केषु चिज्जगति ।
सोऽस्ति न जनो विधत्ते यः पापं यत्र शासितरि ।। 26
षट्तर्क्क-

20. काव्य-नाटक-वात्स्यायन-भरत-राजनीतिषु च ।
अन्येषु तेषु तेषु च शास्त्रेष्वखिलेषु यः कुशलः ।। 27
सर्व्वेषु दर्शनेषु च भुवि तार्क्किक-चक्रवर्त्तिनो

21. यस्य ।
नैवास्ति प्रतिवादी वादि-मद-द्विरद-केसरिणः ।। 28
सर्व्वायुधाजीव-पुरःसरेण
समस्त-विद्वज्जन-वल्लभेन ।
शस्त्राणि शास्त्राणि च येन लोके
स-

22. नाथतामद्य चिराद्गतानि ।। 29
यन्नामधेयमपि विश्व-[वि]ळासिनीनां

लोके वशीकरण-कर्म्मणि सिध्द-मंत्रः[14] ।
तस्य प्रगल्भ-वनिता-कुसुमायुधस्य
23. सौभाग्य-वर्णन-विधौ कतमः समर्त्थः ।। 30
विश्वग्वाजि-खुर-प्रहार-दलित-क्षौणीतल-प्रोच्चल-
ध्धूली[15]-ध्वांत-निमीलिताखिल-दिशि द्वंद्व-प्रदोषागमे ।
दूती-
24. वातिपटीयसी मुहुरिह स्वस्सुंदरीभिः समं
वीराणामभिसारणं वितनुते यत्खड्ग-यष्टिर्द्विषाम् ।। 31
शश्वद्यत्समरावतार-पिशुनेष्वाहन्यमा-
25. नेष्वित-
स्तूर्य्येषु स्व-पति-प्रणाश-चकिताः क्षुभ्यन्त्यराति-स्त्रियः ।
अप्येताः सुभट-स्वयंवर-कृते मंदारमालामितो
हस्ताभ्यां परिगृह्य नाक-
26. वनिताः सज्जीभवंत्यंबरे ।। 32
यस्मिन्होय्सळ-भूमिपाल-धरणी-साम्राज्य-सिंहासना-
दारूढे सति मत्तवारण-पतेर्य्युध्धाय[16] पूर्व्वासनम् ।
सद्य[:] स्व-
27. स्व-कुल-क्रमागत-मही-साम्राज्य-सिंहासना-
त्प्रत्यर्थि-क्षिति-पाळकैरपि रणे वल्मीकमारुह्यते ।। 33
यस्मिन्दिग्विजयार्त्थमुद्यतवति प्रस्थान-भेरी-रवे
28. गंभीरे स्फुटमुच्चरत्यवनिभृत्स्वन्येषु वार्त्तैव का (।*)
दूरादंग-कलिंग-वंग-मगधाश्चोळास्तथा मालवाः
पांड्याः केरल-गूर्ज्जर-प्रभृतयो(ऽ*)प्युज्झन्ति सद्यो धृ-
29. तिम् ।। 34
न्यक्कारेण पितुः श्रियं कळचुरि-क्षत्रान्वयात्कर्षता
येनैकेन हि तूबरेण करिणा षष्टिर्जिता दन्तिनाम् ।
तं च ब्रह्म-चमूपतिं गजघटा-
30. वष्टब्ध-सैन्यं हठा-
द्येनाश्वैरपि केवलै[17]र्भुज-बृता[18] निर्ज्जित्य राज्यं हृतम् ।। 35
उच्छिद्य जैत्रसिंहं दक्षिणमिव तस्य भिल्लमस्य भुजम् ।
वीरेण येन लब्धं कुन्तळ-देशाधि-
31. पत्यमपि ।। 36
[Siddham Symbol.] स च समस्त-भुवनाश्रय-श्री-पृथिवी-वल्लभ-

महाराजाधिराज-परमेश्वर-परमभट्टारक-द्वारावती-पुरवराधीश्वर-यादव-
कुलांबर-द्यु-

32. मणि-सम्यक्त्व-चूडामणि-मलपरोळ्गंड-कदन-प्रचंड[19]-असहाय-शूर[20]-एकांग-
वीर-शनिवारसिध्धि[21]-गिरिदुर्ग्गमल्ल-चलदंकराम[22]-इत्यादि-समस्त-
प्रशस्त-नामावली-वि-

33. राजमान(:*) श्रीमत्प्रतापचक्रवर्त्ति-श्री-वीर-बल्लाळदेवो लोक्किगुंडि-
निवेशित-विजयस्कन्धावारः ।। [Siddham Symbol.]
अस्ति स्वयंभूः ऋतुकाभिधाने
ग्रामे त्रिकूटेश्वर-

34. नामधेयः (।*)
शिवः समस्त-क्षितिपाल-मौलि-
मणि-प्रभा-रंजित-रम्य-पीठः ।। 37
तस्य स्थानाचार्य्यः कालमुखाचार्य्य-संतति-प्रभवः ।
सिध्धांति-[22a]चंद्रभूषणपं-

35. डितदेवाभिधोऽस्ति मुनिः ।। 38
तं त्रिकूटेश्वरं देवं लिंगैस्तैः स्थावरैस्त्रिभिः ।
जंगमेन समं येन चतुः[22b]कूटेश्वरं विदुः ।। 39
सतत-शरीरार्द्ध[23]-स्थित-गौरी-भृश-संगमा-

36. द्वधूष्वद्य ।
शिव इव विरज्यमानो यो भाति ब्रह्मचर्य्यस्थः ।। 40
यश्च ।।
कुल-शैलेषु चलत्स्वपि मर्य्यादामतिपतत्सु सिंधुषु च ।
सत्यं न सत्यवाक्य-द्वितीय-

37. नामा परित्यजति ।। 41
अन्यत्र काव्य[24]-नाटक-वात्स्यायन-भरत-राजनीत्यादौ ।
[नै]व कथासिध्धा (द्धा) न्तेष्वखिलेष्वपि यस्य नास्ति समः ।। 42
येन च ।।
अदृश्येत कदा-

38. चिद्विश्रामो वारिधौ तरंगाणाम् ।
न त्वेव कृपा-भाजा प्रदीयमानेऽश्नतां सत्रे[25] ।। 43
अनेनैव न केवलमपि तु सुवर्ण्णौषधांबु-वस्त्राद्यैः ।
अन्तो नास्ति ज-

39. नानां निरन्तरं तर्प्यमाणानाम् ॥ 44

येन चात्र स्थाने ॥

उध्धृत्य[26] जीर्ण्णमखिलं निर्म्माय च नूतन['] पुरं रम्यम् ।

देवान्तिकमानीता वेश्या-वीथी स्थिता परतः ॥ 45

40. अमृतोपम-पानीय-पूर्ण्णा पुष्करणी[27] कृता ।

वनं च नन्दन-[साम्यं] नानापुष्प-लतावृतम् ॥ 46

किं जल्पितेन बहुना ग्राव-प्राकार-वळय-बाह्यमि-

41. ह ।

यद्यत्समस्ति तत्समस्तमपि तस्य निर्म्माणम् ॥ 47

[Siddham Symbol.] तस्य भगवतश्चराचर-गुरोः श्री-स्वयंभू-

त्रि(त्रि)कूटेश्वरदेवस्यांग-रंग-भोग-खंड-स्फुटित-जीर्ण्णोध्धा-[28]

42. राद्यर्थं विद्या-दानार्थं['] तपोधन-ब्राह्मणादि-भोजनाद्यर्थं['] च वेळ्वोल-

त्रिशतान्तर्गत-होंवाळलु-नामधेय-ग्रामं पूर्व्व-प्रसिध्ध[29]-सीमा-समन्वितं

निधि-निक्षेप-

43. जळ-पाषाणारामादि-सहितं त्रिभोगाभ्य[']तरमष्ट-भोग-तेजः-साम्य-युक्तं

शुल्क-दंडादि-सकल-द्रव्योपार्ज्जनोपेतं शक-नृप-कालातीत-संवत्सर-श-

44. तेषु चतुर्द्दशाधिकेश्वेकादशसु अंकतो(ऽ*)पि १११४ वर्त्तमान-परिधावि-

संवत्सरान्तर्गत-मार्ग्गशीर्ष-पौर्ण्णमास्यां शनैश्चर-वारे सोम-ग्रहणे तस्य

कालमुखा-

45. चार्य्य-सोमेश्वरदेव-प्रशिष्यस्य विद्याभरणदेव-शिष्यस्य सत्यवाक्यापर-

नामधेयस्य श्रीमदाचार्य्य-सिध्धान्ति-[30]चन्द्रभूषणपंडितदेवस्य पाद-प्रक्षा-

46. लनं कृत्वा राज्ञा राजकीयैरप्यनंगुळि-प्रक्षेपणीयं सर्व्व-नमस्यं कृत्वा

धारा-पूर्व्वकं भक्त्या दत्तवान् ॥ [Siddham Symbol.] अस्य च

धर्म्मस्य संरक्षणे फळमिद-

47. मुदाहरन्ति स्म तपो-महिम-साक्षात्कृत-धर्म्मस्थितयो मन्वादयो

महर्षयः ॥

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।

यस्य

48. यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ 48

गण्यन्ते पांसवो भूमेर्गण्यन्ते वृष्टि-बिन्दवः ।

न गण्यते विधात्रापि धर्म्म-संरक्षणे फलम् ॥ 49

अपह-

49. रतः समर्त्थस्याप्युदासीनस्य तैरेव विपरीतमपि फलमुदाहृतम् ॥
स्व-दत्तां परदत्तां वा यो हरेत वसुन्धराम् ।
षष्टिं वर्ष-सहस्राणि विष्ठा-

50. यां जायते कृमिः ॥ 50
परदत्तां तु यो भूमिमुपहिंसेत्कदाचन ।
स बध्धो[31] वारुणैः प्राशैः क्षिप्यते पूय-शोणिते ॥ 51
कुलानि तारयेत्कर्त्ता

51. सप्त सप्त च सप्त च ।
अधोऽधः पातयेद्धर्त्ता सप्त सप्त च सप्त च । 52
अपि गंगादि-तीर्थस्य हंतुर्ग्गामथवा द्विजम् ।
निष्कृतिः स्यान्न देवस्व-ब्रह्मस्व-हर-

52. णे नृणाम् ॥ 53
विंध्याटवीष्वतोयासु शुष्क-कोटर-शायिनः (।*)
कृष्णसर्प्पा हि जायंते देव-द्रव्यापहारकाः ॥ 54
कर्म्मणा मनसा वाचा यः

53. समर्त्थो(ऽ*)प्युपेक्षते ।
स स्यात्तदेव चंडाल(:*) सर्व्व-कर्म्म-बहिष्कृतः ॥ 55
अत एवाह रामचन्द्रः ॥
सामान्यो(ऽ*)यं धर्म्मसेतुर्नृपाणां
काले काले

54. पालनीयो भवद्भिः ।
सर्व्वानेतान्भाविनः पार्त्थिवेंद्रा-[32]
न्भूयो भूयो याचते रामचन्द्रः ॥ 56
मद्वशजाः पर-महीप-

55. ति-वंशजा वा
पापादपेत-मनसो भुवि भावि-भूपाः ।
ये पालयन्ति मम धर्म्ममिमं समग्रं
तेषां मया विरचितोऽजलिरेष

56. मूर्ध्नि ॥ 57
[Siddham Symbol.] बल्लाळदेव-नृपतेरादेशादग्निशर्म्मणा रचिता ।
शासन-पध्धतिरेषा[33] सारस्वत-सार्व्वभौमेण[34] ॥ 58

1. From the photograph in Fleet's *Pali, Sanscrit and Old Canarese Inscriptions*, No. 98, with the help of his transcript.
2. Read *Harir=ddharitrī.*
3. Read *vrati.*
4. *Hoy Saḷa* is a Kanarese expression which means, "Slay, O Saḷa."
5. Read °*varddhanaḥ.*
6. Read *dor-bbala.*
7. Read *prasiddhaḥ.*
8. Read *bhedaḥ.*
9. Read *bodhya*°.
10. Read *siddhāṁ.*
11. *Bhaktiḥ* had been originally engraved; but the lower dot of the *visarga* was effaced.
12. The word *kathāḥ* (accusative plural) has dropped its *visarga* before *api.*
13. Read *strīshv=arbbhake*°.
14. Read *siddha.*
15. Read °*d=dhūḷi.* In many places *l* has been expressed by *ḷ*. This is due to the influence of Dravidian pronunciation.
16. Read °*r=yyuddhāya.*
17. Read °*r=bbhuja.*
18. Read *vṛitā.*
19. Correctly °*chaṁḍ-āsahā*°.
20 Correctly *śūr-aikāṁga*°.
21. Read *siddhi.*
22. Correctly *Rām-etyādi.*
22a. Read *siddhāṁti*°.
22b. Read *chatushkūṭe*°.
23. Read *śarīr-ārddha.*
24. Read *kāvya.*
25. Better read *sattre.*
26. Read *uddhṛitya.*
27. Read *pushkariṇī.*
28. Read *jīrṇṇoddhā*°.
29. Read *prasiddha.*
30. Read *siddhānti*°.
31. Read *baddho.*
32. Read *pārtthiveṁdrā*°.
33. Read *paddhati.*
34. Read °*bhaumena.*

Chapter VII

The Kākatīyas

No. 13—Motupalli Stone Pillar Inscription of Gaṇapati, Śaka 1166, Krodhin (1244-45 A.D.)

Motupalli, Bāpaṭla Tāluk, Guṇṭūr Dist., Andhra Pradesh. E. Hultzsch, *Ep. Ind.*, XII, pp. 188ff.; cf. *An.Rep.Ep.*, 1909-10, pp. 106-07.

Language : Sanskrit and Telugu.

Script : Telugu.

Metres : V. 1, 15, 26 मन्दाक्रान्ता; V. 2, 7 अनुष्टुभ्; V. 3, 5, 16-17, 19-22 मालिनी; V. 4 शार्दूलविक्रीडित; V. 6, 10 वसन्ततिलक; V. 8, 12-14, 23-25, 27 स्रग्धरा; V. 11 हरिणी; V. 18 नर्दटक; V. 28 आर्या; V. 29 उपगीति.

Summary : After invoking the god Svayambhū (Śiva), the family deity of the Kākatīyas, and Gaṇeśa, Sarasvatī, the Moon-god and the Boar form of Vishṇu, the inscription begins the mythical genealogy of the solar dynasty in which was born Durjaya. In his family, Prola I; his son Tribhuvanamalla; his son Prola II; his sons Rudra and Mahādeva; and the latter's son Gaṇapati.—It is an *abhaya-śāsana*, 'an edict [assuring] freedom from fear', to foreigners who traded by sea and whose vessels might be wrecked on the coasts of the king's territories. It is stated that formerly the whole cargo of such ships became forfeited to the state, but that henceforth nothing but the customs duties would be levied on it.—The duties are specified as follows : (1) one in thirty on all exports and imports; (2) on one Tulā (400, 500 or 800 Tolās) of sandal wood—1 Gadyāṇa (Varāha or Pagoda, a gold coin of 48 Ratis or 87.81 grains) and $\frac{1}{4}$ Paṇa (Fanam, a gold coin of 5 or 6 grains): (3) on 1 Gadyāṇa worth of camphor, Chinese camphor or pearls—$\frac{3}{4}+\frac{3}{8}$ Paṇa; (4) on 1 Gadyāṇa worth of rose-water, ivory, civet, camphor oil, copper, zinc, lead, silk-threads, corals and perfumes—1 $\frac{1}{4}$ Paṇas + $\frac{1}{8}$ Paṇa;

(5) on 1 Gadyāṇa worth of pepper—$\frac{3}{4}+\frac{1}{8}$ Paṇa. (6) on 1 measure of silk of all kinds—$5\frac{1}{2}$ Paṇas; and (7) on one lakh arecanuts—1 Gadyāṇa and $3\frac{1}{4}$ Paṇas.—The inscription is dated in Śaka 1166 (expired) which was the year Krodhin of Jupiter's 60 year cycle as prevalent in South India and corresponds to 1244-45 A.D.

TEXT[1]

South Face

1. Siddham Symbol. स्वस्ति श्री-स्वयंभूदेवाय न-
2. मः ॥
इच्छा-सिद्ध्चे (द्ध्यै) हिमगिरिसुता-
3. नंदथोरालवालं
देवं लबोद-
4. र-करिपतिं वंदनैर्न्नंदयामः ।
यस्य
5. क्रीडा-परिणति-भुवो मेरुश्रृंग-स्फुलिंगा-
स्सं-
6. दृश्यंते दुरित-तिमिरोत्सारणाकार्य्य-सू-
7. र्य्याः ॥ 1
तां विधातृ-चतुर्ज्जिह्वारंगै-
8. कोद्योग-नर्त्तकीं (कीम्) ।
वंदेमहि गिरं देवीं संवि-
9. दंबुधि-चंद्रिकां (काम्) ॥ 2
जयति मुकुट-गंगा-[रं]-
10. गदंभस्तरंग-
प्लवन-चतुर-हंसी-विभ्रमा चं-
11. द्रलेखा ।
उपहरति दृशोर्य्या शर्व्व-सर्व्वेश्व-
12. रत्व-
प्रकृति-नियत-मुक्ता-पट्टबंध-प्र-
13. तीतिं ।(तिम् ॥) 3
देव(:*)श्री-कमनीय-यव्व(यौव)न-वन-क्रीडा-
14. यिताम्रेडन-
स्वातंत्र्यानुगृहीत-सू-

15. करतनुः पु[ष्णा]तु वो वांछितं(तम्) ।
क्षोणी-
16. मुद्धरतो महाब्धि-जठराद्विक्रां-
17. त-नीराजनं
चक्रे यस्य फणीश्वरो निजफ-
18. णा-माणिक्य-दीपोत्करैः ।(।*) 4
अधिजलनिधि
19. शेषे को(ऽ*)पि पर्य्यंक-शेषे
विहरति कि-
20. ल देवः पद्मवासासहायः ।
प्रस-
21. व-सवन-यष्टो(ष्टा) विष्टपानाममु-
22. ष्य
स्वयमजनि हि नाभी-पद्मतः पद्म-
23. योनिः ॥ 5
विश्वैनसां च तमसां च निरा-
24. करिष्णु-
रंभोरुहां च हरितां च विका-
25. स-हेतुः ।
तस्येक्षणाज्जगदशेषमि[दं]
26. सिसृक्षो-
राविर्ब्बभूव भगवानय-
27. मंशुमाली ॥ 6
ततो मनुरभू-
28. न्नाम्ना शेखरं नयदर्शिनां(नाम्) ।
विश्व-
29 राजन्य-मूर्द्धन्यश्चूडामणिरिवा-
30. परः ॥ 7
क्ष्वाकार्णा(कुर्ना)म तस्मिन्नभवद-
31. भिजने भूभुजां चक्रवर्त्ती
साक्षा-
32. च्छ्रीवत्सवक्षाः स्वयमुदित इव

33. त्रातुकामो धरित्री(म्*) ।
एकच्छत्रं समस्तं
34. जगदनुभवतो यस्य स-द्वीप-मालं
35. भ्रूकैंकर्य्याणि चक्रे समुपहृ-
36. त-करं विश्व-राजन्य-चक्रं(क्रम्)।(।*) 8
आ पूव्वा(र्व्वा)त्प-
37. र्व्वतेंद्रादमरकरि-तट-क्रीडितोच्चा-
38. वचाग्रा-
दा च प्रत्यङ्महीध्राद्वरु-
39. ण-पुरवधू-दत्त-संकेत-शृंगात् ।
यस्यान्यस्वाम्य-शून्यं क्रम-समु-
40. पनतं क्षेत्रमाहुर्द्धरित्रीं
41. भूमा-
42. विर्भ्मा(र्भ्मा)व-भूमौ समजनि जनने तस्य
43. मांधातृ-नामा ।(।*) 9
शासन्महीं परिहृ-
44. तान्य-नृपातपत्रां
तद्वंश-मौक्तिक-
45. मभूत्सगरो नरेंद्रः ।
यस्याश्वमे-
46. ध-तुरगं भुवि मार्ग्गमाणैः
खातस्त-
47. नूज-निवहैरयमंबुराशिः ।(।*) 10
अध(थ)
48. निरवहत्सर्व्वामुर्व्वीधुरां स भगीर-
49. थः
कठिन-कपिल-क्रोधालीढ-स्व-वंश्य-वि-
50. मुक्तये ।
गगनशिरसो गंगां रुद्रो-

East Face

51. त्तमांगमतश्चिरा-
दवनिमनघैस्ता-
52. दृग्भिस्तैस्तपोभिरनीनयत् ।(।*) 11
मान्येस्मि-

53. न्नन्ववाये जनिमकृत रघुर्ज्जैत्र-या
54. त्रा-प्रसंग-
प्रेंखद्गंभीर-लंबा-पटह्-रव-
55. भयोद्भ्रांत-विद्वेषि-पांथ:(पार्थः) ।
अश्वं य-
56. स्याश्वमेधं क्वचिदपहरतो भाति प-
57. त्युः सुराणां
प्रत्यंगं यत्कलंब-त्र-
58. ण-पटलमिवाक्षीणमक्ष्णां सहस्रं(स्रम्)।(।*) 12
आसी-
59. दा चक्रवालात्प्रणतिषु चरणाक्रांत-राज-
60. न्य-चक्र-
61. स्तत्संतत्यां महत्यां तदनु दश-
र[थो] नाम राजाधिराजः ।
पूर्व्वं स्वर्गोप-
62. सर्गे त्रिदश-परिवृढं पुंगवीभूतमारा-
दा-
63. रुह्यासह्य-शौर्य्योत्पल-भुजमवधीदं-
64. बरे शंबरं यः ।(।*) 13
प्राग्दिष्टैव्वि(र्व्वि)ष्टपानां तदनु द-
65. शरथः पुत्रकामेष्टिमिष्ट्वा
पुत्री जातस्त-
66. दास्तामरपुर-वहो राम-नाम्ना त्रि
67. धाम्ना ।
येन प्राबंधि सिंधौ प्लवग-बलवता बं-
68. धुरः को(ऽ*)पि पंधा(था)-
स्तूर्णं निस्तीर्णमर्ण्णः किम-
69. परमसवो लुंठिता दाशकंठाः ॥ 14
सत्यं भ-
70. द्रासननिभ-भुजावत्तया वीरलक्ष्म्या
जात-
71. स्तस्मिन् क्षितिपति-कुले दुर्ज्जयो नाम राजा ॥(।)
यद्यात्राया हय-खुर-रजः-पीत-
72. [तो]याः समुद्रा

73. लोपामुद्रा-दयित-
74. चुलुकात्याहितानां स्मरंति ।(।*) 15
अथ निरविशदु-
75. र्व्वी तत्कुलोदन्वदिंदुः
सकल-जलधि-वेला-मेख-
76. लां प्रोलराजः ।
कनदुरु-करवालाकालका-
77. लांबुवाहा-
भ्युदय-हृ(हृ)दय-शल्य-प्रद्र-
78. वद्राजहंसः ।(।*) 16
कुलगृहं(ह)ममलिम्नो जन्म-
79. भूमि ल(म)हिम्नः
पदमतिमधुरिम्णः प्रेम-
80. धाम प्रथि(थि)म्नः ।
प्रतिनिधिमुदधीनां संच[यं]
81. तोय-सृष्टे-
रतुलमकृत केसय्यख्यिया
82. यस्तटाकं(कम्)।(।*) 17
अथ चतुरंबुराशि-रशनां
83. भुवमस्य सुत-
स्त्रिभुवनमल्लदेव इति
84. भूमिपतिर्ब्बुभुजे ।
निज-भुज-दर्प्प-संप-
85. दसमर्प्पित-क्लु(क्लृ)प्त-कर-
प्रतिभट-गंड-कंठ-प-
86. रिमोटन-चंड-भुजः ।(।*) 18
अशिषदथ समस्तां त-
87. स्य पुत्रो धरित्री-
मशनिमति(रि)-नृपाणां भूप-
88. तिः प्रोलराजः ।
प्रतिसमर-धरित्रि-प्रद्र-
89. वच्छत्रु-सेना-
चरण-बहल-धूली-पं-

90. किळ-व्योम-गंगः ।(।*) 19

अथ भुवमधिचक्रे त-

91. स्य पुत्रः समंता-

त्करद-नृपति-चक्र(ं*) श(च)क्र-

92. वालादि-वप्रां(प्राम्) ।

डमर-समर-रंग-त्वंगद-

93. श्वीय-शश्व-

द्विहितमहित-भूभृद्विद्रवो

94. रुद्रदेवः ।(।*) 20

अथ निज-भुज-शैले तत्कनीयानशे-

95. षा-

मधित ड(ध)रणिमेनां श्री-महादेवराजः(।*)

96. प्रणति-विमुखमासीद्यद्रणे कांदिशीकं

गि-

97. रि-तट-गृहमेधि क्ष्मापतीनां कुटुंबं(बम्) ।(।*) 21

श्रम-

98. रतरुरिवाब्धेरत्रि-नेत्रादिवें दु-

स्स्मंदन इव

99. मुकुंधा(दा)ल्लोचनानन्द-दायी।

अध(थ) गणप-

100. तिदेवः श्री-महादेवराजा-

दजनि भुवन-भू-

101. त्यै भूभुजां चक्रवर्त्ती ।। 22

यावद्यज्जैत्र-

North Face

102. यात्रा-तुरग-खुर-रजः-पंकिळा

103. व्योम-गंगा

ताड्यंते तावदेवं शत-

. मख-नगरी-वीथि-पुंजेषु गुंजाः ।

105. पाथः पौरोगवा वश्चिनुत वितनु

106. वाधोरणंरावणं ते

प्रत्यूषे

107 स्नातमुच्चै(:*)श्रवसमपि तदा पा-

108. ययस्वाश्ववार ।(।*) 23

कोलांको(ऽ*)भू-

109. न्मृगांको न वसति कमले श्रीरिति श्री-व-

110. राहः

प्राप्तो नैषा प्रियस्योर[सि]

111. रति-विरतौ लग्न-गंडं प्रसुप्ता ।

इ-

112. त्यालापे सखीनामुषसि स-कु-

113. तुकं स-त्रपं सानुतापं

हस्ता-

114. भ्यां यद्रिपुस्त्री विनमित-वदना

115. गंडपाली पिधत्ते ।(।*) 24

कंडूलाखंडलै

116. रावण-कट-कषण-क्षोभ-संभ्रांत-

117. भृंगी-

संगीताकल्प-कल्पद्रुम-वन-

118. विटप-व्रात-धा(दो)लाधिरूढाः ।

119. गायं गायं रमंते सुरपु-

120. र-सुधृ(सदृ)शोविक्रमं यस्य तादृ-

121. क्

संग्रामारंभ-लंबा पटह-रव-

122. दुरातंक-ताम्यत्कलिंगं(गम्) ।(।*) 25

यात्रा-

123. रंभे दिशि दिशि पुरः प्रस्थितैर्द्दंडपा-

124. लै-

र्ग्ग(र्ग्गै)डोत्कीर्ण्णः प्रतिगिर(रि)-तधि(टं)वैज-

125. यन्ती-वराहः ।

यद्दोस्तम्भे प्र[ल]-

126. य-जलधेरुधृ(द्धृ)ता न्यस्य पृथ्वीं(र्थ्वीं)

[त]-

127. त्कालीन-श्रम-विधुतये तिष्ठती[वा]-

128. दि-कोलः ।(।*) 26
मेरोः स्वैरोपरिखन्मघ-
129. व-मणि-घृणि-ग्राम-जाग्रत्तमिस्रा-
130. विस्रब्धारब्ध-तत्तन्मधुर-निधुवना-
131. विद्धयोः सिद्ध-यूनोः ।
आसंन-स्व-
132. र्णकूट-स्थि[त]-सुरविटए(पि)-[स्कन्ध]-दोला-
133. धिरूढ-
स्वर्गस्त्री-वर्ग्ग-गीरा(ता) नुदिन-
134. मभवन्यद्यशास्यंतरायः ॥ 27
135. तेनानेन श्री-गणपतिदेव-म-
136. हाराजेन सकल-दीपांतरी-
137. य-देशांतर-पट्टनेषु गता-
138. गतं कुर्व्वाणेभ्यः सांया-
139. त्रिकेभ्य एवमभय-शास-
140. नं दत्तं(त्तम्)। पूर्व्वं राजानः
141. पोत-पात्रेष्वन्य-देशाद्देशां-
142. तर-प्रवृत्तेषु दुर्व्वातेन समा-
143. पतितेषु भग्नेष्वतीर्त्थसंगते-
144. षु च संभृतानि कनक-करि-तुर-
145 ग-रत्नादीनि वस्तूनि सकलानि
146. बलादपहरंति । वयम-
147. पि प्राणेभ्यो(ऽ*)पि गरीयो ध-
148. नमिति समुद्र-यान-कृत-

West Face

149. महासाहसेभ्यस्तेभ्यः वलु(क्लृ)प्त-शु-
150. ल्कादृते कृपया कीर्त्यै धर्म्माय च
151. सर्व्वं वितराम इति ॥ तत् शुल्क-
152. परिमाणं एक्कुमटि डिगुम-
153. टिनि सुर्प्पयिटनु ओक्कटि(।*)
154. श्रीगंधमु तुलामु ओक-
155. टिकि । ग १ < । कर्प्पूरमुनकू
156. चीनिकर्प्पूरानकू सुत्याल-

157. कू वेल । ग १ कि <।।। ☰ पंनीरु(।*)
158. दंतमु जवादि कप्पूर-तै-
159. लमु रागितगरमु रि[से]-
160. य-सीसमु पट्टुनूलु प-
161. वडमू गंध्यद्रव्यालकू-
162. नु वेल । ग १ कि < १। – मिरिया-
163. ल वेल १ ग १ कि <।।। – पट्लु एल्ल
164. वानिकिन्नि स्वरूपमु ओकटिकि-
165. नि<५।। पोंकलु लक्ष ओक्कटिकि-
166. नि । ग १<३।(।।*)
षट्षष्ट्यधिकैकाद-
167. श-शत-संख्ये क्रोधि-नाम्नि श-
168. क-वर्षे ।
मोट्टुपल्य(ल्ल्य)भिधाने
169. [देश्यू]यक्कोंडपट्टने मह-
170. [ति ।:] 28
गणपतिदेवः कीर्त्यैं स्थापित-
171. [वांश्छा]सन-स्तंभं(भम्)।
कलिका-
172. [ल]-कर्द्दम-स्खलदनादि-धर्म्मा-
173. वलंबन-यष्टिमिव (।।*) 29
श्री(: ।।*)

1. From the illustration in *Ep. Ind.*, XII.

No. 14—Pākhāl Stone Pillar Inscription of the time of Gaṇapati (1199-1261 A.D.)

Pākhāl, Warangal District, Andhra Pradesh.

L. D. Barnett, *Hyderabad Archaeological Series*, No. 4, pp. 2 ff.; cf. *Kākatiyasaṁchika*, App., pp. 50 ff.

Language : Sanskrit (with Telugu).

Script : Telugu.

Metres : V.1 *Āryāgiti*; V.2 *Anushṭubh*; V.3 *Śārdūlavikrīḍita*; V.4 *Anushṭubh*; V.5 *Sragdharā*; V.10 *Hariṇī*; V.11 *Śikhariṇī*; V.12 *Sragdharā*; Vv.13-14 *Pushpitāgrā*; Vv.15-17 *Sragdharā*; V.18 *Mālinī*; V.19 *Sragdharā*; V.20 *Śārdūlavikrīḍita*; V.21 *Śikhariṇī*; V.22 *Sragdharā*; Vv. 23-25 *Śārdūlavikrīḍita*; Vv. 26-28 *Nardaṭaka* (*Avitatha* or *Kokilaka*); V. 29 *Sragdharā*; Vv. 30-31 *Śārdūlavikrīḍita*; Vv. 32-33 *Sragdharā*; V. 34 *Śārdūlavikrīḍita*; V. 35 *Nardaṭaka*; Vv. 36-40 *Anushṭubh*; V.41 *Śārdūlavikrīḍita*.

Summary : The inscription begins with an adoration to the gods GAṆEŚA, VARĀHA and ŚIVA and introduces the KĀKATĪYA king GAṆAPATI; reference is next made to PADMANĀBHA (Brahman); his eye-born son the SUN-GOD; his son MANU; in his family IKSHVĀKU; in his family MĀNDHĀTṚI; in his family SAGARA; in his family BHAGĪRATHA; in his family DAŚARATHA; his son RĀMA; in his family KALIKĀLACHOLA (KARIKĀLA); in his family DURJAYA; in his family PROLA; in his family RUDRA I; his younger brother MAHĀDEVA; his son GAṆAPATI who claims [conventionally] success against the kings of KĀŚĪ, KALIṄGA, ŚAKA, MĀLAVA, KERALA, TUMMĀNA, HŪṆA, KURU, ARIMARDA, MAGADHA, NEPĀLA and CHOLA. Gaṇapati's subordinate was BAYYANA-NĀYAKA whose wife was BĀCHAMĀMBĀ; their son GAṆAPATI; his younger brothers NALLAGAṆAPA and JAGADĀLA-MUMMAḌI The said JAGADĀLA-MUMMAḌI, subordinate of the Kākati king, made the grant of a temple and five *nivartanas* of land, together with a tank, in favour of the god Rāmanātha (Śiva).

TEXT[1]

First Side

1. स्वस्ति श्री[:](।*)
स जयति कळभ-मु-
2. खो यः
कट-तट-मद-मा-
3. दित-निनददळि-गरद-नीलैः(।*)
4. पूरयति कर्ण्ण-श(ं*)खं
स्व-भ-
5. जन-निरत-जन-सकल-कुश-
6. ल-विभूत्यै ॥ 1
श्रियं दद्याद्वरा-
7. हो[2] वः सिंधोर्य्यस्योद्गतस्य
8. भूः(।*)
मुहूर्त्तमकरोत्पोत्र-
9. लग्न-शैवल-विभ्रमं(मम्) ॥ 2
10. भूयाद्वः क्षणदा-ललाम-
11. जगतो-निर्व्वेश-धाम-त्रय-
स्त्रिंश-
12. त्कोटितयासतां सुमनसा-
13. मायुष्यमेकौषधं(धम्) ।
आका-
14. श-व्यपदेश-धूर्ज्जटि-जटालंका-
15. र-गंगा-पयः-
कल्लोलैकल-कल्हक[3]-च्छ-
16. द-निभानंदाय चांद्री कला ॥ 3
17. एतन्माद्यन्महीराज-गज-केसरि-विभ्र-
18. मं(मम्)(।*)
गणपत्यवनींद्रस्य शास-
19. नं चक्रवर्त्तिनः ॥ 4
क्षीरोदे रुद्ध-
20. रोधः-कुहरमविरतं दिक्षु रं-

21. गतारंगे

तन्वानो योगनिद्रामिव

22. स विहरते पद्मया[1] पद्मनाभः (।*)

23. तन्नेत्रान्पद्ममित्रं समजनि भु-

24. वन-ध्वांत-जंबाल-जृंभा-

गाढा-

25. बष्टम-मूर्द्धोदय-किरण-स-

26. [र]ी-सानुमान्भानुमाली ॥ 5

मन-

27. स्मवत्वमप्यमात्रादिमः क्ष्माप-

28. तीनां

स्थिर-नियमित-चातुर्वर्ण्य-

29. धर्म्म-व्यवस्त.[8] ।

तट इव पुनरम्भोरा-

30. शिभिर्ज्जातु नोकं-

र्न्नं मनु यदुपदि-

31. ष्टो लघ्यते नीति-मार्गः ॥ 6

पश्चात्तद्र-

32. गजस्तामशिपदानितर-क्षामृदिश्वा-

33. कुर्व्वी

वक्षोवापाम्त-दंन्यो वि-

34. वमसि-लतया जन्य-जिह्माल-बाहु[:] (।*)

35. यान्त्राया यस्य धाटी-चटु-

36. ल-हय-घटा-धूलि-वारं स्वारं-

37. रप्यामी[9] वक्त्रान: क्षितिभृदनुक-

38. न पांसुनोत्संग-भृगः ॥ 7

त-

39. स्मिन्नजनि माधाना वशे गजा म-

40. ह(हा)भुजः (।*)

मामयं घास्यनो-

41. न्युर्व्वी स्वयय[10] यस्य स्तनं ददौ

42. ॥ 8

तद्वंशान्यांशुमाली गर इव

43. गगन[11] गात्रवाणामथामी-
न्नामीरं-
44. कागवीगयित-मण- विसमनवुरा मे-
45. प्रकगाश ।
गर्भा (र्भा) वर्भोनिधेः क्षमा-
46. मक्रवृवहरविन्याविकोलः स्व-
47. य यो
ममृदु यम्नामना-
48. नाग्यवकृत पुनः स्थाम-सोमा-
49. वनंम (मम) ॥ 9
प्रजनि जनने तस्मिन्ना-
50. काश-गंवलिनी-धग-
वनरण-मणि-श्रेणी-
51. निश्रेणिरूप-नपो-वनः ।
हरिविम-घटा-
52. नानोद्गाढ-भ्रम-प्रतिपादन-
क्षमन-
53. म-जय-स्तवः क्षोणीपतिः म अगार-
54. [य]: ॥ 10

Second Side

55. कृते तस्मिन्नामोदनुन-बन-गाना [illegible]
56. [मु]रस्त्री-संगीत-प्रमुमर-मुद्रा-विक्रम-
57. कथः ।
मरुन्वत्प्रीत्यै यो व्यतनुत र-
58. णे शंबर-शिरः
करोटीभिः
59. क्रोडीकृत-मित-पुटीमबंर-तटी (टीम्)
60. ॥ 11
तस्मात्त्राता त्रयाणां समज-
61. नि जगतां जंगम-स्थावरात्म-
व्यक्त्या-
62. त्मा मद नहृत्याः[3] कृतजगदमिताप-

63. द्विरामः स रामः ।
सिंधौ
64. गंत्री-पथं यो व्यतनुत पृ-
65. थुना सेतुना यातुधाना-
ना-
66. ख्या-शेषानकार्षीत्किमपरमकरोद-
67. ंतकास्ये दशास्यं(स्यम्) ॥ 12
उदभवद-
68. थ भूतलैक-वीर-
स्तदभिजने कलिका-
69. लचोळदेवः(।*)
प्रणतिषु चरणौ नृ-
70. पा यधीयौ[14]
द्विगुणमवादल-
71. यन्किरीटभासा ॥ 13
समजनि किल तत्कु-
72. ले नरेंद्रः
कुल-गिरि-सांद्र-भुजो(ऽ*)ध[15]दु-
73. र्जयाख्यः ।
प्रति-तुटि किल यं प्रण-
74. भ्य भूम्यां
पदमलभंत सप-
75. त्न-भूमिपालाः ॥ 14
राज[16]स्तस्यारिरा-
76. सीत्पुनरभिजनने जैत्र-लक्ष्मी-निवा-
77. सो
लक्ष्मीवान्वासवादप्यहित-
78. गज-घटा-केसरी प्रोलरा-
79. जः(।*)
यस्याज्ञा वै निधत्ते पदमव-
80. निभृतां मूर्द्धि[17] पण्णंति[18] जैत्र-
स्तं-
81. भाश्चेते[19] जृंभमानाः प्रति-हरि-

82. दजरं दिग्गजाळाण-लीला(म् *) ॥ 15
स्तुत्वा-
83. लं सो(ऽ*)पि तस्मिन्नजनि किल [कु]ले रुद्रदे-
84. वक्षितीन्द्रः
सांद्रा रात्राविवा-
85. हन्युपहरतितरां चद्रिका
86. ॅयस्य कीर्त्तिः ।
किं चासीदा-दशाशा-
87. कुहरमहरहः प्रेंखदंशु-प्र-
88. रोह-
प्रस्फूर्ज्ज-[20]द्वादशार्क्क-व्यतिक-
89. र-निबिड-प्रौढ-तापः प्रतापः ॥ 16
त-
90. त्सोदर्य्यः समुध्रो[21]त्तरलतर-तर-
91. ॅगावली-धौत-वेला
संक्रीडध्व्यूढ-[22]से-
92. ना-सुभट-शकटिका-नेमि-सेमंति-[23]
93. ताशः (।*)
कृत्वा पृथ्वीं निरस्तेतर-धरणिपति-श्रेणि-
94. मुक्तातपत्रां
तन्वन्नेकातपत्रांनुदि-[24]
95. त-नीज-[25]भुजे तां महादेवराजः ॥ 17
प्र-
96. थ गणपतिदेवस्तस्य पुत्रो धरित्रीं
चि-
97. रमशिषदशेष-क्ष्माभृतां चक्रवर्ती ।
98. प्रवतमस-धटीव प्रौढिमभ्यंति[26] भा-
99. नौ
पदमकृत तदानीन्नान्य-राजन्य-
100. सत्ता ॥ 18
कोलांको(ऽ*)भून्मृगांको न वस-
101. सि कमले श्रीरिति श्री-वराहः
प्राप्तो

102. नैषा प्रियस्योरसि रति-विरतौ लग्न-
103. गंडं प्रसुप्ता ।
इत्यालापे सखीनामु-
104. षसि स-कुतुकं स-त्रपं सानुतापं
ह-
105. स्ताभ्यामात्मनो यत्प्रतिभट-तरुणी
106. गंड-पाली पिधत्ते ॥ 19
हस्तैरावृणुता-
107. ननं मृगदृशो न चेन्मृगांक-भ्रमा-
108. त्रंदन्कृंदति[27] पोत-पा[त्र]मुद-
109. धिस्तुंगैस्तरंगोत्करैः (।*)
इत्थं य-
110. त्प्रति-भूभृता(*) प्रतिदिशं द्वीपांत-
111. रं गच्छतां
शुद्धा(द्धां)त-प्रमदाः स-भी-
112. ति-स-दयु[28] शंसंति सांयात्रि-
113. काः ॥ 20
प्रणेमुस्ताम(।*)शामनिशम-
114. ति-संत्रास-तरला
महीपाला
115. यस्यां वसति वसुधेन्द्रो ग-
116. णपतिः ।
न चेन्नस्तध्धाटी-[29]तुरग-खु-
117. [र-नि]ल्लोंठित-शिरः-
करोटी-संघ-
118. —UUU निकटे स्युः पुर इति ॥ 21

Third Side

119. काशीनाथः कलिंगः शक-धरणिपतिर्म्मा-
120. लवः केरलेश-
स्तौंमाणो हूण-भू-[30]
121. पः कुरुपतिररिमर्द्दाधिपो माग-
122. धेशः
नेपाळाश्चोळ-पृथ्वीपतिरिति विन-

123. तानग्रतो राजवर्ग्गा-
ग्राम-ग्राह-
124. [ं] गृहीत्वा सदसि सदसि यध्दर्शका[31]
125. [द]र्शयंति ॥ 22
तस्यासीत्प्रथमं प्र-[32]
126. थमं प्रधानमपरं चेतो द्वितीय-
127. ंवपुः
श्रीमद्बय्यन-नायकः कि-
128. मपरं निस्सीम-विस्रंभ-[33]भूः (।*)
129. प्रत्यर्त्थि-क्षितिपाल-मंडल-पुरी-लु-
130. ंटाक-दोश्चंडिम-
स्वैर-स्मारित-राम-
131. भार्ग्गव-पृथा[34]पुत्रादि-चित्राहवः [॥] 23
132. आसीदब्धि-सुतेव कैटभ-रिपोः श्री-ब्राच-
133. मांबा पदं
प्रेम्णो बय्यन-नाय-
134. कस्य गृहिणी-[35]चर्य्यापरारुंधती ।
त-
135. स्यां तस्य तु विद्वनो[36] गणपतिः स[र्व्व]-
136. ंसहा-जन्मनां
सर्व्वेषां सुकृतोद-
137. यैः सुमनसां जातः स पुत्रात्म-
138. ना ॥ 24
तस्यासीदन्ताजः[37] स नल्ल-गणप-
139. : स्वर्ल्लोक-कल्लोलिनी-
नैर्म्मल्यातिशय(।*)-
140. तिलंघन-कला-जंघाल-की[र्त्य]ा-
141. करः ।
यस्य त्याग-कला-पलायन-
142. परा नैव श्रयंते दृशोः
पंथा-
143. नं मरुतां निरंतर-मनो-

144. दैन्यावदान्या धृमा:[38] ।। 25
अथ जग-
145. दाळ-मुंमडिरभूत्सुकृतैर्ज्जग-
146. तां
क्षिति-भरणं ततान भुजयोः
147. स तयोरनुजः ।
बलि-बलभद्र-कद्रुत-
148. नयेंद्र-कुलाद्रि-कुल-
प्रसृमर-सार-ड-
149. [ब]र-विडम्बन-शौंड-भुजः ।। 26
जगद[38a]-
150. ल-मुम्मडेरयममुष्य कृप-
151. ण-विटः
प्रतिभट-राज-वक्त्र-शतपत्र-
152. वनी-मधुपः ।
जयति जगत्रयीं[39] त-
153. दवरोधन-वामदृशां
स्मित-कुसु-
154. मास-विग्रहण-दोहळ-दुर्ल्ललितः ।। 27
155. आदि-क्रोडावगाह-प्रकट-परिभव-
156. स्ताक्ष्र्य-संक्षुण-कुक्षि-
माथ-ग्रा-
157. वात्त-गंडः किमपरमपरिनिद्रौर्व्व-
158. निर्व्वासितांभाः ।
तत्त-द्दुङ्खापनु-
159. त्यै[40] श्रित इति जलधिः शंकु-मानं व्य-
160. धाद्यो
हृद्यं मौद्गल्य-तीर्थे निज-
161. तट-विलठद्दिक्कटाहं तटाकं(कम्) ।। 28
गां-
162. भीर्य्याद्यस्य तोये हिम-गळ-गरळा-
163. पास्त-शोषः स शेषो
वैपुल्याद्वारि-केलि

164. विदधति युगपद्यत्र ता दिक्तरुण्य: ।
165. तुंगत्वाल्लंघयंति त्रिदिव-पुर-वनी-
166. वाहिनीं यत्तरंगा
यस्मिन्नर्क्केंदु-बि-
167. 'बौ प्रतिनिधि-विधया मज्जतो वार्द्धि-बु-
168. ध्या[41] ॥ 29
वैडूर्य्य-द्विति-[42]सोदर-द्विति-[42]
169. जलं यं वीक्ष्य रोध-स्थली
चंच-
170. त्चंपक-[43]चूत-सौरुभ-[44]मिळ-
171. त्सौरभ्य-सौगन्दिकं[45] ।
श्लाघं-
172. ते न जना कदापि सरसे सा-
173. रस्य रेखा-विदो
नाच्छोदाय
174. न मानसाय न पुन: पंपा-
175. भिधानाय च ॥ 30
आसन्न-स्थित-
176. रामनाथ-मुकुटापीडेंदु-रेखा-
177. सुधा-
स्रोत:-पूरित-सारणी-ग-
178. ण-परिष्वंगानुषंगादिव (।*)
य(:*)
179. स्वैठं[46] स्वदते तुषार-लघुभि[स्तो]-
180. यैस्तटाकोत्तम:
कर्त्ता तस्य च यो
181. विशंकट-तड:[47] वर्द्धंद्रू-सूर्य्या-
182. द्भुव: ॥ 31

Fourth Side

183. चंद्रादित्याशुशुक्षण्यनिल-जल-वि-
184. यन्मेदिनी-होतृताभि(:*)
स्पष्टीभूता-

185. ष्ट-मूर्त्तिं यमनुतुदि निरा-
186. कार इत्यामनंति[48] ॥
तस्यैतस्या-
187. भिषेकोचित-सलिल-कृते रामना-
188. थस्य यो(ऽ*)यं
जागर्त्यत्यंत-शीतो
189. लघिम-कुल-गृहं हारि-मा-
190. धुर्य्य-धुर्य्यः ॥ 32
एकेन ब्रह्म-
191. विष्णु-त्रिपुरहर-महस्सार-
192. शूरं त्रिशूलं
बिभ्राणो(ऽ*)न्ये-
193. न चोपर्य्यमृतकर-कनद्बिंब-
194. खेळं कपाळं(लम्)।
हस्ताभ्यामप्यध-
195. स्तादभयद-वरदे लांच्छने संनिध[त्ते]
196. यत्रोत्तालाट्टहासोड्डमर-रव-म-
197. हाभैरवो भैरवो(ऽ*)पि ॥ 33
तत्क-स्तौरि[49]-निरी-
198. क्षण-क्षण-परिभ्रष्टीभवद्विष्टप-
व्यू-
199. ह-प्राक्तन-जन्म-कोटि-घटितोद्वेलाघ-
200. कोलाहलं(लम्)।
मौद्गल्यस्य पवित्रमा-
201. श्रम-पदं यत्राविरास्ते निजो
ह-
202. स्ति-व्यापृत-डिंब-लुंपन-कटी-घंटा-
203. रवो भैरवः ॥ 34
व[द]न-भुजोरु-पाद-म-
204. नुषामनुजाति सदा-
तन-धन-धान्य-सौ-
205. ध-नियुताभ्यधिकाभ्युदयं(यम्) ।
ग-

206. णपपुराख्ययाप्यकृत यः पुरम-
207. स्य दृढ-
स्थिति सरसस्तटौ निबिड-च[ं]पक-
208. चूत-वनं(नम्)॥ 35
यत्र श्री-रामनाथस्य
209. चूडा-चन्द्रांशु-तापिताः ।
चंद्र-
210. कांत-चितास्सौथा[50] ग्रीष्मं मुषा वित-
211. न्वते ॥ 36
करोति यस्य सौधेषु गायं-
212. तीनां मृगीदृशां(शाम्) ।
गीताकृष्ट-मृगश्च-
213. ंद्रस्त्रियामा बहु-यामिनीः
214. ॥ 37
हंसा यत्र विमुञ्चंति न कदा-
215 पि जलाशयान् ।
तपस्यन्त इव क्षीणा-
216. ंलभ्यं गमन-कौशलं(लम्) ॥ 38
आलापै-
217. र्य्यत्र कांतानां कलकंठाः
218. पराजिताः ।
व्रीडयेव वहिः
219. क्वापि विचरंति वने वने ॥ 39
यत्रें-
220. द्रनील-प्रासादे तारकाः प्रति-
221. बिंबिताः ।
स्पृशंतीं कुसुम-
222. भ्रांत्या हसत्येकां स[खी]-
223. जनः ॥ 40
श्रीमत्कार्कति-राज-व-
224. ंश-भजन-ख्यातात्म-वंश-क्रम[:]
225. श्लाघा-संतति-शासनं कव-
226. यतां यश्चक्रवर्त्ती व्यधा-

227. त्(।*)

तस्मै श्री-जगदाळ-मुंम-

228. डिरदादस्यां पुरि प्रोन्नतं

229. सौधं पंच निवर्त्तनानि च

सदाश्लिष्टानि सस्य-श्रिया ॥ 41[51]

1. From the facsimile in *H.A.S.*, No. 4.

2. Boar, the third of Vishṇu's incarnations, was the device of the Kākatīya (also called Kākati or Kākatī) kings.

3. Read *kalpaka.*

4. Read *padmayā.*

5. Read *musht-odaya.*

6. Read *vyavasthaḥ.*

7. Read *ghaṭā.*

8. Read *bhārai°.*

9. Read *°sīch=chakra°.*

10. The second *yaṁ* is superfluous.

11. Read *Sagaraḥ.*

12. Read *sukha.*

13. Read *sadma.*

14. Read *yadīyau.*

15. Read *bhujo='tha.*

16. Read *rājña°.*

17. Read *mūrdhni.*

18. Read *pushṇanti.*

19. Read *°bhāś=ch=aite.*

20. Read *prasphūrjjad=dvāda°.*

21. Read *samudro.*

22. Read *°krīḍad-vyūḍha.*

23. Read *sīmanti°.*

24. Read *°patrām=udita.*

25. Read *nija.*

26. Barnett points out the use of *anti* with accusative in the expression *bhashmānti* in *Bhāgavata P*, IX. 8.19.

27. Read *kṛintanti.*

28. Read *sadayaṁ.*

29. Read *°d=dhāṭī.*

30. The list is conventional. Hūṇa and Śaka may indicate the Musalmans. Arimardana is the modern Pagan in Burma. Tummāṇa was the seat of a branch of the Kalachuri family.

31. Read *yad=darśa°.*

32. The second *pratthamaṁ* is superfluous.

33. Read *viśrambha.*

34. Read *pṛithā°.*

35. Read *gṛihiṇī.*
36. Read *viddhano.*
37. Read °*sīd=anujaḥ.*
38. Read *drumāḥ.*
38a. *Jagadāla* does not suit the metre.
39. Read *jagat-trayīṁ.*
40. Read °*panuttyai.*
41. Read *buddhyā.*
42. Read *dyuti.*
43. Read *chañchach-champaka*
44. Read *saurabha.*
45. Read °*gandhikam.*
46. Read *svairam*
47. Read °*tato*
48. Read °*manant* .
49. Read °*sthaur* .
50. Read °*s=saudhā.*
51. An endorsement in Telugu in lines 231-35, means : "To Kavichakravartin, who spoke (composed) this edict, the estate given by Mummaḍiyaṅgāru is 5 *marṭulu* (*nivartanas* of land)."

No. 15—Malkāpuram Stone Pillar Inscription of the time of Rudrāmbā.—Śaka year 1183 (1261 A.D.)

Malkāpuram, Guntur District, Andhra Pradesh.

J. Ramayya, *Journ. Andhra Hist. Res. Soc.*, IV, pp. 152 ff.; *ākatiyasamcika* (Telugu), App., Inscription No. 31. (pp. 71 ff., Pl).

Language · Sanskrit.

Script : Telugu.

Metres: V.1 *Pushpitāgrā*; V.2 *Anushṭubh* (*Śloka*) ; Vv.3-4 *Āryā*; V.5 *Śārdūlavikrīḍita*; V.6 *Mandākrāntā*; V.7 *Śārdūlavikrīḍita*; V.8 *Anushṭubh* (*Śloka*); V.9 *Śārdūlavikrīḍita*; V.10 *Anushṭubh* (*Śloka*); V.11 *Upajāti* (*Indravajrā* and *Upendravajrā*) ; V.12 *Vasantatilaka*; Vv.13-14 *Śārdūlavikrīḍita*; V.15 *Sragdharā*; V.16 *Āryā*; Vv.17-18 *Anushṭubh* (*Śloka*) ; Vv.19-22 *Śārdūlavikrīḍita*; V.23 *Anushṭubh* (*Śloka*) ; Vv.24-25 *Śārdūlavikrīḍita*; Vv.26-27 *Vasantatilaka*; V.28 *Gīti*; V.29 *Rathoddhatā*; V.30 *Upajāti* (*Indravajrā* and *Upendravajrā*; V.31 *Śālinī*; V.32 *Śikhariṇī*; V.33 *Indravajrā*; V.34 *Rathoddhatā*; V.35 *Śārdūlavikrīḍita*; V.36 *Śikhariṇī* Vv.37-39 *Śārdūlavikrīḍito*; Vv. 40-41 *Anushṭubh* (*Śloka*) ; V.45 *Śārdūlavikrīḍita*; Vv. 46-66 *Anushṭubh* (*Śloka*); V.67 *Upajāti* (*Indravajrā* and *Upendravajrā*) ; Vv.68-69 *Indravajrā*; Vv.70-71 *Upajāti* (*Indravajrā* and *Upendravajrā*); Vv.72-81 *Anushṭubh* (*Śloka*); V.82 *Sragdharā*; V.83 *Śārdūlavikrīḍita*; V.84 *Śālinī*; V.85 *Gīti*; Vv.86-87 *Anushṭubh* (*Śloka*) ; V.88 *Gīti*; V.89 *Śālinī*: Vv.90-91 *Anushṭubh* (*Śloka*).

Summary : The inscription begins with an adoration to GAṆEŚA and to ŚIVA. Then it introduces KĀKATĪYA GAṆAPATI, king of ĀNDHRADEŚA.— The GENEALOGY of the Kākatīya dynasty is thus narrated as follows.— PROLA II; his son RUDRA I; his younger brother MAHĀDEVA; his son GAṆAPATI; his daughter RUDRADEVĪ, also called *Rudradeva*, who was the ruling queen when the inscription was written.— In the ḌĀHALA-MAṆḌALA lying between the Bhāgīrathī and the NARMADĀ, there was the Śaiva ascetic SADBHĀVAŚAMBHU of the DURVĀSAS lineage

who obtained 3 lakhs of 'villages' from the Kalachuri king YUVARĀJADEVA and founded the monastery called GOLAKĪ-MAṬHA. His disciple, who succeeded as pontiff of the monastery, SOMAŚAMBHU, was the author of the *Somaśambhupaddhati*. His successor was his disciple VĀMAŚAMBHU whom the KALACHURI rulers continued to worship even when the inscription was written. The ascetics of this spiritual lineage succeeded to the pontifical seat one after another. Thus there were ŚAKTIŚAMBHU; his disciple KĪRTIŚAMBHU; VIMALAŚIVA; his disciple DHARMAŚIVA or DHARAMAŚAMBHU; his disciple was VIŚVEŚVARAŚIVA or °ŚAMBHU who hailed from PŪRVAGRĀMA in RĀḌHĀ (Dakshiṇa-Rāḍhā) in GAUḌA and was the preceptor of king GAṆAPATI as well as of the CHOLA MĀLAVA and KALACHURI rulers.— In the ŚAKA YEAR indicated by the words LOHAḤ KO-YAṀ, i.e. 1183, styled DURMATI, CHAITRA-BADI 8, Friday (25TH MARCH, 1261 A.D.), GAṆAPATI granted in favour of his preceptor the village of MANDARA in KAṆḌRAVĀṬI in the *vishaya* of VELIVĀḌA bounded by the KṚISHṆAVEṆĪ in the north. The said king's daughter RUDRADEVĪ confirmed the grant of the village along with VELAṄGAPUḌI together with an islet in the bed of the Kṛishṇā.— VIŚVEŚVARA-DEŚIKA founded in the gift land a monastery called GOLAKĪ-MAṬHA. Each of the DRĀVIḌA Brāhmaṇas settled there received 2 *puṭṭikās* of land measured by the Penumbāka rod. The remaining land was allotted in three shares to the following—the first to the god PINĀKIN, the second to the students and the ŚUDDHA ŚAIVA-MAṬHA, and the third to the maternity home, the hospital and the establishment offering free food to the Brāhmaṇas.— 3 teachers of the Vedas, viz. *Ṛik*, *Yajus* and *Sāman*, interpreters of the *pada*, *vākya*, *pramāṇa*, *sāhitya* and *āgama*, and the *Vaidya* and *Kāyastha*—2 *puṭṭikās* to each of these 10. The 10 DANCING GIRLS attached to the god VIŚVEVŚVARA, and 8 *maddala* players including MUKHARĪS—1½ *puṭṭikās* to each of the 18. One Kashmirian, 14 songstresses, 6 *Karaḍā*-players, 2 Brāhmaṇa cooks and 4 servants, 6 Brāhmaṇas attached to the *maṭha* and *sattra*, the 10 CHOLA ascetics of all the *Varṇas*, called VĪRABHADRA protectors of the village who were experts in *bija-chchheda*, *śiraśchheda* and *kukshichchheda*, etc., 20 VĪRAMUSHṬI soldiers—makers of objects in gold, copper, stone, bamboo and *ayaskumbha*, and *sthapati*, *kāru*, *nāpita* and *śilpin*,-10

such soldiers, — 1 *puṭṭikā* to each of these 73. In addition, each of the above also received a plot of land $\frac{1}{16}$ of a *nivartana* in area. The Sāmavedin Brāhmaṇas of ŚRĪVATSA-GOTRA, hailing from PŪRVAGRĀMA in DAKSHIṆA-RĀḌHĀ in the GAUḌA country, received 300 *puṭṭis*. For keeping the account of the income and expenditure of the property, they also received 150 *puṭṭis*. The land of one would pass on to his son on his death or to his wife in the absence of sons.— The *Āchārya* or pontiff of the VIŚVEŚVARA-GOLAKĪ enjoyed 100 *nishka* coins as *āchāyabhoga*. — The concluding part of the inscription records numerous other pious activities of VIŚVEŚVARAŚAMBHU.

TEXT[1]

First Side

1. १[2] स्वस्ति श्रीः(।*)
वितरतु भगवानसौ श्रियं वः
करि-व-
1. दनो हरि-नील-भासि यस्य ।
2. द्युति-वर-सरसि-स्फुरत्त-
3. रंग(ग)-
श्रियमधिकामळि-पंक्तयो वहन्ति ॥ 1
जय-
4. तीन्दोः कला खेलतु[3] गंगांभः-कण-दंतुरैः ।
करैः करोति या श-
5. म्भोम्मूर्ध्नि मुक्तावलि-श्रियं(यम्)॥ 2
हरिरवतु किरि-तनुर्व्वो
6. [भु]वमुद्वोढुं गतस्य वरुण-पुरि(रीम्)।
यस्याखिल-जलधि-ज-
7. लं पाद्यायाभूदनर्घ्याय ॥ 3
जयति भगवान्[4] स्वय-
8. म्भूर्ग्गणपति-नृपतेर्हृदि स्थितस्सततं(तम्) ।
यत्कारुण्य-कटा-

9. क्षैर्वृद्धि प्राप्तांध्रदेश-श्रीः ।। 4
अस्ति स्वस्तिमती तनुर्भ्म(र्भ)गवतो

10. देवस्य तस्यास्फुर-
न्नाभि[5]-पंकज-संभवस्य भुजतो भूवल्लभा ज-

11. ज्ञिरे ।
तेषां तिग्ममरीचि-संतति-भुवो ये दुर्ज्जयाः क्षत्रिया-
स्तेषा-

12. मस्ति कुलं कलंक-रहितं श्रीकाकती-भूभुजां(जाम्) ।। 5
वीरस्तस्माद-

13. जनि रजनि[5a]नाथवद्दुग्ध-सिंधोः
कीर्त्ति-ज्योंत्स्ना-[5b]भरित-भुवनः प्रोल-भूपाल-

14. नामा ।
राजन्यस्मिन्कमपि नृपतिं राज-शब्दाभिधेय-
न्नैवास्त्रौ-[6]

15. ष्म त्रिजगति विना यामिनी-कामिनीशं(शम्)।। 6
कीर्त्तिर्य्यस्य हिमेन्दु-कुन्द-विश-

16. दा मूर्त्तिर्ज्जनानंदिनी
दानं विश्व-जनार्त्तिहारि चरितं गंगा-पयः-

17. पावनं(नम्) ।
चित्तं शम्भु-पदारविन्द-युगल-ध्यानामृत-क्षालितं
शौ

18. र्य्यं विश्वगराति[7]-दुर्म्मद-हरं धामापि धाम श्रियः ।। 7
रुद्र-

19. देवस्ततो जातो यत्कीर्त्या भूरलंकृता ।
प्रतिपक्ष-महीपा-

20. ल-यशो-निर्म्माल्यमुज्झति ।। 8
राजानः कति वा न संति सुभटास्स-

21. क्रान्त-विक्रांतय-
स्ते तिष्ठन्तु तमेकमेव शृणुमश्शूरेषु रुद्र-

22. नृपं(पम्)।
यस्यासीदसि-दारितारि-नृपति-श्रेणी-शिरः-कन्दुक-
क्रीडांब्रेडि-

23. त-विक्रमा युधि जयश्री: प्रेयसी स्थेयशी[8] ॥ 9
एक एव धनुर्व्वो(र्ध)रो रुद्रदेवो म-
24. हीभुजां(जाम्) ।
सुरेश्वराणां[8a] सर्व्वेषां पिनाकीव धनुष्मतां(ताम्) ॥ 10
अथानुज-
25. स्तस्य महीं शशास
धीरो महादेव-नृपो महौजाः ।
प्रताप-दीपाः
26. प्रतिपक्ष-भाजां
शाम्यन्ति यत्शौर्य्य[9]-कथानिलेन ॥ 11
कुन्देन्दु-चन्दन-
27. सखः कुमुदस्य मित्रं
स्वर्स्सिं(स्सि)न्धु-सिंधु(सिन्धु)र-तुरंग-रुचां सनाभिः ।
28. कर्प्पूर-हार-हर-हास-पयः-पयोधि-
बन्धुर्विभाति यदुदार-
29. यशो-विलासः ॥ 12
तस्यायं तनयस्त्रयीमयतनोर्द्देवाद्भवानीपते-

30. [र्धां] क्ष्मां समपालयत्[10] गणपतिः क्ष्मापाल-चूडा-मणिः ।
यस्मि-
31. न्विस्मयकारि-विक्रम-कथा-धारामुचि श्रीघने ।
पृथ्वी-दुष्ट-दुरीश-दाव-दह-
32. न-प्राप्तां रुजं मुञ्चति ॥ 13
दर्प्पो धन्वनि मत्सरो रणजये धार्ष्ट्यं द्विपारो-
33. हणे
क्रौर्य्यं शौर्य्य-विधौ तुरंग-दमने चापल्यमाशा युधि ।
क्रोधो दुष्ट-
34. जने भयं द्विजधना लोभश्च[11] धर्म्मार्ज्जने
पूजा कर्म्मणि शांकरे गणपति-क्षोणी-
35. पतेराग्रहः ॥ 14
कोदण्डोच्चण्ड-वेग-व्यथित-करि-हय-व्रात-पृथ्वीश-सैन्यं
किं ब्रूम-

36. अखण्डमानं गणपति-नृपतेर्बाहु-दण्ड-द्वयस्य ।
अद्याप्युद्दाम-दर्प्पादुपर-
37. त-पृतना-कोटि-कंकूल-[12]कूट-
प्रक्रीडतु(त्)-प्रेत-यूथ-व्यतिकर-विषम(।*)भू-
38. भयो भीषयंते ॥ 15
कति कति न संति भूपाः कति कति (च न सन्ति*)गुण-गणाभ-
39. रणाः ।
गणपति-नृपतिस्त्वेको नरपति-शत-पोषकः क्षोण्यां(ण्याम्) ॥ 16
निस्साण-रव-
40. सन्त्रस्ताः क्षणाद्गणपतेर्नृपाः ।
अपि त्यजन्ति दुर्ग्गाणि न दारानेव केव-
41. लं(लम्) ॥ 17
रुद्रदेवि[13] समुदभूत्च(च्छ)रण्यात्सर्व्व-भूभृतां(ताम्) ।
गम्भीरान्महत-
42. स्तस्माल्लक्ष्मी रत्नाकरादिव ॥ 18
सर्व्वोर्व्वीश-किरीट-कुट्टिम-तटी-विन्यस्त-पादांबुजा
शा-
43. स्त्येषा चतुरम्बुराशि-रसनां श्रीरुद्रदेवी भुवं(वम्) ।
यस्या जन्म महोत्सवो
44. गणपतेः क्ष्मापाल-चूडामणे-
र्व्विष्फूर्ज्जत्कलि-काल-कल्मष-कथा-ध्वान्तौघ-
45. तेजो-निधेः ॥ 19
साम्राज्ये[14] खल-वर्ज्जितं विरचिते श्री-रुद्रदेव्या स्वयं
चातुर्व्व-
46. र्ण्य-निज-स्थितिर्व्विजयते विद्राति कालः कलिः ।
धर्म्मासौ भगवान्विभाति दुरितं
47. दूरे द्विजानां द्विष-
स्तन्नाम-ग्रह-भीषिता निजपुरान्निर्य्यन्ति पर्य्याकु-
48. लाः ॥ 20
आक्रामन्ति तरत्तरंग-विगलद्दुग्धाब्धि-फेनावळी-
राचामन्ति शरत्छ-[15]
49. शाङ्क-विसरद्ज्यो[15a] [त्स्ना]-प्रवाहामृतं(तम्) ।
आकर्षन्ति सुरेन्द्र-दंति-दशन-

50. प्राग्भार-लग्नां श्रिय-
म्मुक्ता-हार-लतायिताः प्रतिदिशं रुद्रांबिका-
51. कीर्त्तयः ॥ 21
श्री-विश्वेश्वर-देशिकेन्द्र-शिव-हस्तोद्भासि-दोर्व्विक्रम-
स्त्रि-क्षोणीश-
52. जगद्दळः प्रतिबल-प्रध्वंसि-जन्मोत्सवः ।
यस्याः काकति-वंश-मौक्तिक-
53. मणेः श्री-रुद्रदेवस्सुत-
स्तस्याः किं कथयाम वैभवमत(:*) श्री-रुद्रदेव्या-
54. : परं(रम्)॥ 22
अस्ति विश्वंभरा-सारं कमला कुल-मंद्दिरं[16] ।
भागीरथी-नर्म्मद-
55. योर्म्मध्यं डहल-मंडलं(लम्)॥ 23
उग्रं तत्र तपश्चरन्नियमय-
56. न्बाह्येन्द्रिय-क्रीडनं
सान्द्रानन्द्(न्द)मये समाधि-समये
57. चित्तेन लीनश्शिवे ।
नीत्वा कालमनन्तमन्तक-जयी सद्भावशंभु-
58. र्ग्गुरु-
र्द्दुर्वासो(ऽ*)न्वय-संभवस्सुचरितः प्राबुद्ध-पुण्यैन्नृणां(णाम्)॥ 24
शैवाना-
59. म्प्रथमाय शंकर-पद-ध्यानामृताम्भोनिधि-
क्रीडाम्रेडन-कर्म्म-निर्म्म-
60. लतर-स्वान्ताय शान्तात्मने ।
तस्मै निस्पृह-चेतसे गलचुरि[17]-क्षमापाल-चू-
61. डा-मणि-
र्ग्रामाणां युवराजदेव-नृपतिर्भिक्षान्त्रिलक्षीं ददौ ॥ 25
कृत्वा
62. स शैवमुनिरद्भुत-शील-मूर्त्ति(:*)
श्री-गोलकीमठमुदारमुदात्त-चित्तः ।
63. (त*)स्याकरस्य नृप-देशिक-मौक्तिकानां
वृत्तिं चकार सकलामपि तां त्रिलक्षीं(क्षीम्)

64. ।। 26
प्राचीन-पुण्य-परिपाक-वशात्प्रजाना-
माविर्बभूव भगवानिह-सो-

65. मशंभुः ।
नाम्ना निजेन सकलागम-सिन्धु-सेतुं
यः पद्धतिं करुण-

66. या प्रतिमां बबन्ध ।। 27
अथ नृप-शेखर-माला-लालित-पादो(ऽ*)त्र वामश-

67. भुरभूत् ।
अद्यापि कलचुरीशा यच्चरणाराधकाः प्रशस्यंते ।। 28
लब्ध-

68. देशिक-पदा मनोहरा
भूरि-दान-परितोषितार्त्थिनः ।
यत्र मत्त-करि-

69. णो(ऽ*)पि कुर्व्वते
पाशभेदमिह भद्र-जातयः ।। 29
तस्मिन्मठे तस्य गुरोर्बभूवु-

70. श्शिष्याः[18] प्रशिष्याश्च[19] परस्सहस्राः ।
विनिग्रहीतुं समनुग्रहीतुं
क्षोणी-

71. श्वरान्दक्ष-कटाक्ष-पातैः ।। 30
इत्थं काले याति सत्संप्रदाये
संताने(ऽ*)स्मिन्न-

72. त्यि-संतान-कल्प[20] ।
शैवांभोधेश्शक्तिशंभोरुदारा-
च्छिष्य(:*) श्रीमान्कीर्त्तिशंभुर्ब्बभूव ।। 31

73. ....[21]

Second Side

1. प्रणाम-व्यालोलत्कलचुरि-महीपाल-परिष-
त्किरीट-प्रक्रीडत्किरण-कलिका-ला-

2. लित-पदाः ।
यशःपूरस्स्वैर-स्तबकित-दिशः केरल-भुव-
स्तटः(टी)-पद्मावासा विम-
3. ळशिव-पादास्समभवन् ।। 32
निर्व्वैरमुर्व्यां कलिकाल-मध्ये
स्थातुं पदाभ्या(भ्यां)
4. कुतुकीव धर्म्मः ।
शिष्यः कृपा-कंदलितांतरात्मा
तेषामभूद्धर्म्मशिवो मुनी-
5. न्द्रः । 33
यं कृपा-निधिमुदार-वैभवं
धर्म्मशम्भुमखिलार्त्ति-भंजनं(नम्) ।
एक-व-
6. क्त्र-कमलं सदाशिवं
संकथाः(था)-सुकृतिनः प्रचक्षते ।। 34
अध्येता निगमस्य धर्म्म-नत-[22]
7. यश्श्री-गौड-राढोल्लस-
त्पूर्व्व-ग्राम-शिखामणिर्ग्गणपति-क्ष्मापाल-दीक्षागुरुः ।
8. क्षीराब्धेरिव चन्द्रमाश्शशिकलामौलेर्य्यथा षण्मुखः
श्री-विश्वेश्वर-शम्भुरु-
9. ग्र-तपसः श्रीधर्म्मशंभोरभूत् ।। 35
चिरं पृथ्वीपालावलि-मकुट-घृष्टांघ्रि-कमल-
द्वयो
10. विद्या-वल्ली-वलय-कलना-कल्पतरुः(रुकः) ।
सदा दान्तस्स्वांत स्थिरतरो(र)-लसद्धूर्जटि-
11. म(र्म)हान्-
महाशान्तः कान्तो जयति भुवि विश्वेश्वरशिवः ।। 36
श्री-चोलेश्वर-मालव-
12. क्षितिपती राजन्य-चूडामणी
यच्छिष्यौ किमतः परं गणपति-क्षोणीपतिर्य्य-
13. स्सुतः ।
न स्यात्कस्य मुदे स देशिकवरश्शैवागमाम्भोनिधिः
श्री-विश्वेश्वर-देशिकः कल-

14. चुरि-क्ष्मापाल-दीक्षा-गुरुः ।। 37
गौडाः पूर्ण्ण-मनोरथाः कति कति प्राप्त-श्रिय-
स्तापसा-
15. स्संतुष्टाः कवि-पुंगवाः कति कति प्रध्वस्त-पाशा नृपाः ।
ये तस्मिन्
16. गणपत्यधीश-गुरुता सिंहासनाध्यासिनि
श्री-विश्वेश्वर-देशिके शिवपुरी-विश्रा-
17. णन-श्लाघिनि ।। 38
त्वंगत्पिंग-जटा-किरीटमुदय-स्मेरारविन्दाननं
मुक्ता-कुंडल-
18. ताडितांस-शिखरं हारैर्म्मनोहारिणं(णम्) ।
विद्या-मण्डप-वर्त्तिनं गणप-
19. ति-क्ष्मापाल-दीक्षा-गुरुं
श्री-विश्वश्वरशंभुमीक्षितवतां ते चक्षुषी चक्षुषी ।। 39
20. लोहः कोयं[24] शकस्याब्दे दुर्म्मतौ[25] वत्सरे शुभे ।
चैत्रे सितेतराष्टम्यां[26] वा-
21. रे शुक्राभिधानके ।। 40
विषये वेलिवाडाख्ये कण्ड्रवाट्यां विशेषतः ।
यदुत्त-
22. रेण वहति कृष्णवेणी महानदी ।। 41
श्री-विश्वेश्वरशंभवे गणपति-क्षोणीश्वरेणा-
23. दरा-
द्ग्रामं मंदर-नामधेयमखिलैर्व्वाग्दत्तमार्यैस्समं(मम्) ।
तत्पु-
24. त्री तदनुज्ञया पशुपतेः श्रीरुद्रदेवी पुरः
प्रादाद्ग्राम(मं) वेलंगपुडि-स-
25. हितं सीमाष्टकेनावृतं(तम्) । 42
अष्ट-स्वाम्येन सहितं धारापूर्व्वं स-कर्षकं(कम्) ।
कृ-
26. ष्णवेणी-नदी-मध्य-गतया लंकया सह ।। 43
तस्य ग्रामस्य सीमानः कथ्यं-
27. ते पूर्व्वतः क्रमात् ।
परिज्ञानाय सर्व्वेषां भाषयांध्रया[27] स्फुटार्थ-

28. या ॥ 44
पूर्व्वस्यां...............[28]

39. ......श्री-विश्वेश्वरदेवमिन्दु-कलिका-चूडं मठं शाश्वतं
सत्रं

40. विश्वजनाग्रहार-सहितं संस्थाप्य नित्योर्जितं(तम्)।
श्री-विश्वेश्वर-गोळकीत्यभिध-

41. या तं ग्राममत्यादरात्[29]
श्री-विश्वेश्वरदेशिकस्समयुजत्छ्री-[30]गौड-चू-

42. डा-मणिः ॥ 45
नानागोत्र-समुद्भूता द्राविडा ये द्विजोत्तमाः।
परस्प-

43. रं प्रकुर्व्वाणा क्रय-विक्रयमादिकं(कम्) ॥ 46
षष्टि-संख्या-विशिष्टेभ्यः प्रत्येकं

44. पुट्टिका-द्वयं(यम्) ।
पेनुम्बाक-प्रसिद्धेन मानदण्डेन सम्मितं(तम् ॥) 47
स्थित्युपाधिम-

45. दात्तेभ्य(:*) श्री-विश्वेश्वर-देशिकः ।
एतत्[31] क्षेत्रं तु पुट्टीनां विंशत्याभ्यधिकं श-

46. तं(तम्) ॥ 48
वेलंगपूण्डि-सहितं दत्तं मंदर-नामनि ।
त्रिधा विभज्य तत्सि-[32]

47. ष्टमेकं भागं पिनाकिने ॥ 49
विद्यार्त्थिभ्यो(ऽ*)परं भागं शुद्ध-शैव-मठाय

48. च ।
प्रसूत्यारोग्य-शालाभ्यां विप्रसत्राय चेतरं(रम्) ॥ 50
प्रादाद्विश्वेश्वरशि-

49. वश्शैव-सिद्धांत-पारगः ।
ऋ[33]ग्यजुस्साम-वेदानां सम्यगध्यापकास्त्र-

50. यः ॥ 51
पद-वाक्य-प्रमाणानां साहित्यस्यागमस्य च ।
पञ्च-व्याख्या-कृ-

51. तो वैद्य-कायस्थौ द्वौ विचक्षणौ ॥
दशानामपि चैतेषां प्रत्येकं पुट्टिका-[34a]

52. द्वयं(यम्) ॥ 52
श्री-विश्वेश्वरदेवस्य नर्त्तक्यो दश संख्यया ।
मुखरी-द्वय-संयुक्ता

53. अष्टौ मद्दल-वादकाः ॥ 53
अष्टादशानामेतेषां प्रत्येकं सार्द्ध-पुट्टिका ।
ए-

54. कः काश्मीर-देशीयो गायिन्यश्च चतुर्द्दश ॥ 54
करडा-[35]वादनाद्येषु कृत्येषु रस-[36]

55. संख्यया ।
पाचकौ द्वौ द्विजन्मानौ[37] चत्वारः परिचारकाः ॥ 55
तथैव षट्समा-

56. ख्याता ब्राह्मणा मठ-सत्रयोः ।
चातुर्व्वर्ण्य-समुद्भूता जटिलाश्चोड-दे-

57. शजाः ॥ 56
बीजच्छेद-शिरश्छेद-[38]कुक्षिच्छेदादि-कर्म्मभिः ।
वीरभद्र-समाख्याता दश ग्रा-

58. मस्य रक्षकाः ॥ 57
भटा स्युरपरे भक्ता विंशतिर्व्वीरमुष्टयः ।
सुवर्ण्ण-ताम्र-[39]

59. पाषाण-वंशायस्कुम्भ-कारकाः ॥ 58
एते स्थपति-संयुक्ताः कारु-नापित-

60. शिल्पिनः ।
दश स्व-कृत्यं कुर्व्वाणा भटाः स्युर्व्वीरमुष्टिभिः ॥ 59
त्रि-सप्ततिर्म्मनुष्या-

61. णां कल्पिता त्वेक-पुट्टिका[40] ।
प्रत्येकं पूर्व्वमुक्तानामारामार्त्थं च सर्व्व-

62. तः ॥
प्रादात् षोडशकं भागन्निवर्त्तनमित-क्षितेः ॥ 60
गौड-दक्षिणराढीय-पू-

63. र्व्व-ग्राम-समुद्भवाः ।
श्रीवत्स-गोत्रिणो ये स्युर्ब्राह्मणास्सामवेदिनः ॥ 62
64. एतेभ्यस्त्रिशतं पुट्टि(ट्टी)रदाद्राज-गुरुस्तदा ।
एता एते प्रभुंजाना
65. ग्रामस्याय-व्ययादिकं(कम्) ॥ 63
अनुसंदधतां सर्व्वं सम्यग्लेखन-पू-
66. र्व्वकं(कम्) ।
इत्याहृत्य शतं सार्द्धं पुट्टिकानां प्रकल्पितं(तम्) ॥ 64
तिष्ट[41]तामेव स-
67. र्व्वेषां स्वे स्वे कर्म्मणि वृत्तयः ।
भवस्या[42]चन्द्रतारार्कमन्यथा न भवंति वा ॥ 65
68. पुत्राभावे स्त्रियो(ऽ*)प्येषां कुलाचार-समन्विताः ।
कारयन्त्य(:*) स्व-कर्म्माणि क्षे-
69. त्रारामादि-भुञ्जतां(ताम्) ॥
क्षेत्राणि शिष्टान्यखिलानि देव-
देवांग-भोगालय-
70. मुख्य-कृत्ये ।
उपेयुषां शैव-तपोधनानां
कालाननानां शिव-शासनाना-
71. म् ॥ 67
विद्यार्त्थिनां पाशुपत-व्रताना-
मप्यन्न-वस्त्रादि-समर्पणाय ।
आ-
72. रभ्य विप्रानिवारितानां
चण्डाल-पर्यंतमुपागतानां(नाम्) ॥ 68
अन्न-
73. प्रदानाय च सर्व्वकाल-
मकल्पयद्राज-गुरुर्म्महात्मा ।
देवस्य सत्र-
74. स्य मठस्य तस्य
ग्रामस्य सर्व्वस्य[43] च सो(ऽ*)धिकारी ॥ 69
यो गोळकीवंश्य-कृताभिषे-

75. क-
शशान्तश्शुचिश्शैव-रहस्य-वेदी ।
शैवागमानामपि पारगामी
सन्तान-
76. पालस्सम-लोष्ट्र-हेमा ।। 70
सर्व्वाणि भूतान्यनुकम्पमान-
स्समस्त-विद्या-
77. सु कृतावगाहः ।
महीसुरश्शीलवतां पुरोगो-
(ऽ*) भवत्तरां नैष्ठिक देशि-
78. केन्द्रः ।। 71
विश्वेश्वर-शिवाचार्य्यो धीमान्राज-गुरुस्स्वयं (यम्) ।
एवमाज्ञापय-
79. द्वीरश्शैवाचार्य्य-शतैर्वृतः ।। 72
आन्ध्रेषु-स्थान-पतयष्षट्कर्म्मणिस्तपो-धनाः ।

Third Side

1. सांतानिकाश्च सर्व्वे (ऽ*) त्र साक्षीभूता भवन्तु ते ।। 73
श्री-विश्वेश्वर-गोळक्या-
2. माचार्य्यत्वे प्रतिष्ठितः ।
एतत्सर्व्वं सदाचारः परिपाल्यो (ऽ*) र्जितं
3. सदा ।। 74
निष्काणां शतमाचार्य्य-भोगं भुञ्जीत देशिकः ।
उपे-
4. क्षके (ऽ*) स्मिन् दुर्वृत्ते प्रज्ञा ... भक्तु ।
...स्तं परित्यज्य सा-
5. न्तानिकमथापरं (रम्) ।। 75
द. . .त. . .ता. . .हाया रक्षका-
6. स्तथा ।
सर्व्व-तीर्त्थ-फलं सर्व्व-जप-होम-फलं तथा ।। 76
सर्व्वदेवार्च्च-
7. न-फलं प्राप्नुवन्त्यत्र मानवाः ।
विरुद्धा विघ्न-कर्त्तारः क्षेत्र-द्र-

8. व्यापहारिणः ॥ 77

त्रि-सप्त-कुलजैस्सार्धमन्न-पानाद्यभावतः ।

दरि-

9. द्राः प्रेत्य रौद्रीश्च प्राप्याष्टादश-दुर्गतीः ॥ 78

दुःखान्यनुभविष्यन्ति

10. महांतीति महातपाः ।

विश्वेश्वरशिवाचार्य्यस्सदाचारैस्तपोध-

11. नैः ॥ 79

ब्राह्मण्यैरप्यसंख्येयैर्ग्रस्ते स्वर्भानुना रवौ ।

कृष्णवेण्याम्म-

12. हानद्यां स्नात्वाचम्य विधानतः ॥ 80

एवं पापकृतां शापं प्रादात्पुण्यकृता-

13. ंवरं(रम्) ॥ 81

कृत्वा काळीश्वराख्ये पुर उपल-मठं पोन्नग्रामाग्रहारं

कृत्वा[44]

14. विश्वेश्वर-शिव उरुधीर्द्दत्तवान् सर्व्वसाक्षि ।

निर्म्माय स्वाख्य-लिंगम्मठमपि नगरे

15. मंद्रकूटाभिधाने

मानेपल्यु(ल्ल्यु)ट्लुपल्लि-द्वयमददत् सद्देव-स-

16. त्र-द्वयाय ॥ 82

नाम्ना स्वेन स चंद्रवल्लि-नगरे लिंगं प्रतिष्ठाप्य सन्-

कञ्चं-

17. पल्लि-तटाक-सेतुमधिकं कृत्वार्द्धमस्मा अदात् ।

कृत्वानंदपदे स्व-नाम-नग-

18. रं (लिंगं*)प्रतिष्ठाप्य चा-

प्यानंदं मुनिकूटमप्यथ पुरं देवस्य भुक्त्यै[44a]

19. अदात् ॥ 83

कोम्मूर्ग्रामे स्वाख्य-लिंग-प्रतिष्ठां

कृत्वा त्रिंशत्खारि-मानां म-

20. हीं सः ।

निम्न-क्षेत्रं पंच-खारी-मितं च

प्रादाद्देवायांग-रंगोपभु-

21. वत्यै ॥ 84
श्रीशैले शान्ये ई(चे)श्वर-पुरि स- मठं च षोडशावरकं(कम्) ।
अकरोत्तच्छिष्यो(ऽ*)वाद्प्रा

22. मं गणपतिरवारि-सत्राय[45] ॥ 85
विषये पल्लिनाडाख्ये कंड्कोटाभिधान-

23. कं(कम्) ।
आचार्य्य-दक्षिणा-रूपं तस्मै भक्त्या समर्प्पयत् ॥ 86
लिंगन्निवृत्तौ नि-

24. र्म्माय तद्वेल्लालांतरस्थलिं(लिम्) ।
दुद्याल-ग्राम-वन्यांश पूनूरु-ग्राम-

25. मप्यदात् ॥ 87
उत्तर-सोमशिलायां लिंग वंश्वेश्वरं प्रतिष्ठाप्य ।
ऐतप्रोल्ना-

26. मान ग्रामं प्रादात्स देशिक-श्रेष्ठः ॥ 88
सामान्यो(ऽ*)य धर्म्मसेतुर्न्नृपाणा-

27.
काले काले पालनीयो भवद्भिः ।
सर्व्वानेतान्भाविनः पार्त्थिवेंद्रा-
न्भू-

28. यो भूयो याचते रामचन्द्रः । 89
स्व-दत्तां पर-दत्तां वा यो ह-

29. रेत वसुन्धरां(राम्) ।
षष्टि-वरुष-[46]सहस्राणि विष्ठायां जायते क्रिमि-

30. ः॥ 90
अस्य सर्व्वस्य धर्म्मस्य पालकस्य पद-द्वयं(यम्) ।
विश्वेश्वरशिवाचार्य्यो वहत्य-

31. न्यां(न्यं) सहत्यल(लम्)॥ 91
मगळंमहा-श्री-श्री(ः।*) ।

1. Adapted from the pubished texts.
2. Symbol for *siddham*, *Om siddhih* or *siddhir = astu*.

3. Read *khelad°*.
4. Read *bhagavān*.
5. Read *°n-nābhī°* to satisfy the metre.
5a. Read *rajanī* to satisfy the metre.
5b. Read *kīrtti-jyo°*.
6. Read *°śraushma*.
7. Usually spelt *vishva°*.
8. Read *stheyasī*.
8a. Better read *sureśānāñ=cha sarvveshāṁ* to satisfy the metre.
9. Read *yach-chhauryya*.
10. Read *°pālayad°*.
11. Read *°l=lo°*.
12. Read *kaṁkāla-koṭi*.
13. Read *°devī*.
14. Read *sāmrā°*.
15. Read *śarach-chhā°*.
15a. Read *viśaraj-yo°*.
16. Read *mandiram*.
17. The name is generally written as *Kalachuri*. See l. 67 below.
18. *K. S.* has *°ś=śiśyāḥ*.
19. *K.S.* has *praśiśyā°*.
20. Read *kalpe*.
21. Ll. 73-90, omitted here, are written in the Telugu language.
22. *K.S.* has *Dharmmarnataya*.
23. *K.S.* has *Chūrvya°*.

24. *La* indicates 3, *ha*=8, *ka*=1 and *ya*=1, i.e. 3811 which according to the formula *aṅkānāṁ vāmato gatiḥ* would give the Śaka year 1183. For the Kaṭapayādi system assigning numerical values to consonants of the Indian alphabet, see Sircar, *Indian Epigraphy*, pp. 222, 234.

25. According to the sixty-year cycle of Jupiter, each of the 60 years has a particular name. The names are different in the northern and southern methods of calculation. Naturally the Kākatīya records follow the southern system in naming the years. See *ibid.*, pp. 267 ff.

26. Calculations show that it is not *Chaitre='sit-e°*.
27. The *Āndhrī bhāshā* is Telugu.
28. The following details in Telugu are omitted by us.
29. Read *°darāch=chhri°*.
30. Read *°yujach=chhrī*.
31. *K.S.* has *etatu*.
32. Read *tach=chhi°*.
33. *K.S.* has *Rug-Yaju°*.
34. *K. S.* has *vichakshaṇākā*.
34a. *K. S.* has *puṭṭitā*.
35. It is Sanskrit *karaṭa*.
36. *Rasa* indicates the number 'six'.
37. Read *dvijanmānau*.

38. Read *śiraś-chheda*.
39. *K.S.* has *tāṁmra*.
40. *K. S.* has *puṭikā*.
41. Read *tishṭha*°.
42. Read *bhavanty=ā*°.
43. *K. S.* has *sarvvasva*.
44. *K.S.* has *kritvā* (i.e. *kṛītvā*).
44a. Read *bhuktaye='dāt*.
45. Read °*patir=vāri-sattrāya*.
46. Read *varsha* for *varusha* which is the Telugu modification of the Sanskrit word.

Chapter VIII

The Tuluvas of Vijayanagara

No. 16—Kāñchīpuram Copper-plate Inscription of Krishṇadevarāya, Śaka year 1450 (1528 A.D.)

S. V. Venkatesvara and S. V. Visvanatha, *Ep. Ind.*, XIV, pp. 170 ff.

Language : Sanskrit.

Script : Nandināgarī with the deity's name in line 100 in Kannaḍa.

Metres : Vv.1-4 *Anushṭubh* (*Śloka*); V.5 *Śārdūlavikrīḍita*; Vv.6-8 *Anushṭubh* (*Śloka*); V.9 *Hariṇi*; Vv.10-11 *Sragdharā*; Vv.12-13 *Anushṭubh* (*Śloka*); Vv. 14-17 *Sragdharā*; Vv.18-19 *Anushṭubh* (*Śloka*); V.20 *Śārdūlavikrīḍita*; Vv. 21-23 *Sragdharā*; V.24 *Dodhaka*; Vv.25-27 *Anushṭubh* (*Śloka*); V.28 *Sragdharā*; Vv.29-42 *Anushṭubh* (*Śloka*); V.43 *Udgiti*; Vv.44 *Anushṭubh* (*Śloka*); V.50 *Śālini*.

Summary : In the lineage of the Moon was born Timma. From him sprang Īśvara. His son Narasa offered gifts at Rāmeśvram and other places. He captured Śrīraṅgapattana, defeated the Chola, Chera, Pāṇḍya and Musalman kings, subdued the chieftain of Madhurā and the king of Orissa, and extended his suzerainty from Laṅkā to the banks of the Gaṅgā. To him was born Vīranṛisiṁhendra and Krishṇarāya. After Vīranṛisiṁhendra's death, Krishṇarāya *alias* Rājādhirāja *alias* Vīrapratāpa ascended the throne.— In the Śālivāhana Śaka year 1450, named Virodhin, in the month of Vaiśākha on the Pūrnimā-tithi, the king granted on the banks of the Tuṅgabhadrā, near the temple of Śrī-Virūpāksha, to Sadāśiva Sarasvatī, disciple of Chandraśekhara Sarasvatī, the village of Udayambākkam, also called Krishṇarāyapuram, in Paḍavīḍu-mahārājya, in the Jayachola-maṇḍala, comprising the town of Tirkkalekuṁnareṁḍāru and the fort of

KALATTŪR in VILIMALANĀḌU in the district (*sima*) of Cheṅgalipaṭ ṭaon the banks of the PALAR.— The donee was allowed the EIGHT KINDS of enjoyment in the land, viz. treasures, accumulations, rocks, etc., and tanks, gardens, trees, etc.—The grant was composed by SABHĀPATI and engraved by VĪRAṆĀCHĀRYA.— The DATE seems to correspond to FRIDAY the 23RD APRIL, 1629 A.D., the name Virodhin being really applicable to Śaka 1451.

TEXT[1]

First Plate

1. श्री गणाधिपतये नमः ।
नमस्तुङ्ग-शिरः(र)श्चुंबि-चन्द्र-

2. चामर-चारवे ।
त्रैलो(क्य*)-नगरारंभ-मूल-स्तंभाय (श*)भवे ।(।*) 1
हरे[3] लीला-वरा-

3. हस्य दंष्ट्रा-दण्डः स पातु वः ।
हेमाद्रि-कलशा यत्र धात्रीच्छत्र-श्रियं दधौ ।(।*) 2

4. कल्याणायास्तु त[4]धाय प्रत्यूह-तिमिरापहं(हम्) [।]
यद्गजो(ऽ*)प्यगजो[5] भूतं हरि-

5. णापि च पूज्यते । (।*) 3
अस्ति क्षीरमया[6] देवे मंथ्यमानान्महांबुधेः ।
नवनी-

6. तमिवोद्भूतमपनीत-तमो महः ।(।*) 4
तस्यासी[7] तनयस्तपोभिरतुलैरन्व-

7. र्थ-नामा बुधः
पुं[8]ष्यैरस्य पुरूरवा भुजबलैरायुर्द्विषां निघ्नतः ।
तस्या[9]

8. तस्यायुर्णहुषो(ऽ*)स्य[10] तस्य परुषो युद्धे ययाति[:] क्षितौ
ख्यातस्तस्य तु तुर्वसुर्वसुनि-

9. भ.श्री-देवयानी-पतेः ।(।*) 5
तद्वंशे देवकी-जानिर्दिदीपे तिम-भूपतिः ।
यशस्वी

10. तुलुवेंद्रेषु यदोः कृष्ण इवान्वये ।(।*) 6
ततो(ऽ*)भूद्बुक्कमा-जानिरीश्वर-क्षिति-पाल-
11. कः ।
अवासम-गुण-भ्रंशं मौलि-रत्नं महीभुजां(जाम्)।(।*) 7
सरसावुदभू[11] तस्मा नर-
12. सावनिपालकः ।
देवकी-नंवना कामो[12] देवकी-नंदनादिव ।(।*) 8
विविध-सुकृतोद्दा-
13. मे रामेश्वर-प्रमुखे मुहु-
र्मुदित-हृदय[:] स्थाने स्थाने व्यधत्त य[13] यथाविधिः[14] ।
बु-
14. ध-परिवृतो नाना दानानि यो भुवि षोडश
त्रिभुवन-जनोद्गीतं स्फी(तं*) यश[:]
15. पुनरुक्तयथाविधिः[15] ।(।*) 9
कावेरीमाशु बध्वा बहल-जल-भरां यो विलं
16. घ्यैव शत्रु(त्रू)न्
जीवग्राहं गृहीत्वा समिति भुज-बला[16] तं च राज्यं तदिय्यं[17] (।*)
17. कृत्वा श्रीरंगपूर्वं तदपि निज(व*)शे पट्टनं यो बभशे[18]
कीर्त्ति-स्तंभं निखातं
18. स्त्रि[19]भुवन-भुवनः[20] स्तूयमानापदानः ।(।*) 10
चेर चोल च पांड्यं तमपि च मधु-
19. रा-वल्लभं मानभूषं
वीर्योदग्रं तुरुष्क गजपति-नृपतिं चापि जि-
20. त्वा तदन्यान् ।
आ गंगा-तीर-लं(का*)-प्रथम-चरम-भूभृत्तटांतं नितांतं
ख्या-
21. तः क्षोणीपतीनां स्रजमिव शिरसा शासनं यो व्यतानीत्।(।*) 11
तिप्पाजी-नाग-
22. लादेव्यो कौसल्या[21]-श्री-सुमित्रयोः ।
देव्योरिव नृसिंहेंद्रा(त्*) तस्मात्पंक्तिर-
23. थाविव[22] ।(।*) 12
वीरौ विनयिनौ राम-लक्ष्मणाविव नंदनौ (।*)
जातौ वीर-नृसि-

24. हे द्र-कृष्णराय-महीपतौ ।(।*) 13
वीर-श्री-नारसिंहः स विजयनगरे रत्न-

25. सिंह्रा[23]सनस्थः ।
कीर्त्या नीत्या निरस्य नृग-नल-नहुषानप्यवन्यां म-

26. शंन्या[24] ।
आ [से]तोरा सुमेरोरवनिसुर-नुत-स्वैरमा चोदयाद्रे-
रा पाश्चा(श्चा)त्या-

27. चलातादखिल-हृदयमावर्ज्य राज्यं मशास[25] ।(।*) 14
नाना-दानान्यकार्षोत्क-

28. नक-सदसि य श्री-विरूपाक्षदेव-
स्थाने[26] श्री-कालहस्तीशितुरपि न-

29. गरे वेंकटाद्रौ च कांच्यां(च्याम्) ।
श्रीशैले शोणशैले महति हरिहरे(ऽ*)होबले

30. संगमे च
श्रीरंगे कुंभघोणे हत-तमसि महानदि-तीर्थे निवृत्तौ ।(।*) 15

31. गोकर्णे राममेतौ [ज]गति तदितरेष्वप्यशेषेषु पुण्य-[27]
स्थानेष्वा-

Second Plate : First Side

32. लब्ध-नानाविध-बहल-महादान-वारि-प्रवाहैः ।
यस्यो-

33. द्यत्तुरङ्ग-प्रकर-खुर-रज -शुष्यदंभोधि-मग्नः
क्ष्माभृत्प-

34. क्षच्छिदो(द*)त्कर-कुलिशधरोत्कंठिता कुंठिताभून् ।(।*) 16
ब्रह्मांड

35. विश्वचक्रं[28] टमुदित[29]-महाभूतकं रत्नधेनुः[30]
सप्तांभो[धी]श्च क[ल्प]-

36. क्षितिरुह-लतिके कांचनीं कामधेनुः(नुम्) ।
स्वर्ण-क्ष्मा-यो(गो)-हिर-

37. ण्याश्व-रथमपि तुलापूरुषं गोसहस्रं
हेमाश्वं हेमगर्भं कन-

38. क-करि-रथं पंचलांगल्यतानीत् ।(।*) 17
प्राज्यं प्रशास्य निर्विघ्नं रा-
39. ज्यं द्यामिव शासितुं(तुम्)।
तस्मिन्गुणेन विख्याते क्षितेरिंद्रे दिवं ग-
40. ते ।(।*) 18
ततो(ऽ*)प्यवार्य-वीर्य-श्री-कृष्णराय-महीपतिः ।
बिभर्ति मणि-के-
41. यूर-निर्विशेषं महीं भुजे ।(।*) 19
कीर्त्या यस्य समंततः प्रसृतया वि-
42. श्वं रुचैक्यं[31] व्रजे-
दित्याशंक्य[32] पुरा पुरारिरभवत[33] भालेक्षणः प्रा-
43. यशः ।
पद्माक्षो(ऽ*)पि चतुर्भुजो(ऽ*)जनि चतुर्वक्त्रो(ऽ*)भवत्पद्मभूः
काली
44. खड्गमधाद्रमा च कमलं वीणां च वाणी करे ।(।*) 20
शत्रूणां[34] वा-
45. समेते ददत इति रुषा किंनु सप्तांबुराशी
नाना-सेना-तुरं-
46. ग-त्रुटित-वसुमती-धूलिकापालिकाभिः ।
संशोष्यष्य[35] स्वैर-
47. मेतत्प्रतिनिधिजलधि-जलधि[36]-श्रेणिका यो विधत्ते
ब्रह्मां-
48. डं स्वर्णमेरु-प्रमुख-निज-महादान-तोयैरमयैः[37]।(।*) 21
मद्दत्तामर्थिसार्थाः
49. श्रियमिह सुचिरं भुंजतामित्यवेत्य
प्रायः प्रत्यूह-हेतोः[38] स्त-
50. पन-रथगतेरालयं देवतानां(नाम्) ।
तत्तद्दिग्जैत्र-वृत्यापि
51. च विरुद-पदैरंकितांस्तत्र तत्र
स्तंभां[39] जात-प्रति[40]-प्रतिष्ठा-
52. न्व्यतनुतनुत[41] भुवि यो भूभृदभ्रंकषाग्रान् ।(।*) 22
कांची-श्री-

53. शैल-शो(णा*)चल-कनकसभा-वेंकटाद्रींद्र- मुख्ये-
ष्वावर्त्याव-
54. र्त्यं सर्वेष्वतनुत विधिवत् भूयशे[42] श्रेयसे[43] यः ।
देवस्थानेषु
55. तीर्थेष्वपि कनक-तुला-पुरुषादीनि नाना-
दानान्येवोप-
56. दानैरपि सममखिलैरागमोक्तानि तानि ।(।*) 23
शेषकृत-प्र-
57. तिपार्थिव-दंडः
शेषभुजाकृति-रक्षण-शौंडः ।
भाषगत-
58. प्पुवरायरगंड-
स्तोषकृदर्थिषु यो रणचंडः ।(।*) 24
राजा-
59. धिराज इत्युक्तो यो राजपरमेश्वरः ।
मूरुरायरगंडश्च
60. परराय-भयंकरः ।(।*) 25
हिंदु-राय-सुरत्राणो दुष्ट-शार्दूल-मर्द-
61. नः (।*)
वीरप्रताप इत्यादि-विरुदैरुचितैर्युतैः(तः) (।।*) 26
आलोक-

Second Plate : Second Side

62. य महाराय जय जीवेति वादिभिः।
अंग-वं(ग*)-कलिगा-
63. द्यै राजभिः सेव्यते च यः ।(।*) 27
स्तुत्यौदार्यस्सुधीभिः स[44] विजय-
64. नगरे रत्न-सिंहास(न*)स्थः
क्ष्मापालान् कृष्णराय-क्षितिप-
65. तिरधरीकृत्य नीत्या नृगादीन् ।
आ पूर्व्वाद्रेरथास्तक्षिति-
66. धरकटकादा च हेमाचलांता-[45]
दा सेतोरर्थिसार्थश्रिय-

67. मिह लो[46]कृत्य कीर्त्या समिंधे ।(।*) 28
शकाब्दे शालिवाहस्य सह-
68. स्रेण चतुश्शतैः ।
पंचाशता प्रसंख्याते विरोध्यब्दे विराजि-
69. ते ।(।*) 29
विख्याते मासि वैशाखे पूर्णिमायां महातिथौ ।
विशाख[र्क्ष]-
70. समायुक्ते दिने च शुभ-वासरे ।(।*) 30
तुंगभद्रानदी-तीरे श्री-विरूपा-
71. क्ष-संनिधौ (।*)
पर्महंस-[47] परिव्राजकाचार्याय मुमुक्षवे ।(।*) 31
भस्मो-
72. द्धूलित-गात्राय र[48]द्राक्षावलि-धारिणे (।*)
शीतोष्णादि-द्वंद्व-दुःखा-
73. तीताय च महात्मने ।(।*) 32
अष्टांग-योग-युक्ताय दयाशीलाय धी-
74. मते ।
सर्व-तंत्र-स्वतंत्राय ज्ञान-वैराग्य-शालिने ।(।*) 33
चन्द्रशेखरस-[48a]
75. रस्वत्या(:*) शिष्यायामित-तेजसे ।
सदाशिव-सरस्वत्यै गुरवे
76. शिव-रूपिणे ।(।*) 34
पडवीडु-महाराज्ये जयचोलाख्य-मंडले ।
तिर्क्क-
77. लेकुंनरेंडारु-पत्तनाच(नेन) समन्विते ।(।*) 35
कलत्तूर्कोट्ट-संयुक्ते श्री-
78. विलिमल-नाडके ।
चंगलिपट्ट-[49] सीमास्थे क्षीरनद्यां[50]स्तटे
79. शुभे (।।*) 36
प्रल्लयन्नूरि-[51]महाग्रामा[त्] प्राचीं दिशमुपाश्रितं(तम्) ।
मणप्पा-
80. क्काभिधाग्रामा[त्][52] दक्षिणस्यां दिशि स्थितं ।(तम्।।) 37
कलत्तूरभिधा(ध)-ग्रा-

81. मात् पश्चिमां दिशमाश्रितं(तम्) ।
पुष्पपट्टु-महाग्रामादुत्तरस्यां
82. त्तरस्यां[53] दिशि स्थितं(तम्) ।(।*) 38
वुदयंबाक्क[54]-नामानं सर्वसस्योपशोभि-
83. तं(तम्)।
कृष्णरायपुरं चेति प्रतिनाम-समन्वितं(तम्) ।(।*) 39
सर्वमान्यं
84. चतु[55]शीमा-संयुतं च समंततः ।
निधि-निक्षेप-पाषाणाद्यष्ट- भोग्यैर-
85. थेतरैः ।(।*) 40
विविधैश्च फलैर्युक्तं स-तडाकं स-भूरुहं(हम्) ।
आ-चंद्र-तारकं
86. भोक्तुं दातुं चापि निजेच्छया ।(।*) 41
सिष्य-[56]प्रशिष्यैः स्तच्छिष्यैः तच्छिष्यैः त-
87. त उत्तरैः ।
कृष्णदेव-महारायो माननि[57]यो मनस्विनां(नाम्) ।
स-हिरण्य-
88. [प]योधारा-पूर्वकं दत्तवान्मुदा ।।०।। 42

Third Plate

89. तदिदमवनीप-कवि-नुत-धरापस्य कृष्णरायस्य ।
शास-
90. नमुरु-कवि-वैभव-निवह-निदानस्य भूरिदानस्य ।(।*) 43
कृष्णदेवम-
91. हाराय-शासनेन सभ(भा)पतिः ।
अभानीत्[58] मदु-संदर्भं तदिदं तांम्र-[59]
92. शासनं(नम्) ।(।*) 44
कृष्णदेवमहाराय-शासनं[60] मल्लनात्मजः [।]
त्वष्टा श्री-वीरणाचा-
93. र्यो व्यलिखत्तांम्र-[61]शासनं ।(।*) 45
दान-पालनयोर्मध्ये दानाच्छ्रेयो(ऽ*)नुपालनं(नम्) ।
दा-

94. नात्स्वर्गमवाप्नोति पालनादच्युतं पदं(दम्)।(।*) 46
स्वदत्ता(द्*) द्विगुणं पुण्यं पर-दत्तानुपा-
95. लनं(नम्) ।
पर-दत्तापहारेण स्व-दत्तं निष्फलं भवेत् ।(।*) 47
स्व-दत्तां पर-दत्तां वा यो हरे-[62]
96. ति वसुन्धरात् ।
षष्टि[63] वंरुष-सहस्राणि विष्ठायां जायते क्रिमिः ।(।*) 48
एकैव भगि-
97. नी लोके सर्वेषामेव भूभुजां(जाम्) ।
न भोज्या न कर-ग्राह्या विप्र-दत्ता वसुंध-
98. रा ।(।*) 49
सामान्यो(ऽ*)यं धर्मसेतुः[64] नृपाणां
काले काले पालनि(नी)यो भवद्भिः [।]
99. सर्वनितान् भाविनः पार्थिवेंद्रान्
भूयो भूयो याचते रामचंद्रः ।(।*) 50
100. श्री-विरूपाक्ष[65]

1. The plates belong to the Śaṅkarāchārya of the *maṭha* of Kāñchīpuram.
2. From the facsimile in *Ep. Ind.*, XIV.
3. Read *Harer=līlā°*
4. Read *tad-dhāma.*
5. Read *°jo=dbhutaṁ.*
6. Read *kshīramayād=devai°.*
7. Read *tasy=āsīt=tana°.*
8. Read *puṇy=ai°.*
9. Omit *tasyā.*
10. Read *tasy=āyur=Na°.*
11. Read *sarasād=udabhūt=tasmān=Nara°.*
12. Read *°nāt=Kāmo.*
13. Omit *ya.*
14. Read *yathāvidhi.*
15. Read *°ruktavat.*
16. Read *balāt=taṁ.*
17. Read *tadīyaṁ.*
18. Read *babhāse.*
19. Read *tri°.*
20. Read *°bhavana-stūyamā°.*
21. Read *°devyoḥ Kausalyā°.*
22. Read *paṅkti-rathād=iva.*

23. Read *siṁhā°* and omit *daṇḍa.*
24. Read *°vanyām=ath=ānyān.*
25. Read *śaśāsa.*
26. The editors read *Śrī-Virūpāksha-sthāne.*
27. Better read *puṇya°.*
28. The editors read *chakaṁ.*
29. Read *samudita.*
30. Read *dhenuṁ.*
31. The editors read *ruch=aikya.*
32. The editors read *°divyāśaṁkya.*
33. Read *Purārir=abhavad=bhālṇ-e°.*
34. Read *śatrūṇāṁ.*
35. Omit one *shya.*
36. Omit one *jaladhi.*
37. Read *°meyaiḥ.*
38. Read *°hetos=ta°.*
39. The editors read *stabhāṁ.* Read *stambhāñ=jā°.*
40. Omit one *prati.*
6. Read *°rājaḥ.* The name is given as *Śrī-Vijayendrarāja, Śrī-Vijayeśvara-bhūpati,* and *Śrī-Vijayanṛipati.* It may indicate both "the king, lord of Śrī-vijaya" and "the king named Śrī-Vijaya or Śrī-Vijayendra or Śrī-Vijayeśvara". It is difficult to determine which of these would be the correct interpretation.

7. Coedes reads *tigm-āsana-śrīḥ.*

8. Possibly *trayam=api* is the reading intended.

9. Read *kaulīra.*

10. Read *°ma-jyoti.*

CHAPTER II

Indonesia

No. 2—Changgal Stone Inscription of Sañjaya, Śaka 654 (732 A.D.)

Ruins of a Śiva temple at Changgal, on the Wukir Hill in Kedu, Central Java.

Kern, *Verspreide Geschriften*, VII, pp. 117 ff.; Chhabra, *Journ. As. Soc. Beng.*, Letters, I, pp. 34ff.; H.B. Sarkar, *Corpus of the Inscriptions of Java*, I, pp. 15 ff.

Language : Sanskrit.

Script : Derivative of Late Brāhmī of South India.

Metres : Vv. 1-2 *Śārdūlavikrīḍita*; V. 3 *Sragdharā*; Vv. 4-7 *Śārdūlavikrīḍita*; V. 8 *Sragdharā*; V. 9 *Vasantatilaka*; V. 10 *Pṛithvī*; V. 11 *Sragdharā*; V. 12 *Śārdūlavikrīḍita*.

Summary : In the expired ŚAKA YEAR 654, on KĀRTTIKA-SUDI 13, MONDAY, UTTARA-BHĀDRAPADA-NAKSHATRA, KUMBHA-LAGNA, king SAÑJAYA installed a ŚIVA-LIṄGA on the hill. The tract of land in which the LIṄGA was installed seems to be called KUÑJARA-KUÑJA-DEŚA or a haunt of elephants. Due to a defective calculation in the almanac consulted by the persons responsible for the inscription, the correct equivalent of the date cannot be determined; but it may be the 6th October, 732 A.D.

TEXT[1]

1. शाकेन्द्रे(ऽ*)तिगते श्रुतीन्द्रिय-रसैरङ्गीकृते[2] वत्सरे
वारेन्दौ धवल-त्रयोदशि-[3]तिथौ भद्रोत्तरे कार्त्तिके (।*)
2. लग्ने कुम्भमये स्थिराङ्श(रांश)-विदिते प्रातिष्ठिपत्पर्व्वते
लिङ्गं लक्षण-लक्षितन्नरपतिश्श्री-सञ्जयश्शान्तये (॥*) 1
3. गङ्गोत्तुङ्ग-तरङ्ग-रञ्जित-जटा-मौलीन्दुचूडामणि-
र्भास्वत्पति[4]-विभूति-देह-विकसन्नागेन्द्र-हार-द्युतिः (।*)
4. श्रीमत्स्वाञ्जलि-कोश-कोमल-करैर्द्देवैस्तु यः स्तूयते
स श्रेयो भवतां भवो भव-तमस्सूर्य्यो ददात्वद्भुतम् (॥*) 2

5. भक्ति-प्रह्वैर्मुनीन्द्रैरभिनुतमसकृत् स्वर्ग्ग-निर्वाण-हेतो-
र्द्देवैर्ल्लेखर्षभाद्यैरवनत-मुकुटैश्चुम्वि(म्बि)तं ष-

6. ट्पदाभैः (।*)
अङ्गुल्याताम्र-पत्रं नख-किरण-लसत्केसरारञ्जितान्तं
देयात्(च्) शं शाश्वतम्व(तं व)स्त्रिनयन-चर-

7. णानिन्दिताम्भोज-युग्मम् ॥ 3
ऐश्वर्यातिशयोद्भवात्सुमहतामप्यद्भुता[नां नि]धि-
स्त्यागैकान्त-रतस्तनोति

8. सततं यो विस्मयं योगिनाम् (।*)
यो(ऽ*)ष्टाभिस्तनुभिर्ज्जगत्करुणया पुष्णाति [न स्वार्थ]तो
भूतेशश्शशिखण्ड-भू-

9. षित-जटस्स त्र्यम्व(म्ब)कः पातु वः ॥ 4
वि(बि)भ्रद्धेम-वपुस्स्व-देह-दहन-ज्वाला इवोद्यज्जटा
वेद-स्तम्भ-सुव-[5]

10. द्ध-लोक-समयो धर्म्मार्थ-कामोद्भवः (।*)
देवैर्व्वन्दित-पाद-पङ्कज-युगो योगीश्वरो योगिनां
मान्यो लोक-

11. गुरुर्द्ददातु भवतां सिद्धिं स्वय[म्भू]र्व्विभुः ॥ 5
नागेन्द्रोत्फण-रत्न-भित्ति-पतितां दृष्ट्वात्म-विम्व[6]-श्रियं
स-भ्रू-

12. भङ्ग-कटाक्षया कुपितया नू[नं] श्रिया वीक्षितः ।
यो योगारुण-लोचनोत्पल-दलश्शेते[7]म्वु-शय्या-त-

13. ले
त्राणार्थन्त्रिदशैः स्तुतस्स भवतान्देयात् श्रियं श्रीपतिः ॥ 6
आसीद्द्वीप-वरं यवाख्यमतुल[न्धान्या]-

14. दि-वीजाधिकं
सम्पन्नं कनकाकरैस्तदमरै[स्सर्ग्गादिनो]पार्ज्जितम् (।*)
श्रीमत्कुञ्जर-कुञ्ज-देश-निहि[तं] [ग*]-

15. ङ्गा[8]दि-तीर्थावृतं
स्थानन्दिव्यतमं शिवाय जगतश्श[म्भो]स्तु यत्राद्भुतम् ॥ 7
तस्मिन्द्वीपे यवाख्ये पुरुष-[पद]-[9]

16. महालक्ष्म-भूते प्रशस्ते
राजोग्रोदग्र-जन्मा प्रथित-पृथुयशास्साम-दानेन सम्यक् (।*)
शास्ता स[र्व्व-प्र]-

17. जानाञ्जनक इव शिशोर्जन्मतो वत्सलत्वा-
त्सन्नाख्यस्सन्नतारिर्म्मनुरिव सुचिरम्पाति धर्म्मेण [पृ]थ्वी[म्] (॥*) 8

18. एवङ्गते समनुशासति राज्यलक्ष्मीं
सन्नाह्वये(ऽ*)न्वय-विधौ समतीत-काले (।*)
स्वर्ग्गे [सुखं फल]-कु[लो]-

19. पचितम्प्रयाते
भिन्दञ्जगद्भ्रमति शोकवशादनाथम् ॥ 9
ज्वलज्ज्वलन-विद्रवत्कनक-गौर-वर्ण-[द्युति]-
[वृं(बृं)]-[10]

20. हद्भुज-नितम्ब-तुङ्गतम-मूर्द्ध-शृङ्गोन्नतः (।*)
भुवि स्थित-कुलाचल-क्षितिधरोच्च-पादोच्छ्रयः
U—U[11]

21. गुण-सम्पदोद्भवति यस्ततो मेरुवत् ॥ 10
श्रीमान्यो माननीयो वु(बु)ध-जन-निकरैश्शास्त्र-सूक्ष्मार्थ-[वेदी]
[रा]-

22. जा शौर्य्यादि-गुण्यो रघुरिव विजितानेक-सा[मन्त-च]क्रः (।*)
राजा श्री-सञ्जयाख्यो रविरिव य[शसा दि]-

23. ग्विदिक्ख्यात-लक्ष्मी-
स्सूनुस्सन्नाह-नाम्नस्स्वसुर[12] UUU—[न्या]यतश्शास्ति राज्यम् ॥ 11
यस्मिञ्छासति [साग-]

24. रोर्म्मि-रशनां शैलस्तनीम्मेदिनीं
शेते राजपथे [जनो न] चकितश्चोरैर्न चान्यैर्भयैः (।*)
कीर्त्या[ढ्यैरलम]-

25. र्ज्जिताश्च सततन्धर्म्मार्थ-कामा नरैः
नूनं रोदिति रोदितीति स कलिर्न्नास्यङ्श(स्यंश)-[शेषो मतः ॥] 12

1. From the illustration in *Journ. As. Soc. Beng.*, Letters, I, Plate 6, and Kern's eye-copy.

2. Possibly we are to correct *rasair=aṅkikṛite*. *Śruti*=4; *indriya*=5 and *rasa*=6; therefore, 456 which, according to *aṅkasya vāmā gatiḥ*, would give Śaka 654. The Śaka era seems to have been originally confined to territories

of the Śakas of Ujjain; but it was made popular in the Kannaḍa country by the early Chālukya house. This era may have been introduced in the Far East by people who went from the ports in Western India during the rule of the Chālukyas of Badami.

3. °*Daśī* has been made *daśi* for the sake of the metre. *Bhadr—ottara= Uttara—Bhādrapadanakshatra.*
4. Read °*t-paṁkti*. The reading may be °*t-bhū*(°*d-bhū*)*ti*.
5. Read *subaddha*.
6. Read *vimba* or *biṁba*.
7. Read *śete='mbu*°.
8. Kern reads [*va*]*ṅśād=it=iv=ādhṛitaṁ*.
9. *Purusha-pada* means Vishṇu's foot-marks.
10. Kern reads *ma*°.
11. Kern suggested *prabhūta*.
12. Read °*r=asama-guṇo*.

No. 3—Kalasan Stone Inscription of Paṇaṅkaraṇa, Śaka 700 (778 A.D.)

Kalasan, in Prambanan, Jogyakarta District, Java.

Brandes, *Tijdschrift voor Indische Taal-, Land- en Volken-kunde van het Bataviaasch Genootschap van Kunsten en Wetenschappen*, Batavia, XXXI, pp. 240-60; R. G. Bhandarkar, *J.B.B.R.A.S.*, XVII, ii, pp. 1 ff.; Bosch, *Tijdschrift voor Indische Taal-, Land- en Volken- kunde*, etc., LXVIII, 1928, pp. 57 ff.; Chakravarti in *India and Java*, pp. 44ff.; Sarkar, *Corpus of the Inscriptions of Java*, I, pp. 34ff.

Language : Sanskrit.

Script : Derivative of Late Brāhmī of North India.

Metres : V. 1 *Vasantatilaka*; V. 2 *Udgīti*; Vv. 3-8. *Āryā*; V. 9 undetermined; V. 10 *Śālinī*; V.11 *Upendravajrā*; V. 12 *Āryā*.

Summary : The inscription begins with adoration to the goddess TĀRĀ or ĀRYA-TĀRĀ. It records the construction of a temple of the goddess (*Tārā-bhavana*) by the preceptor of the ŚAILENDRA king with the help received from *Mahārāja* PAÑCHAPAṆA PAṆAṄKARAṆA who also made a grant of land in favour of the *Saṅgha* of Buddhist monks responsible for the maintenance of the temple. In the concluding part of the inscription, KARIYĀNA-PAṆAṄKARAṆA, who seems to be identified with PAÑCHAPAṆA PAṆAṄKARAṆA, is probably mentioned as a scion of the ŚAILENDRA king.

TEXT[1]

1. नमो भगवत्यै आर्य्य-तारायै ॥
या तारयत्यमित-दुःख-भवाब्धि-मग्नं
लोकं विलोक्य विधिवत्त्रिविधैरु-
2. पायैः ।
सा वः सुरेन्द्र-नर-लोक-विभूति-सा[ा]रं
तारा दिशत्वभिमतं जगदेक-तारा ॥ 1
आवर्ज्य महाराजं × (श्री)-पंच-

3. पणं पणंकरणं(णम्) ।
शैलेन्द्रराज-गुरुभिस्तारा-भवनं हि कारितं श्रीमत् ॥ 2
गुर्व्वाज्ञया कृतज्ञैस्तारादेवी
4. कृतापि तद्भवनं(नम्) ।
विनय-महायान-विदां भवनं चाप्यार्य-भिक्षूणाम् ॥ 3
पङ्गकुर-तवान-तीरिप-
5. नामभिरादेश-शस्त्रिभी राज्ञः ।
तारा-भवनं कारितमिदं(द)मपि चाप्यर्य-भिक्षूणाम् ॥ 4
राज्ये प्रवर्द्धमा-
6. ने राज्ञः शैलेन्द्रवंश-तिलकस्य[3] ।
शैलेन्द्रराज-गुरुभिस्तारा-भवनं कृतं कृतिभिः ॥ 5
शक-नृप-कालातीतै-
7. र्वर्ष-शतैः सप्तभिर्म्महाराजः ।
अकरोद्गुरु-पूजार्थं तारा-भवनं पणंकरणः ॥ 6
ग्र.मः कलस-[4]नामा
8. दत्तः संघाय साक्षिणः कृत्वा ।
पङ्गकुर-तवान-तीरिप-देशाध्यक्षान्महापुरुषान् ॥ 7
भुर(भूरि)-द-
9. क्षिणेयमतुला दत्ता संघाय राजसिंहेन ।
शैलेन्द्रवंश-भूपैरनुपरिपाल्यार्य-सन्तत्या ॥ 8
10. सन्ग् पङ्गकुरादिभिः सन्ग्वानकादिभिः ।
सन्ग् तीरिपादिभिः पत्तिभिश्च साधुभिः ॥ 9
अपि च ॥
11. सर्व्वानेवागामिनः पार्थिवेन्द्रान्
भूयो भूयो याचते राजसिंहः ।
सामान्यो(ऽ*)यन्धर्म्मसेतुर्न-
12. राणां
काले काले पालनीयो भवद्भिः ॥ 10
अनेन पुण्येन विहारजेन
प्रतीत्य जातार्थ-विभाग- वि-
13. ज्ञाः ।
भवन्तु सर्वे त्रि-भवोपपन्ना

जना जिनानामनुशासन-ज्ञाः ॥ 11
करियान[5]-पणंकरणः श्री-
14. मानभियाचते(ऽ*)त्र भावि-नृपान् ।
भूयो भूयो विधिवद्विहार-परिपालनार्थमिति ॥ 12

1. From the facsimile in *J.B.B.R.A.S.* The record is in the early mediaeval characters based on those of North-Eastern India, which proves the relation of that part of India with Java.

2. There is confusion between *v* and *b*.

3. Bhandarkar reads *Śailendravarmma-tanujasya*.

4. Bhandarkar reads *Kolaga* (*śa?*).

5. Vogel suggests that *kariyāna* is equivalent to Old Javanese *rakarayān* or *rakaryan* which is the title of a dignified officer, next only to the king. He also thinks that this inscription refers to two Śailendra kings : (1) the Sumatran Śailendrarāja whose *gurus* were connected with the foundation of the Tārā temple; and (2) *kariyāna* Paṇaṁkaraṇa, a scion of the Śailendra family ruling in Java (*Bijdragen tot de Taal-, Land- en Velken-kunde van Nederlandsch-Indie*, LXXV, p. 634). Stutterheim rejects this suggestion and takes the two to be one and the same king of the Śailendra dynasty, with whose sanction his *gurus* built the Tārā temple.

No. 4—Kelurak Stone Inscription, Śaka 704 (782 A.D.)

Kelurak, to the north of the Loro Jonggrang temple at Prambanan, Jogyakarta District, Central Java.

Bosh, *Tijdschrift voor Indische Taal-, Land- en Volken-kunde*, etc., LXVIII, pp. 1 ff.; H.B. Sarkar, *Corpus of the Inscriptions of Java*, I, pp. 41 ff.

Language : Sanskrit.

Script : Derivative of Late Brāhmī of North India

Metres : Vv. 1-2 not determined; Vv. 4-5 *Vasantatilaka*; Vv. 7, 8, 10 *Śārdūlavikrīḍita*; V. 11 *Āryā*; Vv. 13, 15 *Anushṭubh* (*Śloka*).

Summary : The inscription begins with an adoration to the BUDDHIST TRINITY, to LOKEŚVARA-SUGATAPADĀKSHARA, etc., and to LOKEŚVARA. It mentions king DHARAṆĪNDRA of the ŚAILENDRA dynasty and probably his preceptor hailing from GAUḌĪ-DVĪPA (the Gauḍa country ?) and records the installation of an image of the Buddhist god MAÑJUŚRĪ (also called MAÑJUGHOSHA and MAÑJUVĀK) by the royal preceptor. It again says that, in the ŚAKA YEAR 704, KUMĀRAGHOSHA installed the image of MAÑJUGHOSHA. It seems that Kumāraghosha was the name of the preceptor of the ŚAILENDRA king.

TEXT

नमो रत्न-त्रयाय ॥

जय लोकेश्वर-सुगत-पदाक्षर जय भद्रेश्वर-सुगत-पदाक्षर ।

जय विश्वेश्वर-सुगत-पदाक्षर जय ·· ·· श्वर-सुगत-पदाक्षर ॥ 1

धर्षति यो(2)लोकेश(शं)धर्त्तु(त्तुं)मूर्ध्नामिताभमपि लोकेश्वरम् ।

प्रणमत तम्[3] लोकेशम्[3] सकल-दिगन्तावभासनालोकेशम् ॥ 2

— — — — — — ।

सङ्गत-नवरत्नं मामपि (3) भय-भीतमवचरतं(न्तम्) ॥ 3

सामन्त-मन्त्रि-पति-संस्कृत-सत्क्रमेण

दिक्चक्र-राज-विजयार्जित-विक्रमेण ।

[दुर्वा*]र-वैरि-वर-वीर-विमर्दनेन
नित्यं परार्थ-करु[णा*]UU—Uमेण ॥ 4
शैलेन्द्र-वंश-तिलकेन महो(4)दयेन
यस्य क्रमाम्बुज-रजः शिरसा प्रणम्य ।
सम्पूज्यते प्रवर-रत्न-सरोरुहाद्यै
राज्ञा धृता धृतिमता धरणीन्द्र-नाम्ना ॥ 5
लोकं कृपाण-परिगतेन जगद्धिताय ।
——U—UUU——UUU——
वै(5)पुल्य-विप्र-तिलकेन तथागतोक्तं
——U—UUU—UU—U——॥ 6
गौडी-द्वीप-गुरु-क्रमाम्बुज-रजः-पूतोत्तमाङ्गात्मना
— — —र्थ-विदा महर्द्धि-सहृदा संवेद— —U— ।
— — —UU—U—UUU—(6)प्राप्ताभिषेकं श्रिया
श्रेयः कार U—U—UUU—— —U विद्वद्वि(द्भि)या ॥ 7
— — —UU—U—UUU— — —U— —U—
— — —UU—U—UUU—U—U—।
मञ्जुश्रीरयमप्रमेय-सु(7)गत-प्रख्यात-कीर्त्तिर्महा-
— —UU—U राजगुरुणा लोकार्थ-संस्थापितः ॥ 8

. . . .
. . . . . सेतुर्म्मञ्जुघोषः सन्तोषः (।*)
. . . .
(8)[य]स्मात्तस्माद्भूर्वद्भि. . . . . . . ॥ 9
— — —UU—U—UUU— — —U— —U—

त्रैलोक्यार्चित-संक्रमस्य जगतः(9)त्रातुर्विधातुः श्रियः ।
कृत्वेमां प्रतिमां मया यदमितं प्राप्तं गुरुं भक्तितं(तः)
सेवा—UU—U—स्मरजितः— —U मञ्जुश्रियम् ॥ 10
शक-नृप-कालातीतैर्वर्ष-शतैः सप्तभिश्चतुर्भिरपि ।
वर्षैः कु(10)मारघोषः स्थापितवान्मञ्जुघोषमिमं(मम्) ॥ 11
— — — — — — — ।
— — — — — — —॥ 12

कीर्त्तिस्तम्भो(ऽ*)यमतुलो(11)धर्म्मसेतुरनुत्तरः ।
रक्षार्थं सर्व्वसत्वानां मञ्जुश्री-प्रतिमाकृतिः ॥ 13

अत्र बुद्धश्च धर्मश्च सङ्घश्चान्तर्गतः स्थिताः ।
दृ(द्र)ष्टव्यो दृश्य-रत्ने(ऽ*)स्मिन् स्मराराति-(12)निसूदने ॥ 14
अयं स वज्रधृक् श्रीमान् ब्रह्मा विष्णुर्म्महेश्वरः ।
सर्व्वदेवमय-स्वामी मञ्जुवागिति गीयते ॥[2] 15

1. From the published transcripst. The characters used in this record point to the North Indian element in the culture of Java.

2. Mañjuśri is represented here as an embodiment of various Brāhmaṇical gods along with the Triratna. There are a few more stanzas in the original; but we have omitted them. The concluding part seems to mention Mañjuśri's image as the *kṛiti* or work of Saṅgrāmadhanañjaya.

No. 5—Simpang Mahākshobhya Image Inscription of Śrījñāna-Śivavajra (Kṛitanagara, 1268-92 A.D.), Śaka 1211 (1289 A.D.)

Simpang, Surabaya, Java.

Kern, *Verspreide Geschriften,* VII, pp. 190 ff.; N. P. Chakravarti in *India and Java* (by Chatterjee and Chakravarti), II, pp. 76ff.

Language : Sanskrit.

Script : Old Javanese.

Metre : Vv. 1-19 *Anushṭubh* (*Śloka*).

Summary : The inscription begins with an adoration to the BUDDHA. It speaks of an ancient ascetic named ĀRY-OBHARĀṬ who divided the YAVA country into two parts called JĀṄGALĀ and PAÑJALU and of the sage king, VISHṆUVARDHANA or HARIVARDHANA, and his queen JAYAVARDHANĪ. The son of the couple was ŚRĪ-JÑĀNAŚIVA (i.e. king KṚITANAGARA) who united the two states and whose officer NĀDAJÑA set up the image of AKSHOBHYA made in the form of the king in the ŚAKA YEAR 1211, ĀŚVAYUJA-SUDI 5, WEDNESDAY, ANURĀDHĀ-NAKSHATRA (21ST SEPTEMBER, 1289 A.D.).

TEXT[1]

आदौ नमामि सर्वज्ञं ।[2] ज्ञान-कायन्तथागतं (तम्) ।
सर्व्वस्कन्धातिगुह्यस्थं । सदसत्पक्ष-वर्जितं (तम्) ॥ १ ॥
अन्वतस्सर्वसिद्धिम्वा[3] । वन्दे (ऽ*) हङ्गौरवात्सदा ।
शक-कालमिदं वक्ष्ये । राजकीर्त्ति-प्रकाशनं (नम्) ॥ २ ॥
यो[4] पुरा पण्डितश्श्रेष्ठ । आर्य्योभराडभिज्ञतः ॥[5]
ज्ञान-सिद्धि समागम्याभिज्ञा-लाभो मुनीश्वरः ॥ ३ ॥
महायोगीश्वरो वीरः । सत्त्वेषु करुणात्मकः ।
सिद्धाचार्यो महावीरो । रागादि-क्लेश-वर्ज्जितः ॥ ४ ॥
रत्नाकर-प्रमाणान्तु । द्वैधीकृत्य यवावनीं (नीम्) ।
क्षिति-भेदन-सामर्थ्य-कुम्भ-वज्रोदकेन वै ॥ ५ ॥
परस्पर-विरोधेन । नृपयोर्युद्धकाङ्क्षिणोः ।
अतस्मा[7]ज्जाङ्गलेत्येषा । पंजलु-विषया स्मृता ॥ ६ ॥

किन्तु यस्मात्[8] ररक्षेमां । जय-श्री-विष्णुवर्द्धनः ।[9]
श्री-जयवर्द्धनी-भार्य्यो । जगन्नाथोत्तमः प्रभुः ॥ ७ ॥
आ-जन्म-परिशुद्धाङ्गः । कृपालुः[10] धर्म्म-तत्परः ।
पार्थिवानन्दनङ् कृत्वा । शुद्ध-कीर्त्ति(:*) पराक्रमात् ॥ (८ ॥*)
एकीकृत्य पुनर्भूमीं । प्रीत्यर्थञ्जगतां सदा ।
धर्म्म-संरक्षणार्थम्वा[11] । पित्रादि-स्थापनाय च ॥ ९ ॥
यथैव क्षिति-राजेन्द्रश्श्री-हरिवर्द्धनात्मजः ।
श्री-जयवर्द्धनी-पुत्रः । चतुर्द्वीपेश्वरो मुनिः ॥ १० ॥
अशेष-तत्त्व-सम्पूर्णो । धर्मशास्त्र-विदाम्वरः[12] ।
जीर्णोद्धार-क्रियोद्युक्तो । धर्म-शासन-देशकः ॥ ११ ॥
श्री-ज्ञानशिववज्राक्य[13] श्चित्त-रत्न-विभूषणः ।
प्रज्ञा-रश्मि-विशुद्धाङ्गस्सम्बोधि-ज्ञान-पारगः ॥ १२ ॥
सुभक्त्या तं प्रतिष्ठाप्य । स्वयम्पूर्व्वम्प्रतिष्ठितं(तम्) ।
श्मशाने वूररे-नाम्नि । महाक्षोभ्यानुरूपतः ॥ १३ ॥
भव-चक्रे शकेन्द्राब्दे[14] । मासे चासुजि-संज्ञके ।
पञ्चम्यां शुक्ल-पक्षे च । वारे पकबु-संज्ञके ॥ १४ ॥
सिन्त-नाम्नि च पर्व्वे च । करणे विष्टि-संस्कृते ।
अनुराधे(ऽ*)पि नक्षत्रे । मित्रे महेन्द्र-मण्डले ॥ १५ ॥
सौभाग्य-योग-सम्बन्धे । सोम्ये[15] चैव मुहूर्त्तके ।
क्यात(ख्याते) कुवेर-पर्व्वेशे तुला-राश्यभिसंयुते ॥ १६ ॥
हिताय सर्व-[16]सत्त्वानां । प्रागेव नृपतेस्सदा ।
सत्पुत्र-पौत्र[17]-दारस्य । क्षित्येकीभाव-कारणात् ॥ १७ ॥
अथास्य दासभूतो(ऽ*)हं । नादज्ञो नाम कीर्त्तितः ।
विद्याहीनो(ऽ*)पि सम्मूढो । धर्म्म-क्रियास्वतत्परः ॥ १८ ॥
धर्म्माध्यक्षत्वमासाद्य । कृपयैवास्य तत्व(त्त्व)तः ।
सक[18]-कालं समुद्धृत्य । बजज्ञानज्ञया[19] पदः ॥ १९॥

1. See Kern's eye-copy. The verses are not consecutively written in the $3\frac{3}{4}''$ long lines of the inscription.

2. There is a mark of punctuation after all the *pādas* of the verses. They are unnecessary after the first and third *pādas*.

3. Read °*ddhiṁ vā*.

4. Read *yaḥ*

5. Only one *daṇḍa* is necessary.

6. *Abhijñā* indicates the 5 supernatural powers of the Buddha : (1) taking any form at will; (2) hearing at any distance; (3) seeing to any distance; (4) penetrating men's thoughts; and (5) knowing their state and antecedents.

7. Read *ath=āsmā°*.

8. Read *yasmād=ra°*.

9. *Jayaśrī* appears to be an honorific having its parallel in names like *Śrīvijaya-Skandavarmman* in Indian inscriptions.

10. Read *°lur=dha°*.

11. Read *°rthaṁ vā.*

12. Read *°dāṁ va°*.

13. Read *°vajr-ākhya°*.

14. *Bhava* (*Rudra*) = 11, and *chakra* (probably the *rāśi-chakra*) appears to indicate 12; according to the principle of *aṅkasya vāmā gatiḥ* therefore we get year 1211 of the Śaka era. The date has been found to be equivalent to Wednesday, September 21, 1289 A.D. *Asuji* is a modified form of *Aśvayuja.*

15. Read *saumye.*

16. Read *sarva.*

17. Read *pautra.*

18. Read *Śaka.*

19. Read *vajra-jñān-ā°*.

No. 6—Padang Chaṇḍi Amoghapāśa Statue Inscription of Udayādityavarman, Śaka 1269 (1347 A.D.)

Padang Chaṇḍi, Central Sumatra.

Kern, *Verspreide Geschriften*, VII, pp. 163 ff.; Chatterjee and Chakravarti, *India and Java*, II, pp. 79 ff.

Language : Sanskrit.

Script : Old Javanese influenced by Old Burmese.

Metres : V.1 *Śārdūlavikrīḍita*; V. 2 *Mālini*; Vv. 3-4 *Anushṭubh* (*Śloka*); V. 5 *Śārdūlavikrīḍita*; V.6 *Upajāti* (*Vaṁśastha-Indravaṁśā*); V.7 *Mālini*; Vv.8-9 *Śārdūlavikrīḍita*; V.10 *Anushṭubh* (*Śloka*); V. 11 *Mālini*; V.12 *Drutavilambita*.

Summary : The inscription, exhibiting the poverty of the author's knowledge of Sanskrit and belonging to king ĀDITYAVARMAN of Sumatra, describes the consecration of an AMOGHAPĀŚA group of images (i.e. Amoghapāśa and his thirteen male and female followers) and also glorifies the god MĀTAṄGINĪŚA and the goddess TĀRĀ. The principal point in the inscription is the installation of an image of Amoghapāśa under the name GAGANAGAÑJA by *Āchārya* DHARMAŚEKHARA, a priest belonging to the BHAIRAVA sect, at the instance of ĀDITYAVARMAN. In the ŚAKA YEAR 1269 (1347 A.D.), when the sun was in the KARKAṬA-RĀŚI, on a FULL MOON DAY (probably the 23RD JULY, 1347 A.D.), repairs were effected in the temple by some people.— It has been suggested that MĀTAṄGINĪ was the name of Ādityavarman's queen and that the king was deified as MĀTAṄGINĪŚA.

TEXT[1]

1. सु[2]भमस्तु ।
शं[3]द्धर्म्मंश्च सुवर्द्धनात्म-महिमा सो[4]भाग्यवान् सील[5]वान् ।[6]
2. सास्त्वज्ञा[7] सुविसु(शु)द्ध-योग-लहरी-शोभा प्रवृद्धासते ।
सौन्दर्य्यें गिरिक-
3. न्दरान्वित-गजे सन्दोह-वाणी- [प्र]मा ।
(मा*)या वेरि-तिमिश्र[8]-धिक्कृत-महा-

4. नादित्यवर्म्मोदय: ।। 1
तदनुगुण-समृद्धिः स्सस्त्र-सास्त्र[9]-प्रवृद्धिः ।
5. जिन-समय-गुणाब्धिः कार्य-संरम्भ-बुद्धिः ।
तनु-मदन-विसुद्धिः (शुद्धिर्) अत्यता
6. सर्व्व-सिद्धिः ।
धन-कनक-समाप्तिः (प्तिर्) देवतूहन् प्रपातिः ।। 2
प्रतिष्ठोयं[10]
7. सुगातानं (गतानाम्) आचायन्धर्म्मसेखर.[11] ।
नाम्ना कगण[12]गञ्जस्य मञ्जु-
8. श्रीरिव सौहृदि ।। 3
प्रतिस्थो[13]यं हितात्वाय[14] सर्व्व-स्व-[15]
9. त्वासुकाश्रय ।
देवैरमोघपासेसः[16] श्रीमदादित्यवर्म्मणः ।। 4
10. मूल-द्वा-शरणे पतङ्ग-चरणे नदान्त[17]-साके [18]सुभे ।
भास्म[19]त्कर्क्कटके दिनै-
11. रपि तथा पूर्ण्णेन्दु-योगायते ।
तारैरुत्तर-सिद्धि-योग-घटिका-कारुण्य-मूर्त्त-स्वरा-
12. त् ।
जीर्णैरुद्धरिता समाहित-लसत्सम्बोध-मार्ग्गार्त्थिभिः ।। 5
स्वस्ति समस्त-भुवना-
13. धार-हाटक (:*) भावाश्रम-गृहा[20]बिशारद । अपार-महायान-
योग-विज्ञान-विनोद (:*) । अपि च (।*) ध-
14. राधिप-प्रतिराज-बिकट[21]-संकट-किरीट-कोटि-सङ्ग-
नितक[22]-मणि-द्वय-नाटक-कारण (:*) । श्रीमत् (मान्)
15. श्रीउ (श्यु) दयादित्यवर्म्म (र्म्मा) प्रताप-पराक्रम-राजेन्द्र-मौलि[23]-मणि-
वर्म्मदेव-महाराजाधिराज (:*) स बिज्ञेया-[24]
16. माज्ञाङ्कुरोति ।
बिहङ्ग-[25]मातङ्ग-बिलास-[26]सोमिते ।
कान्तार-सौगन्धी[27]-सुरुद्रमाकुले ।
सुराङ्गना-

17. लाखित-काञ्चनालये ।
मातङ्गनीसा[28] सुर-दीर्घिकागते ।। 6
अनुभवधि बिशेषो[29]न्माद-सन्दोह-हाहा
18. अकिल[30]-दिति-सुतानान्देव-बिद्याधरेस:[31] ।
अपि मधुकर-गीतंर्न्नर्त्त्यं-भोगासितीनाम् ।
अचलति चलति-
19. त्संस्सोभ[32]-मातङ्गिनीसो (श:) ।। 7
हाहा-हूहू-कणेन[33] सम्भ्रम-लसत् (ल्) लोकार्य-भूम्यागतः ।
सौन्दर्य्यै: ससि-[34]
20. पूर्ण्णवत् कुसलभे[35]हृत्सोभतालंकृते ।
नाम्ना उद्ध[36]यवर्म्मगुप्त-सकल-क्षौणीपति-नायकः ।
स त्यक्ता जिनरू-
21. प-सम्भ्रम-गतो मातङ्गिनी-सून्यहा[37] ।। 8
रक्षन्नः क्षयता ब (व) सुन्धरमिद (म) म्मातङ्गिनीपा (प)-त्रय (म्) ।
भक्षेत्सन्त्रियवैरि-मार्ग्ग-च-
22. रिता सर्व्वं-स्व-संहार-कृत् ।
सक्षेत् क्षान्ति-बलाबिलासि[38]-दमने संभ्रान्त-कुलो[39]स्सद (ा*) ।
पातिः (ति) प्रत्यद (ह) लालने प्रकटि-
23. त-क्रूरै (:*) पलाशन्नति ।। 9
बज्र-[40]प्र (ा*) कार-मद्ध्यस्था प्रतिमायं जिनालयः ।
श्रीमान्नमोधपासेस:[41] ह-
24. रिः (रिर्) उदयसुन्दरः ।। 10
सुरु[42]तरु-दि (जि) त-पाणिस्सत्य-सङ्गीत-बाणिः (वाणी) ।
रिपु-नृप-जित-कीर्त्तिः पुष्पधन्वास्त्रमूर्तिः ।
म-
25. लयपुर-हितार्त्थः सर्व्वकार्य्यस्समर्थः[43] ।
गुणरशिलविभातिः देवतूहन्नपातिः ।। 11
उदयपर्व्वत-
26. सोभितरूपतिः[44] ।
उदयद्धि (भूति ?)- नरेश्वर-नायकः ।
उदय-वैरि-बलोन्नत[मृ]द्धचते ।
उदय-सुन्दर-की
27. र्ति-महीतले ।। 12

1. From the published transcripts. The text is full of grammatical and metrical errors.

2. Read *śubha*°.

3. Read *saddha*.°

4. Read *saubhā*°.

5. Read *śīla*°.

6. There is a sign of punctuation after all the *pādas* of the stanzas; those after the 1st and 3rd *pādas* are unnecessary.

7. Read *śāstra*°.

8. Read *tamisra*.

9. Read *śastra-śāstra*.

10. Read *pratishṭhe'=yaṁ*.

11. Read *śekharaḥ*.

12. Read *gagana*.

13. Read *pratishṭhe=yaṁ*.

14. Read *hit-ārtthāya*.

15. Read *sarvva-sattva-sukh-āśrayaḥ*.

16. Read °*pāś-eśaḥ*.

17. Read *Nandānta*. The chronogram has *Nanda*=9; *pataṅga* (bee)-*charaṇa*=6; *dvau*=2; and *mūla* (source)=1. The date suggested by the figures is 1269 of the Śaka era. *Mūla* may also be the same as the *mūla-prakṛiti*.

18. Read *Śāke śubhe*.

19. Read *bhāsva*°.

20. Read *gṛiha-viśāradaḥ*.

21. Read *vikaṭa*.

22. Read *nīta*°.

23. Kern reads °*māli*.

24. Read *vijñe*°.

25. Read *viha*°.

26. Read *vilā*°.

27. Read °*gandhi-sura-drum*°.

28. Read *Mātaṅginīśaḥ*.

29. Read *viśe*°.

30. Read *akhila*°.

31. Read *vidyādhareśaḥ*.

32. Read °*rttaś=śobha*°.

33. Read °*hu-gaṇena*.

34. Read *śaśī*.

35. Read *kuśalabhe hṛich-chhobha*°.

36. Read *udaya*°.

37. Read *śūnya*°.

38. Read *vilā*°.

39. Read *kula*°.

40. Read *vajra*°.

41. Read °*mān=Amoghapāśeśaḥ*.

42. Read *sura*°.

43. Read *kāryye-sama*°.

44. Read *śobhi*°.

Chapter III

Cambodia (Kampuchea)

No. 7—Phnom-penh Stone Inscription of Bhavavarman II, Śaka 561 (639 A.D)

Phnom-penh,[1] Combodia (Kampuchea).

G. Coedes, *B.E.F.E.O.*, IV, 1904, p. 695; R.C. Majumdar, *Inscriptions of Kambuja*, p. 35.

Language : Sanskrit.

Script : Local Modification of Late Brāhmī.

Metres : V.1 *Anushṭubh* (*Śloka*); V.2 *Upajāti* (*Indravajrā-Upendravajrā*); V.3 *Anushṭubh* (*Śloka*).

Summary : The inscription states that, when Bhavavarman was ruling, in the Śaka year counted by the words *mukha* (1), *ṛitu* (6) and *bāṇa* (5), i.e. 561 (639 A.D.), on Pausha-badi 5, Devī Chaturbhujā was installed by the king out of devotion to the god Śambhu (Śiva).

TEXT[2]

1. अस्ति मन्वादि-भूपाल-वर्ण्णमुष्टिर्य्यशो-निधिः (।*)
2. राजा श्री-भववर्म्मेति तपसा धारणाद्धितिः (॥) 1
3. मुखर्त्तु-वा[नै][3]र्गणिते शकाब्दे[4]
झषोदये कण्य[5]गतार्द्धचन्द्रे (।*)
4. पुष्यस्य कृष्णे दिवसो दसार्द्धे[6]
प्रतिष्ठितं देवि चतुर्भुजाख्यं[7] (॥*) 2
5. भक्त्या भगवतशशंभु[8] पितामात्रोर्विमुक्तये (।*)
6. देवी यथार्थचरितै[9]स्स्थापितं य[मि]ना भुवि (॥*) 3

1. The original provenance is unknown. Foucher brought it in 1901 from Phnom-penh and presented it to the Museum of the *L.F.E.O.*
2. From the eye-copy in *B.E.F.E.O.*, *op.cit.*, p. 692.
3. Read *bāṇair=ga°*.

4. Read *śakābde*. That the Śaka era was introduced in these parts in the sixth century A.D. from the ports of the Maharashtra regions then under the Chālukyas of Badami is suggested by the Robang Romans inscription of Śaka 520 (598 A.D.). See *BEFEO*, XLIII, pp. 6-7.

5. Correctly *kanyā*; but the long syllable in *nyā* would spoil the metre. Cf. *api māshaṁ mashaṁ kuryāch=chhando-bhaṅgaṁ tyajed=girām*.

6. Read *divase daś-ārddhe*.

7. *Devī* has been made *devi* for the metre's sake. Read *pratishṭhitā devī Chaturbhuj-ākhyā*.

8. Read °*ś=Śambhoḥ pitur=mātur*°.

9. Read °*s=sthāpitā*.

No. 8—Prah That Kvan Pir Inscription of Pushkara, Śaka 638 (716 A.D.)

Kvan Pir temple, Kraceh Province, Cambodia (Kampuchea).

L. Finot, *B.E.F.E.O.*, IV, 1904, p. 675; R.C. Majumdar, *Inscriptions of Kambuja*, p. 55.

Language : Sanskrit

Script : Local Modification of Late Brâhmī.

Metres : V. 1 *Sragdharā.*

Summary : In the ŚAKA YEAR counted by *vasu* (8), *dahana* (3) and *rasa* (6), i.e., 638 (716 A.D.), king PUSHKARA installed the god PUSHKAREŚA.

TEXT[2]

1. आविर्भूते शकेन्द्रे वसु-दहन-रसै[3] कमिनि[4]-मध्य-चन्द्रे
सिंहे लग्ने तुलायां दिनकर-तनये घाटिके जीवशुक्रे (।*)

2. मिनेन्द्रेन्द्वात्मजाते[5] क्षितिसुत-सहिते भूरि-तीक्ष्णाङ्शुजाले[6]
देवश्श्री-पुष्करेशो द्विजवर-मुनिभिस्स्थापितः पुष्करेण (॥*) 1

1. Pelliot identifies this Pushkara with Pushkarāksha, prince of Aninditapura and later on the king of Śambhupura (Sambaur).

2. From an eye copy. See Finot, *op. cit.*, p. 676.

3. Read *rasaiḥ kā°*. *Vasu*=8, *dahana*(fire) =3 *rasa*=6 make 638 according to the *vāma-gati* principle.

4. Read *kāminī.°* This refers to the Kanyā-rāśi.

5. Read *mīne.*

6. Read *tīkshṇ-āṁśu°*.

No. 9—Prah Khan Temple Inscription of Sūryavarman, Śaka 924 (1002 A.D.)

Prah Khan, Kompong Svay Province, Cambodia(Kampuchea). Delaporte, *Voyage en Cambodge,* 1880, p. 411; Harmand, *Annales de l' Extreme-Orient,* June, 1880, p. 195; L. Finot, *B.E.F.E.O.*, IV, pp. 195, 764; R. C. Majumdar, *Inscriptions of Kambuja*, pp. 360-61.

Language : Sanskrit.

Script : Local Derivative of Late Brāhmī.

Metres : V.1 *Sragdharā*; Vv. 2-9 *Anushṭubh* (*Śloka*).

Summary : The inscription begins with an adoration to the god CHANDRAMAULI (Śiva) and to the BUDDHA. It contains a eulogy of king SŪRYAVARMAN of the solar dynasty and alludes to his success against UDAYĀDITYAVARMAN and to the DATE—ŚAKA 924 (1002 A.D.).

TEXT[1]

1. श्रीमत्पादाग्र-लीलावनमित-धरणी-क्षोभ-संक्षोभितौष्ठं
2. भ्राम्यत्क्रन्दत्सुरेन्द्रं भुज-वल[2]-पवनैस्संस्खलत्सद्विमानैः (।*)
3. स्वाङ्गैस्स्वल्पीकृताशं नव-रस-रुचिभिर्विस्फुरद्रश्मि-माल्यै-
4. र्नाटचं ब्र[3]ह्मादि-सेव्यं सुखयतु दयितानन्दनं चन्द्रमौलेः (॥*) 1
5. नमो वुद्धाय सर्व्वज्ञ-शब्दो यत्रैव सार्थकः (।*)
6. तस्यैव हि वचस्सत्यं प्रमाणेन निरूपितम् (॥*) 2
7. तदुक्तौ पारमी-तन्त्र-त्रय्यौ तद्गत-योगिनः (।*)
8. त्र्यक्ष-रञ्जनीज-ज्ञानं गुरु-पाद-युगन्नमे (॥*) 3
9. श्रीद्धश्श्री-सूर्य्यवर्म्मासीच्चतुर्भुज-विलासकः[4] (।*)
10. यस्सूर्य-वंशजो राज्ये चतुर्भुज-विलासकः (॥*) 4
11. स्मरो(ऽ*)नङ्गश्शशाङ्को (ऽ*)पि शशीति निरवद्यक(म् ।*)
12. म(अ)सृजद्यन्विदङ्कम्मं कान्ति-सर्गाविधीच्छया (॥*) 5
13. भाष्यादि-चरणा काव्य-पाणिष्षड्दर्शनेन्द्रिया (।*)
14. यन्मतिर्द्धर्म्म-शास्त्रादि-मस्तका जङ्गमायता (॥*) 6
15. एतावतानुमेयं यद्वीर्य्यं यद्गूढधीर्मुनिः (।*)

16. रणस्थो राज-सङ्कीर्णाब्राज्ञो[5] राज्यं जहार यः (॥*) 7
17. काल-दोषानलाविष्टा यस्य सेकाम्वु[6]-निर्ग्गमे (।*)
18. तद्विनाशात्क्षणं लोकाः सुखायन्ते स्म सर्व्वथा (॥*) 8
19. युग-हानेरयन्धर्म्मः पद-हीनो जरा-कृशः (।*)
20. यन्नीतिरसमासाद्य सत्पदस्स्म युवायते (॥*) 9

1. From the published transcripts.
2. Read *bala*. *B* and *v* are hardly discriminated.
3. Read *Brahm-ā°*.
4. *Chatur*=4, *bhuja*=2, *vila*=9; i. e. Śaka 924 (1002 A.D.).
5. The reference is to Sūryavarman's victory over Udayādityavarman.
6. Read *sek-āmbu*.

CHAPTER IV

Vietnam

No. 10—My-son Stalae Inscription of Prakāśadharman (c. 653-90 A.D.), Śaka 579 (658 A.D.)

My-son, Quang Nam District, Vietnam.

M. Finot, *B.E.F.E.O.*, IV, pp. 918ff.; M. Coedes, *ibid.*, XII, pp. 15ff.; R. C. Majumdar, *Champā*, Book III, pp. 16 ff.

Language : Sanskrit.

Script : Local Modification of Late Brāhmī.

Metres : V.1 *Śārdūlavikrīḍita*; V.2 *Upajāti*; Vv.3-4 *Anushṭubh* (*Śloka*); V.5 *Vasantatilaka*; Vv.6-7 *Anushṭubh* (*Śloka*); V.8 *Śikhariṇī*; V.9 *Upajāti*; Vv.10 *Mālinī*; Vv.11-12 *Āryā*; V.13 *Upajāti*; V.14 *Āryā*; Vv. 15-16 *Anushṭubh* (*Śloka*); Vv.17-19 *Upajāti*; V.20 *Śārdūlavikrīḍita*; V.21 *Āryā*; V.22 *Upajāti*; V.23 *Āryā*; V. 24 *Śikhariṇī*; V. 25 *Mālinī*; V.26 *Upajāti*; V. 27 *Śārdūlavikrīḍita*; Vv. 28-29 *Upajāti*; V.30 *Śārdūlavikrīḍita*.

Summary : In the city of CHAMPĀ, there was the king called GAṄGĀRĀJA. In his family was born RUDRAVARMAN whose mother was the daughter's daughter of [the Kshatriya] MANORATHAVARMAN. His son ŚAMBHUVARMAN (c. 565-629 A.D.) re-established the god ŚAMBHUBHADREŚA. His son was KANDARPADHARMAN (c. 629-40 A.D.) and his son PRABHĀSADHARMAN (c. 640-45 A.D.). Next came SATYAKAUŚIKASVĀMIN, son of Rudravarman and son-in-law of Kandarpadharman. His son was BHADREŚVARAVARMAN whose brothers were Anaṅgarūpa and Viśvarūpa. Bhadeśvaravarman's son JAGADDHARMAN went to the town called BHAVA. In that town, KAUṆḌINYA is said to have planted the spear he had obtained from AŚVATTHĀMAN. The Brāhmaṇa Kauṇḍinya married SOMĀ, the daughter of the local NĀGA king. King BHADRAVARMAN, who was born in that pure unbroken line of kings, had a brother named MAHENDRAVARMAN. The latter's son was

ĪŚĀNAVARMAN. His son from his wife Sarvāṇī was JAGADDHARMAN. His son was *Mahārāja* PRAKĀŚADHARMAN *alias* VIKRĀNTAVARMAN. In the ŚAKA YEAR 579 (658 A.D.), Prakāśadharman established the god ŚRĪ-PRABHĀSEŚVARA for the welfare of the city of CHAMPĀ. The store-house of LOVI, with (?) the district of Chaum, and the store-houses of Havauṅ, Karnnauy, Chau, Pitau, Kirauṅ, Najoch and Vasauy at Midit—all these were given by him, for the worship of the gods ĪŚĀNEŚVARA, ŚRĪ-ŚAMBHUBHADREŚVARA and ŚRĪ-PRABHĀSEŚVARA. — Death was prescribed as penalty for the destroyer of the grant.

TEXT[1]

First Side

1. सिद्धिः (॥*) ....
2. .... न्यविशुद्ध ....
3. . . . .
4. ... वंशांतर-चतुराननपुर-पु ...
5. . . . .
6. ... धरात्र दीक्षित-मूर्त्तिर्भगवतश्श्री-शम्भुभद्रेश्वरस्य
7. ... श्रीमत्याञ्चम्पापुर्य्याम् (।*)

आसीत्—U U—U—U

8. UU— — —U रः स्वैर्गुणैः[2]

गंगाराज इति श्रुतो नृप-गुण-प्रख्यात-वीर्य्य-श्रुतिः ।

राज्यं दुस्त्य[ज*]—U—UUU—

9. — —U— प्रग्रहे

गंगा-दर्शनजं सुखं महदिति प्रायादतो जाह्नवीम् ॥ 1

दिलीप-मान्धातृ-पुरस्स— —

U—U— —UU—U— — [।*]

10. सनातनीर्लंघयति स्म नो हि

स्थितीरुदन्वानिव यः प्रभुत्वे ॥ 2

तस्य कीर्त्ति-यशो-[वृत*]-श्री-म-

11. नोरथवर्म्म[णः ।*]

दौहित्री-तनयो यो(ऽ*)भूद्द्विजात-प्रवरात्मजः ॥ 3

श्री-रुद्रवर्म्मणस्तस्य नृपतेर्भूरि-ते[जसः ।*]

12. [जेता*] तेजस्विनां यो(ऽ*)भूत्सूनुर्दीधितिमानिव ॥ 4
धर्म्म-स्थितिं कृत-युगाखिल-पाद-भाजं
यस्साम्प्रते(ऽ*)प्यनुसरत्यमलं ∪— — ।

13. [शीतांशु]-मुख-तिरस्कृत-मण्डलाभ-
स्सौम्यं[3] स्वकं नहि जहाति [निरा*]कृतो(ऽ*)पि ॥ 5
श्री-शम्भुवर्म्मणस्तस्य राज्ञः प्रथित-ते[जसः ।*]

14. [य*] इमं शम्भुभद्रेशं पुनः स्थापितवान् भुवि ॥ 6
यत्सूनुरौरसो राजा प्रादुरासीन्महायशाः ।
श्रीमान्कन्दर्प्पधर्म्मेति

15. साक्षाद्धर्म्म इवापरः ॥ 7
प्रजा यस्स्वैर्धर्म्मैर्व्यसन-रहितः पाति सुतव-
न्न तत्रास्त्याशा मे कलिरिति समुत्सेक-विमु[खः ।*]

16. [महद्भि*]स्तेजोभिर्विघुत-विरसः क्वाप्यपगतो
निदाघासह्यांशोर्द्दिनकृत इव ध्वान्त-निवहः ॥ 8
यस्तस्य पुत्रत्वमुपसन् — —

17. — —∪— —स्थिति-निघ्न-हेतुः ।
सर्व्व-प्रजानां समुदेति यत्र
मनोरथो विश्वसृजीव सर्ग्गः ॥ 9
स्व-पर-हित-निषेध-प्राप्ति-हेतु-प्र— —

18. ∪∪∪∪∪ गुणानां युक्तिमापादयन्यः ।
प्रकृति-हितमधीप्सन्सन्तनोत्यात्म-तेजो
मधु-समय-विवस्वद्रश्मि-धर्म्मानुपाती ॥ 10

19. प्रभासधर्म्म-नृ(भू)पतेस्सोदर्या तस्य यानुजा समभूत् ।
जगतां हितार्थं जननी विश्वसृजः कर्म्म-सिद्धिरिव ॥ 11

20. · · · · · ·जन्माच्छन्दस्य-सत्यकौशिकस्वामी ।
तस्याः पतित्वमागादनसूयाया इवात्रि-मुनिः ॥ 12

21. — —∪ पत्यं किल यो बभव
प्रख्यात-वीर्य्य-श्रुति-रूप-कान्तिः ।
क्षत्रं कुलं ब्राह्ममथ द्वयं हि
निरन्तरं यः प्रकटीचकार ॥ 13

22. [श्री-भ*]द्रेश्वरवर्म्मेत्यनङ्गरूपो(ऽ*)थ विश्वरूप इति ।
ते च त्रयो बभूवुस्सोदर्य-भ्रातरो य[स्मात् ।।*] 14

23. [विख्या*]तश्श्री-जगद्धर्म्मः प्रथितः प्राज्य-विक्रमः ।
प्रायातकेनापि विधिना पुरं यद्भुव-साह्व[यम्][4] ।। 15

24. [तत्र*] स्थापितवाञ्छूलं कौण्डिन्यस्तद् द्विजर्षभः ।
अश्वत्थाम्नो द्विजश्रेष्ठाद्द्रोण-पुत्रादवाप्य तं(तम्)।। 16

25. [महा*] कुलासीद्भुजगेन्द्र-कन्या
सोमेति सा वंशकरी पृथिव्याम् ।
आश्रित्य भावेति-विशेष-वस्तु
या मानुष-वासमुवास [हृष्टा*] ।। 17

26. कौण्डिन्य-नाम्ना द्विज-पुङ्गवेन
कार्यार्थ-पत्नीत्वमनायि यापि ।
भविष्यतो(ऽ*)र्थस्य निमित्त-भावे
विधेरचिन्त्यं खलु चेष्टितं हि ।। 18

27. तदव्यवच्छेदि-विशुद्ध-वंश-
परम्परोपात्त-नृपत्व-जन्मा ।
अद्यापि यो(ऽ*)लङ्कृतिनां प्रजाना-
मायात्यनिन्द्य-प्रसवै[र्गुणानाम्*।।] 19

Second Side

1. तस्य श्री-भववर्म्मणः क्षितिपतेश्शक्तित्रय-श्लाघिनो
2. वीर्य्योद्दाम-सपत्न-संघ-समर-स्पर्द्धाभिमान-च्छिदः ।
भ्राता यः पृथिवी-सुरस्समभवद्दृप्तारि-पक्ष-क्षय-
3. स्तेजो-वर्द्धित-शासनो रविरिव प्राज्य-प्रभावोदयः ।। 20
स श्री-महेन्द्रवर्म्मा त्रिदशाधिप-तुल्य-विक्रमः प्रथितः ।
4. यमजनयत्प्रिय-तनयं नय इव सुधियां सुख-प्रसवम् ।। 21
श्रीशानवर्म्मा स नराधिपति-
स्समस्त-दिक्प्रान्त-विसर्पि-तेजा [:।*]
5. [प्रा*]सूत याम-द्वय-वृद्धि-हेतो-
र्य्यज्ञ-क्रियारम्भ इवोदयार्द्धम् ।। 22
तस्यां शी-शर्व्वाण्यां सत्यां सोमान्वय-प्रसूतायाम् ।

6. वर-विक्रमं प्रिय-सुतं यमजनयच्छ्री-जगद्धर्म्मः ॥ 23
गुणानां साकल्यं भवति न किलैकत्र वशिनः
किमप्ये[वं] सृष्टेर्व्वर-
7. कमलयोनेर्भ्भगवतो[5] ।
गुणा यत्राशेषा दधति तु परार्द्धा यमरति-
र्म्महार्हो[6] रत्नो[7] यो[8] इव जलनिधौ दुस्तर-जले ॥ 24
8. अविरत-नर-देव-ब्रह्म-वश्यस्स्व-तेजः-
शमित-रिपु-सनाथ(:*) श्री-समुत्सेक-हेतुः ।
दशरथ-नृपजो(ऽ*)यं राम इत्याशया यं
9. त्रयति[9] विधि-पुरोगा श्रीरहो युक्ति-रूपम् ॥ 25
विवृद्धिमेति त्रितयं यमेत्य
पद्मा च कान्तिश्च सरस्वती च ।
प्रायेण
10. सत्स्थानमभिप्रपन्न(न्नं)
सुबीजमानन्त्य-फलाय कल्प्यम् ॥ 26
सो(ऽ*)यमुदितोदित-मानवेन्द्र-महतीयान्वय-महत्तर-
11. दुरवाप-पर्य्यन्त-क्षीर-पयोनिधि-पूर्व्व-भागोदित-निर्म्मल-मयूख-
पर्याप्त-मण्डल-क्षपा-नाथः क्षपित-महाभिमान-
12. दुष्पृह-सपत्न-संघ-संस्तुत-निसर्ग्ग-वीर्य्यो वीर्य्य-दृढतरैक-
सार्थ-पार्थिव-गुणोपात्त-पालित-सर्व्वाद्धिताहं-[10] तीर्थापादित-
राज्यः
13. लक्ष्मी-निरूपित-वैचक्षण्य(:*) श्रीमान् श्री-चम्पापुर-परमेश्वरो
महाराजः श्री-विक्रान्तवर्म्मेत्युपात्त-विजयाभिषेक-नामा श्री-प्रकाशधर्म्म[11]
14. नव-सप्तत्युत्तर-पञ्च-वर्ष-शतातीत-शकावनीन्द्र-काल-परिमाणं
तपस्य-सित-दशाहार्क-वासरादित्यर्क्ष-वृषभोदयैकादश-
15. घटिकानवद्य-होरादि-पुरस्सरं मीनयुगायातार्क-बुध-
भार्गवं तुलाधरस्थ-भौम-सौरं घटधर-संस्थ-वाचस्पति-नर-युग्मोपगत-
16. ताराधिप-शोभनमित्याजवञ्जवी-भावसामर्थ्य-बीज-संहृति-
चिकीर्षया सकलभुवनैकनाथं श्री-प्रभासेश्वरं प्रतिष्ठापितवान् ।
17. स्वाः शक्तीः प्रतियोग्यतामुपगता क्षित्यादयो मूर्त्तयो
लोक-स्थित्युदयादि-कार्य्यपरता ताभिर्व्विना नास्ति हि ।

18. इत्येवम्विगणय्य[15] शक्तिवशिना येनाध्रियन्ते(ऽ*)थवा
का नामेह् विभुः क्रिया न भजते या स्युः परार्थोदये ॥ 27

19. यो ब्रह्म-विष्णु-त्रिदशाधिपादि-
सुरासुर-ब्रह्म-नृपर्षि-मान्यः ।
तथापि भूत्यै जगतामनृत्य-
च्छ्मशान-भूमाविति चित्रमेतत् ॥ 28

20. यतो जगत्स्थास्नु-चरिष्णु-रूपं
विवर्त्तते(ऽ*)कादिव[13] रश्मि-जालम् ।
यत्रैव भूयः प्रतिलीयते त-
दहो विचित्रो महता निसर्ग्गः ॥ 29

21. यस्यातीत-मनोगतेरपि सतो हेतोर्ज्जगज्जन्मनां
प्रेयो(ऽ*)नन्त्य-फल-प्रदा स्मृतिरपि व्यक्तिः पुनः का कथा ।

22. सौस्थित्य-प्रभवोपलब्धि-विधये चम्पा-नगर्य्यां स्थिरं
स्थेयादा भुवन-स्थितेर्व्विभुरयं स श्री-प्रभासेश्वरः ॥ 30

23. [14]लोङ्कोष्ठागारं स-चौम्विषयं हवोङ्क्नौय्चौ-पितो-क्रौङ्-नजो-
व्वसौय्कोष्ठा-

24: गार-दिमिदित्तत्र सहितं सर्व्वमिदं श्रीमाञ्छ्री-चम्पेश्वर-श्री-प्रकाशधर्म्मा
भगवतां(ताम्) ईशाने-

25. श्वर-श्री-शम्भुभद्रेश्वर-श्री-प्रभासेश्वराणां सतत-पूजा-विधये प्रादात् ॥
ये ध्वंसयन्ति

26. ते ब्रह्म-हत्या-फलमनन्तं कल्पेष्वजस्रमनुभवन्ति (।*) ये
परिपालयन्ति तेऽश्वमेध-फलं(लम् ।)

27. ब्रह्महत्याश्वमेधाभ्यां न परं पुण्य-पापयोरित्यागमादिति प्रतिज्ञातं
तेन तद्दैवता-विशेष-

28. समक्ष(क्षं) योऽस्य सर्व्वस्य प्रदातेति ॥

1. From the published transcripts.
2. Read °*ṇair=g Gaṁgā.*
3. Read °*s=saumyaṁ.*
4. I.e. Bhavapura.
5. Read °*vataḥ.*
6. Read °*rhaṁ*. The word *arati* seems to be unsuitable here.

7. Read °*tnaṁ*.

8. Grammar requires *ya* but the metre requires *yo*. Better read *bhava*° for *iva*.

9. Read *śrayati*.

10. Read *saṁvarddhit-ārtha*.

11. Read °*dharmmā*.

12. Read °*vaṁ vi*°.

13. Read °*rkād=iva*.

14. The sentence may be translated as "the store-house of Loṅ, with the district of Chaum, and the store-houses of Havauṅ, Karnnauy, Chau, Pitau, Krauṅ, Najoch, and Vasauy at Midit—all these have heen given for the worship of the gods Iśāneśvara, Śrī-Śambhubhadreśvara and Śrī-Prabhāseśvara, by Śrī-Prakāśadharman, king of Champā."

No. 11—Yang Tikuh Stelae Inscription of Indra-varman I, Śaka 721 (779-800 A.D.)

Takoh, near Datrang hill, Phanrang, Vietnam.
Bergaigne, *Collection of Sanskrit Inscriptions of Champā*, No. XXII, pp. 31ff.; R. C. Majumdar, *Champā*, III, pp. 44 ff.

Language : Sanskrit.

Script : Local Derivative of Late Brāhmī of South India.

Metres : Vv.1-2, *Sragdharā*; Vv.3-4, *Śārdūlavikrīḍita*, Vv.5-9 *Anushṭubh* (*Śloka*); V. 10 *Vaṁśastha*; Vv.11-14 *Anushṭubh* (*Śloka*).

Summary : The god ŚRĪ-BHADRĀDHIPATĪŚVARA, worshipped in the west of the town of CHAMPĀ, enjoyed for a long time treasures, grain-stores, male and female slaves, silver, gold, jewels, etc. But in the ŚAKA YEAR 709 (787 A.D.) the temple was burnt by the army of JAVA coming in ships. Then king INDRAVARMAN of the BRAHMA-KSHATRA (of mixed Brāhmaṇa-Kshatriya blood) family re-installed it and gave it treasures, grain-stores, silver, gold crown, jewel, necklace and other objects of enjoyment, together with women of the harem (*devadāsis*), male and female slaves, oxen, buffaloes, fields and other articles. Indravarman also installed an EARTHEN LIṄGA of the god, which came to be known as INDRABHADREŚVARA. He established, in the ŚAKA YEAR 721 (799-800 A.D.), two treasuries of the god, one composed of movable and immovable property, and one of movable propeny with mouths (priests?). To the god, the king granted the territory of ŚIKHIŚIKHĀGIRI, comprising the two fields called ŚIVA-KSHETRA and YAJÑA-KSHETRA and the grain-store at Jaña.

TEXT[1]

A

1. १॰ यस्सिद्धर्षि-सङ्घैंस्सुरवर-निचयैश्चारणैश्चोत्तमौजो
यं यस्माद्याति युक्तस्स ज-

2. यति जगताञ्जायते जन्म-जुष्टः ।
ताक्ष्यार्क्केन्द्विन्द्रदैत्यैर्द्दिवि भुवि विभवै[2] र्भाव-भोगस्य भोक्ता
3. यक्षर्क्ष-क्षुद्र-रक्षः क्षणमपि समभूत्तस्य भक्त्या स्मरेद्यम् ।। 1
तस्य भगवतोऽसुरासुर-रिपु-पवि-
4. त्र-चरण-युगल-सरोरुह-मकरण्डस्य[3] क्षीरार्ण्णव-तरङ्ग-गगण-
सिन्धु-फेण-शशिकर-शुक्लतर-भ-
5. स्मावदात-धवलतर-शरीर-प्रदेशस्याशेष-भुवनोपजीव्यमान-
विप्रतीय[4]तर-पङ्कज-मृणाल-नाल-पा-
6. द-विम्व(म्ब)स्य सुरासुरपति-शिखर-मङ्गल-पद-द्वय-रेणु-गङ्गा-
प्रवाहस्यापि सुर-सिद्ध-विद्याधर-गण-मुकुट-कि-
7. रीटवर-कनक-कण-निकर-सन्ध्यायमान-चरण-नख-मणि-
दर्प्पणस्य पाद-युगलारविन्दस्य शरणमधि-
8. कृत्य स भगवान् श्रीमानिन्द्रवर्म्मा प्रतिदिवसमेवमखिल-
दिगन्तराल-धर्म्मस्थिति-तरतम-क्रम-प्रती-
9. तः क्षितितले पुण्यमकरोत् ।।
श्रीमान्राजेन्द्रवर्म्मा वर-जन-महितो यज्ञ-रत्न-प्रमुख्यः
ख्यात-
10. स्तेषां प्रभावैर्म्मनुरिव ज[ग]तो रक्षणे क्षेम-युक्तः (।*)
ब्रह्म-क्षत्र-प्रधानो जगति दिवि यथा य-
11. ज्ञ-भागैर्म्महेन्द्रो
राज्ये वङ्श(वंश)-प्रतीतस्सरुचिरिव शशी निर्म्मलाकाश-देशे ।। 2
स-जयति विक्रमतया
12. भुज-द्वयेनोद्वहन्निव धरणीं सकल-चम्पाधिराज्य-वसुमतीतल-
पतित-शतमख इव धनञ्जय
13. इवाप्रतिहत-पराक्रमोऽपि हरिरिव विजिताशेष-रिपुवृन्द-वृद्ध-
स्सुरासुर-गुरु-चरण-द्वया-
14. रविन्द-जनित-सुस्फीत-देशातिशय-विक्रमस्तु भुवि देवराज-
सदृशः पूर्व्वजन्मानवरत-मख-कुश-
15. ल-तपः-फलतया धनद इव धन-त्यागातिशयेन राज-लक्ष्म्यालिङ्गित-
मृदुतर-शरीर-प्रदेशः
16. प्रमुदित-मनसा तस्य नगरी-प्रतीततर-वसुधा-तरतमानुक्रम-
रक्षण-स्व-शक्ति-प्रभावो-

17. र्ज्जित-निरुपद्रव-वर्ण्णाश्रम-व्यवस्थितिस्सुर-नगरीव राजधान्यासीत् ॥
स श्रीमान्नृपतिस्सदा

18. विजयते भूमौ रिपो[5]स्सर्व्वत-
श्चन्द्रेन्द्राग्नि-यमस्य विग्रहमधाद्यक्षाधिपस्यौजसा (।*)

19. ब्रह्माङ्श(ह्मांश)-प्रभवः प्रभूतविभवो भाग्यप्रभावान्वितः
शक्त्या विष्णुरिव प्रमथ्य च रिपून्धर्म्मं-स्थितिं

20. पालयेत् ॥ 3

B

1. श्री-भद्राधिपतीश्वरस्त्रिभुवने ख्यातस्स्वतेजो(ऽ*)ग्निभि-
र्ग्गन्धर्व्वोरग-राक्षसैश्च मुनिभिर्द्देवर्षि-विद्याधरैः (।*)

2. पाताल-प्रभवश्च वीर्य्य-तपसा सात्वेन[6] वा योगिनो
युक्तस्तैर्म्मनसा प्रभाव-विभवैः संस्तूयते सर्व्वदा ॥ 4

3. नगर्य्याः पश्चिमोद्भुत [7]स्त्रिभिर्लोकैः समर्च्चितः ।
दूरतस्तेजसो भक्त्या सोऽयं भाति महीतले ॥ 5

4. भद्रं स्वस्थं शुभं
यस्माज्जगतां पाति तेजसा ।
भद्रस्याधिपतिस्तस्मात्स भद्राधिपतीश्वरः ॥ 6
अथ चिरकालेन कोश-कोष्ठागार-

5. दास-दासी-रजत-सुवर्ण्ण-रत्नादि-परिभोग-भुक्तस्स भुवन-
त्रयार्च्चित-पाद-पङ्कज-रेणुरेव स्वेन तेजसा सकल-जगद्धित-

6. कारणस्समभवत् ॥ ततश्च कलियुग-
दोषातिशय-भावेन नावागतैर्ज्ज(र्य्यं)व-वल-संघैर्न्निर्द्दह्यते(ऽ*)पि
नवाम्बराद्रि-य(प्र)-

7. मिते शक-काले[8] स एव शून्योऽभवत् ॥
बहु-वर्ष-सहस्राणि स बभूव महीतले (।*)
स्वं स्थानं दहनं गन्तुं ह्यकरोत्स्वस्य

8. मायया ॥ 7
अथ तस्य तदपि राजेन्द्रवर्म्मणा पुनः स्थापितमेव सकल-कोश-
कोष्ठागार-रजत-सुवर्ण्ण-मुकु-

9. ट-रत्न-हारादि-परिभोग-सान्तःपुर-विलासिनी-
दास-दासी-गो-महिष-क्षेत्रादि-द्रव्यं तस्मै

तेन दत्तञ्चित्त-प्रसादेन ॥

10. तस्यापि पार्थिवं लिङ्गं स्थापितं श्रीन्द्रवर्म्मणा (।*)
इन्द्रभद्रेश्वरो नाम्ना ततश्चाभूत्स एव वा ॥ 8

11. तस्यैव स्थापि-
तन्तेन द्वयं कोषञ्चरं स्थिरं॥(रम् ।)
समुखञ्चरकोशं हि शाके शशि-यमाद्रिगे[9] ॥ 9
स एव राजा परिपालयन्महीं

12. यदा प्रजास्ताः मुदितास्स्व-विक्रमैः(।*)
स्व-धर्म्म-यत्नात्प्रथितो महीतले
सदा रिपूणाञ्जयति स्म तेजसा ॥ 10

13. स धर्म्म-कुल-सम्पन्नस्त्यागी शूर-समन्वितः ।
शक्त्या पराञ्च(रांश्च) निर्ज्जित्य महीं पायात्समन्ततः ॥ 11

14. तस्मै भगवते सकल-लोक-हित-कारणाय श्रीन्द्रभद्रेश्वरायेदमिति
स भगवान् श्रीमानिन्द्र-

15. वर्म्मा जत्रं-कोष्ठागारं शिव-यज्ञ-क्षेत्र-द्वयं
शिखिशिखागिरि-प्रदेशं भक्त्या शुद्धेन मनसैव दत्त-

16. वानिति ॥
इन्द्रभद्रेश्वरस्यैव सर्व्व-द्रव्यं महीतले (।*)
ये रक्षन्ति रमन्त्येते स्वर्ग्गे सुर-गणैस्सदा ॥ 12

17. ये हरन्ति पतन्त्येते नरके वा कुलैस्सह (।*)
यावत्सूर्य्योऽस्ति चन्द्रश्च तावन्नरक-दुःखिताः ॥ 13

18. लुब्धेन मनसा द्रव्यं यो हरेत्परमेश्वरात् (।*)
नरकान्न पुनर्ग्गच्छेन्न चिरन्तु स जीवति ॥ 14

1. From the published transcripts.
2. Read ˇr=bbhāva°.
3. Read °*ndasya.*
4. Read °*pratīpa.*
5. Read *ripuṁ sarvataḥ.*
6. Read *sattvena.*
7. Read °*bhūta*°.
8. *Nava*=9; *ambara*=o; *adri*=7; the date is (according to the formula *aṅkasya vāmā gatiḥ*) Śaka 709, i.e. 787 A.D.
9. *Śaśin*=1; *yama*=2; *adri*=7; the date, according to the usual formula, is Śaka 721=799-800 A.D.

No. 12—Po Nagar Stelae Inscription of Parameśvaravarman I, Śaka 972 (1050 A.D.)

Near Nha Trang, Khan Hoa District, Vietnam.

Bergaigne, *Collection of Sanskrit Inscriptions of Champā*, No. XXIX, p. 702; XI, pp. 93-94; R. C. Majumdar, *Champā*, III, p. 152.

Language : Sanskrit.

Script : Local Derivative of Late Brāhmī.

Metres : V.1 *Sragdharā*; V.2 *Śārdūlavikrīḍita*; V.3 *Anushṭubh* (*Śloka*).

Summary : King Parameśvara bows down, with his queen, to the goddess (Bhagavatī) forming half the body of the moon-crested god (Śiva Ardhanārīśvara) and donates various golden ornaments and other objects to the deity in Śaka 972 (1050 A.D.).

TEXT[1]

1. स्वस्ति ।
भूताभूतेश-भूता भुवि भव-विभवोद्भाव-भावात्म-भावा
2. भावाभावा स्वभावा भव-भवक-भवाभाव-भावैक-भावा ।
भावाभावा (3) ग्र-शक्तिः शशि-मुकुट-तनोरर्ध-काया सुकाया
काये काये (4) श-काया भगवति नमतोनो (नौ) जयेव स्व-सिद्ध्या ॥ 1
सारासार-वि (5) वेचन-स्फुट-मना मान्यो मनो-नन्दनः
पापापाप-भय-प्रियः
6. प्रियकरः कीर्त्यर्ज्जनैकोद्यमः
लोकालोकिकलौ क-
7. लौ सति सतस्त्वातु भवद्भाविनो
भावोद्भाव-सुभाव-सद्गुण-गणै-
8. र्द्धम्मं तनोत्येव यः ॥ 2
वेलाद्रि-नव-मे[2] क्ष्मेशः श्रीद्धः श्री-पर (9) मेश्वरः ।
स्वर्ण-विद्ध-घटन्तस्याः स्थापयेत्स्थानक-स्थले ॥ 3
10. इदन्तु पूजार्थमुत्तमं

मुकुट-भूषणमेकं विचित्र-रशना-(11)गुण एकः रूप्यमय-भृङ्गार
एकः मयूरच्छत्रमेकं पृथु-रजत-(12)वितानमेकमेतत्सर्व्वं
कलधौत-मयैः सुकलशाष्टार्द्ध-बा(13)ल-भाजन-पृथु-भाजनैः
साकन्तेनास्यै प्रहितमिति ॥

1. See illustration in Bergaigne's book.

2. *Velā*=2; *adri*=7; *navan*=9; the date, according to the usual formula, is Śaka 972=1050 A.D.

No. 13—My-son Temple Inscription of Indravarman IV, Śaka 1085 (1163 A.D.)

My-son, Quang Nam District, Vietnam.
Finot, *B.E.F.E.O.*, IV, p. 969, No. XXIII; R. C. Majumdar, *Champā*, III, pp. 196 f.

Language : Sanskrit.

Script : Local Derivative of Late Brāhmī.

Metres : V.1 *Indravajrā*; V.2 *Vaṁśastha*; Vv.3-6 *Indravajrā*.

Summary : Puciy Anak Śrī JAYA INDRAVARMAN of GRĀMAPURA made a gift to the god ŚRĪ ĪŚĀNABHADREŚVARA in the ŚAKA YEAR 1085 (1163 A.D.). For the *Kośa*, a further grant of 232 *Paṇas* of gold, 82 precious stones, 67 groups of pearls and 200 *Paṇas* of silver was made.

TEXT[1]

1. पुचिय् अनाक् श्री-जय-इन्द्रवर्म्मा
प्रादादिदं
2. ग्राम-पुर-प्रदेशः ।
वा(बा)णाष्ट-खेन्दाविव[2] रत्न-
3. सानुं
श्रीशानभद्रेश्वर ईश्वरेशे ॥ 1
4. सनीश्वरात्मा महदीश्वरीकृतो
हिरण्य-
5. गर्भो न स ईश्वरोऽधुना ।
हिरण्यगर्भो-[3]
6. कृत वप्रतेदसे[4]
दृशस्ततो येन सनु
7. स्तुतस्सता ॥ 2
नैवाशिषस्तत्सुधिया-
8. नुशक्त-
स्तस्मिन्स दातुं दश-दिक्षु देवः ।

9. रक्षाकृतो भूभृति पञ्चववत्ः
पुर्न्व्वि(र्ब्बि)-
10. भर्त्यद्य मुखानि पञ्च ॥ 3
दृष्टैर्म्महा-
11. स्यैवं(बं)हुवाक्स शर्व्व-
स्स्तुत्यात्म(1*) यद्दत्त-
12. सुवर्ण-कोशः।
तत्रैक-कान्त्या वचनो
13. न्वलाभा-
ह्येयस्य दत्तेन समान-कान्तेः ॥ 4
14. दयाथ कीर्त्तिश्च गुणश्च यस्य
रूपञ्च
15. वीर्य्यञ्च मुखानि पञ्च ।
एतानि वक्ष्यद्युगप-
16. न्महेशे[5]
सत्कोशनं पश्च वि(बि)भर्त्ति वेदम्[6] ॥ 5
17. सत्कोशने तत्र पणे सुवर्ण्णे
कर्ण्ण-त्रि-
18. कर्ण्णा द्वि-वपुर्मणीन्द्रे
मुक्तासु धात्रीधर-
19. षट्समूहे
रूप्ये पणे(ऽ*)प्यम्बर-शून्य-कर्ण्णाः ॥[7] 6

1. Prepared from published transcripts.
2. *Bāṇa*=5; *ashṭan*=8; *kha*=0; *indu*=1; according to the general formula therefore we get the Śaka year 1085. *Ba* appears to be indicated by the sign for *va.*
3. There may be a reference here to the Hiranyagarbha-mahādāna performed by the king.
4. Read *ugra-tejase.*
5. Read °*Maheśaḥ.*
6. Read *ch=edam.*
7. *Karṇa*=two, *vapus*=eight. *dhātrīdhara*=seven, etc.

SUPPLEMENT

No. 1—Egrā Copper-plate Inscription of the time of Śaśāṅka (c. 600-25 A.D.)

Egrā, Midnapore District, West Bengal.

Language : Sanskrit.

Script : Siddhamātṛikā.

Metres : Vv. 1-3 *Anushṭubh* (*Śloka*).

Summary : During the reign of ŚAŚĀṄKADEVA, a number of *Mahāmahattaras*, *Mahattaras*, *Mahāpradhānas*, *Pradhānas*, *Vaishayikas*, *Karaṇikas*, *Sthāyipālas*, *Pustapālas*, etc., who belonged to the board of administration of an *adhikaraṇa* of the EKATĀ-KAKSHA-VISHAYA, approached the officers of the district like the *Kārtākṛitika*, *Uparika*, *Bhuktipattalika*, *Vishayapati*, *Bhāṇḍā-gārādhikṛita*, etc., with the following statement. They mentioned that *Antaraṅga* DOSHATUṄGA had applied to them for a plot of land as a rent-free estate for settling a Trivedin Brāhmaṇa named Bhaṭṭa DĀMASVĀMIN of the Kauśika-gotra. Accordingly one hundred Droṇavāpas of land at the rate of 4 Paṇas per Droṇavāpa (i.e. getting 32,000 cowries as the price) were granted to the applicant in the north-western part of the village of KAPARDIPADRAKA.

TEXT[1]

Seal

1. एकताकक्ष-विषय ×
2. · · ·ाधिकरणं (णम् ॥)

Obverse

1. १ स्वस्त्यनेक-सृष्टचन्तरेषु पारम्पर्य्य-क्रमेण समतीत-राजेष(षु)
2 शत-सहस्राध्युषितायां चतुर्दिक्पर्यन्तायां चतु[र्व]र्ण्णा]श्रमाकीर्ण्णायां

3. चतु[र*]म्भोनिधि-मेखला-कलापाभरणायां शब्द-श्वस्वांष(स्पर्श)-रस-
रूप-गन्धवक्त्या(त्या)-

4. मपरिमित-गुणवत्यां पृथ(थि)व्यां परमदैवत-श्री-परमभट्टारक-श्रीश-
महारा-

5. जाधिराज-परममाहेश्वर-श्री-शो(श)शाङ्कदेव(वो) राज्यं प्रशास-
ति स्म (।*) इहैकताकक्ष-

6. विषये पूज्यान्वर्त्तमान-भविष्यत्कार्त्ताकृतिकोपरिक-भुक्तिपत्तलिक-
कुमारामात्य-वि-

7. षयपतीन्तद(था)धिकृतां(तान्) भाण्डागारे च भाण्डागाराधिकृता-
न्तदा(था)धिकरणानि च यथा-

8. र्हन(र्हं) जा(ज्ञा)पयित्वा शिरोभिश्च प्रणिपत्यैतदा(द)धिवा-
सीय-महामहत्तर-स्कन्दसेन-

9. नागसेन-प्रत्यग्रहारीय-पट-त्र्याणेकाग्रहारीय-नागदेवानन्तदेव-
तरवतोदर्भाग्रहारी-

10. य-महामहत्तर-धर्म्मगुप्त-यज्ञवसु-लोड्डा[वा]ग्रहारीय-महामहत्तर-
सोमदे[व]-गु-

11. हदेवाखवटयिकाग्रहारीय-महामहत्तर-गोध्यक्षिघोषा(ष)-मोक्षदेव-
वि(विं)शतिखड्डानीय-

12. महामहत्तसो(र)-महीभद्र-रात-छात्र-मृगाटेय-महत्तर-
गोमिदत्त-गुर्ज्जारपदकीय-

13. भट्ट-धनपाल-कापलाशकीय-भट्ट-गोपालदेव-सर्षपवासिनीय-महादेव-

14. व्रा(ब्रा)ह्मणपद्रकीय-रैथिस्वामि-वैषयिकानाम-महामहत्तर-
वत्सशर्म्म-महाप्रधानोदय-

15. चन्द्र-प्रधान-जयदेव-प्रधान-ध्रुवद-प्रध(धा)न-यशोनाग-प्रधान-
वान्थ(बान्ध)वनाग-करणिको(क)-प्रवृद्धदत्त-

16. समुद्रदत्त-उद्यो(त्तोद्द्यो)तसिंह-पुस्तपो(पा)ल-जिनसेनादामरा-
चोन-स्थायिपाल-श्रीधर्म्म-स्वस्तयस्तदा

17. ज्ञापयन्ति चान्तरङ्ग-दोष्तुङ्गेन विज्ञापिता(:*) स्म भ्रा-चन्द्रार्क्क-
समकालीनाक्षय-णी(नी)-

18. वी(व्या) सम्यत्प(क्प्र)तिपाल्य-साधनानि पर(रा)क्रमेन(ण)भुज्यमा-
(ना*)नि इच्छे(ऽ*)हं सह पि(त्रा*) म(मा)ता-पित्रो-

19. रात्मनश्च पुण्याभिवृर्ध(द्ध)ये कौशिक-सगोत्राय त्रि-प्रवराय
कौशिकाय(घ)मर्ष-

20. [ण-विश्वामित्र-प्रवराय] त्त्रि-वेदाध्यायिनि(ने)भट्ट-दामस्वामि(ने दातु-
मिति ।*) कर्पाद्दिपद्रके

Reverse

21. द्रोण-वाप-शतं क्षेत्रं ताम्रपट्टीक्रि(कृ)त्य छित्वा तु(त्त्वात्र) मं(मां)
ति(दी)यतां (तामिति ।) एतद्धर्म्म-

22. संहिता-वचनमुपश्रुत्यास्माभिर्यैरुपरिलिखितके(कै)र-
न्योन्यावधारण-

